असमञ्जसोंऽशुमांश्च दिलीपोंऽशुमतोऽभवत् ॥ २९ ॥
भगीरथो दिलीपात्तु येन गङ्गावतारिता।

---

१ मुनिनेति ज०।

भगीरथात्तु नाभागो नाभागादम्बरीषकः ॥ २० ॥
सिन्धुद्वीपोऽम्बरीषात्तु श्रुतायुस्तत्सुतः स्मृतः।
श्रुतायोर्ऋतपर्णोऽभूत्तस्य कल्माषपादकः ॥ २१ ॥
कल्माषाङ्घ्रेः सर्व्वकर्म्मा(१) ह्यनरण्यस्ततोऽभवत्।
अनरण्यात्तु निघ्नोऽथ अनमित्रस्ततो रघुः ॥ २२ ॥
रघोरभूद्दिलीपस्तु दिलीपाच्चाप्यजो नृपः।
दीर्घबाहुरजात् कालस्त्वजापालस्ततोऽभवत् ॥ २३ ॥
तथा दशरथो जातस्तस्य पुत्रचतुष्टयम्।
नारायणात्मकाः सर्व रामस्तस्याग्रजोऽभवत् ॥ २४ ॥
रावणान्तकरो राजा ह्ययोध्यायां रघूत्तमः।
वाल्मीकिर्यस्य चरितं चक्रे तन्नारदश्रवात् ॥ २५ ॥
रामपुत्रौ कुशलवौ सीतायां कुलवर्द्धनौ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ॥ २६ ॥
निषधात्तु नलो जज्ञे नभोऽजायत वै नलात्।
नभसः पुण्डरीकोऽभूत् सुधन्वा च ततोऽभवत् ॥ २७ ॥
सुधन्वनो देवानीको ह्यहीनाश्वस्य तत्सुतः।
अहीनाश्वात् सहस्राश्वश्चन्द्रालोकस्ततोऽभवत् ॥ २८ ॥
चन्द्रावलोकतस्तारापीडोऽस्माच्चन्द्रपर्व्वतः।
चन्द्रगिरेर्भानुरथः श्रुतायुस्तस्य चात्मजः।
इक्ष्वाकुवंशप्रभवाः सूर्य्यवंशधराः स्मृताः ॥ २९ ॥

इत्याग्नेये महापुराणे सूर्य्यवंशकीर्त्तनं नाम द्विसप्तत्यधिक-द्विशततमोऽध्यायः।

---

१ सर्वकर्म्मेति ख०, ङ० च।

अथ द्विसप्तत्यधिकद्विशततमोऽध्यायः।

———ooo———

सोमवंशवर्णनं।

अग्निरुवाच। सोमवंशं प्रवक्ष्यामि पठितं पापनाशनम्।
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरत्रितः॥ १॥
सोमयज्ञे राजसूयं त्रैलोक्यं दक्षिणान्ददौ।
समाप्तेऽवभृथे सोमं तद्रूपालोकनेच्छवः॥ २॥
कामबाणाभितप्ताङ्गो नरदेव्यः सिषेविरे।
लक्ष्मीर्नारायणं त्यक्त्वा सिनीवाली च कर्दमम्॥ ३॥
द्युतिं विभावसुत्यक्त्वा पुष्टिर्धातारमव्ययम्।
प्रभा प्रभाकरत्यक्त्वा हविष्मन्तं कुहूः स्वयम्॥ ४॥
कीर्त्तिर्जयन्तभर्त्तारं वसुर्मारीचकश्यपम्।
धृतिस्त्यक्त्वा पतिं नन्दीं सोममेवाभजत्तदा॥ ५॥
स्वकीया इव सोमोऽपि कामयामास तास्तदा।
एवं कृतापचारस्य तासां भर्त्तृगणस्तदा॥ ६॥
न शशाकापचाराय(१) शापैः शस्त्रादिभिः पुनः।
समस्तलोकैकनाथत्वमवाप्तस्तपसा श्रुत॥ ७॥
विवभ्राम मतिस्तस्य विनयादनया हृता।
बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीम्॥ ८॥
जहार तरसा सोमो ह्यवमन्याङ्गिरःसुतम्।
ततस्तदुद्युद्धमभवत् प्रख्यातं तारकामयम्॥ ९॥

---

१ न शशाकापकाराय इति अ०।

देवानां दानवानाञ्च लोकक्षयकरं महत् ।
ब्रह्मा निवार्य्याग्निसंस्कारमङ्गिरसे ददौ ॥ १० ॥
तामन्तःप्रसवां दृष्ट्वा गर्भं त्यजाब्रवीद्गुरुः ।
गर्भस्त्याक्षः प्रदीप्तोऽथ प्राहाहं सोममन्भवः ॥ ११ ॥
एवं सोमाद्बुधः पुत्रः पुत्रस्तस्य पुरूरवाः ।
स्वर्गन्त्यक्त्वोर्वशी सा तं वरयामास चाप्सराः ॥ १२ ॥
तया सहात्तरद्राजा दशवर्षाणि पञ्च च ।
पञ्च षट् सप्त चाष्टौ च दश चाष्टौ महामुने ॥ १३ ॥
एकोऽग्निरभवत् पूर्व्वं तेन त्रेता प्रवर्त्तिता ।
पुरूरवा योगशीलो गान्धर्व्वलोकमीयिवान् ॥ १४ ॥
आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान् वसुः ।
दिविजातः शतायुश्च सुषुवे चोर्व्वशी नृपान् ॥ १५ ॥
आयुषो नहुषः पुत्रो वृद्धशर्म्मा रजिस्तथा ।
दम्भो विपाप्मा पञ्चाग्नेर्(१) रजेः पुत्रशतं ह्यभूत् ॥ १६ ॥
राजेया इति विख्याता विष्णुदत्तवरो रजिः ।
देवासुरे रणे दैत्यानबधीत्सुरयाचितः ॥ १७ ॥
गतायेन्द्राय पुत्रत्वं दत्त्वा राज्यं दिवङ्गतः ।
रजेः पुत्रैर्हृतं राज्यं शक्रस्याथ सुदुर्म्मनाः ॥ १८ ॥
बृहस्पत्यादिविधिना गुरुरिन्द्राय तद्ददौ ।
मोहयित्वा रजिसुतानासुरैस्ते निजधर्म्मगाः ॥ १९ ॥
नहुषस्य सुताः सप्त यतिर्य्ययातिरुत्तमः ।
उद्भवः पञ्चकश्चैव शर्य्यातिश्चेति पालकौ ॥ २० ॥

---

१ पञ्चाग्न्या इति ज० । पञ्चाग्निमिति ज० ।

यतिः कुमारभावेऽपि विष्णुं ध्यात्वा हरिं गतः ।
देवयानी शुक्रकन्या ययातेः पत्न्यभूत्तदा ॥ २१ ॥
वृषपर्व्वजा शर्म्मिष्ठा ययातेः पञ्च तत्सुताः ।
यदुश्च तुर्व्वसुश्चैव देवयानी व्यजायत ॥ २२ ॥
द्रुह्यश्चानूश्च पूरुश्च शर्म्मिष्ठा वार्षपर्व्वणी ।
यदुः पूरुश्चाभवतान्तेषां वंशविवर्द्धनौ ॥ २३ ॥

इत्याग्नेये महापुराणे सोमवंशवर्णनं नाम त्रिसप्तत्यधिक-द्विशततमोऽध्यायः ।

अथ चतुःसप्तत्यधिकद्विशततमोऽध्यायः ।

—ooo—

यदुवंशवर्णनं ।

अग्निरुवाच । यदोरासन्पञ्च पुत्रा ज्येष्ठस्तेषु सहस्रजित् ।
नीलाञ्जिको रघुः क्रोष्टुः शतजिच्च सहस्रजित् ॥ १ ॥
शतजिद्धैहयो रेणुहैयो हय इति त्रयः ।
धर्म्मनेत्रो हैहयस्य धर्म्मनेत्रस्य संहतः ॥ २ ॥
महिमा संहतस्यासीन्महिन्नो भद्रसेनकः ।
भद्रसेनाद् दुर्गमोऽभूद्दुर्गमात्कनकोऽभवत् ॥ ३ ॥
कनकात् कृतवीर्य्यस्तु तस्माग्निः कार्त्तवीरकः ।
कृतौजाश्च चतुर्थोऽभूत् कृतवीर्य्यात्तु सोऽर्जुनः ॥ ४ ॥
दत्तोऽर्जुनाय तपते सप्तद्वीपमहीं शताम् ।
हृदो बाहुसहस्रञ्च अजेयत्वं रथेऽरिहा ॥ ५ ॥

अधर्म्मे वर्त्तमानस्य विष्णुहस्तान्मृतिर्ध्रुवा ।
दश यज्ञसहस्राणि सोऽर्জ्जुनः क्रतवान्नृपः ॥ ६ ॥
अनष्टद्रव्यता राष्ट्रे तस्य संस्मरणादभूत् ।
न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति वै नृपाः ॥ ७ ॥
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ।
कार्त्तवीर्यस्य च यतं पुत्राणां पञ्च वै पराः ॥ ८ ॥
सूरसेनश्च सूरश्च धृष्टोक्तः कृष्ण एव च ।
जयध्वजश्च नामासीदावन्त्यो नृपतिर्महान् ॥ ९ ॥
जयध्वजात्तालजङ्घस्तालजङ्घात्ततः सुताः ।
हैहयानां कुलाः पञ्च भोजाश्चावन्त्यस्तथा ॥ १० ॥
वीतिहोत्राः स्वयं जाताः शौण्डिकेयास्तथैव च ।
वीतिहोत्रादनन्ताऽभूदनन्ताद्दुर्जयो नृपः ॥ ११ ॥
क्रोष्टोर्वंशं प्रवक्ष्यामि यत्र जातो हरिः स्वयम् ।
क्रोष्टोस्तु वृजिनीवांश्च स्वाहाऽभूद्वृजिनीवतः ॥ १२ ॥
स्वाहापुत्रो रुषद्गुश्च(१) तस्य चित्ररथः सुतः ।
शशबिन्दुश्चित्ररथाच्चक्रवर्त्ती हरेरंशतः ॥ १३ ॥
शशबिन्दोश्च पुत्राणां शतानामभवच्छतम् ।
धीमतां वारुरूपाणां भूरिद्रविणतेजसाम् ॥ १४ ॥
पृथुश्रवाः प्रधानोऽभूत्तस्य पुत्रः सुयज्ञकः ।
सुयज्ञस्योशनाः पुत्रस्तितिक्षुरुशनःसुतः ॥ १५ ॥
तितिक्षोस्तु मरुत्तोऽभूत्तस्मात्कम्बलबर्हिषः ।
पञ्चाशद्रुक्मकवचाद्रुक्मेषः पृथुरुक्मकः ॥ १६ ॥

---

१ विशालपुत्रेति ज० ।

हविर्ज्यामघः पापघ्नो ज्यामघः स्त्रीजितोऽभवत्।
शैव्यायां ज्यामघादासीद्विदर्भस्तस्य कौशिकः॥ १७॥
लोमपादः क्रथः श्रेष्ठात् कृतिः(१)स्याल्लोमपादतः।
कौशिकस्य चिदिः पुत्रस्तस्माच्चैद्या नृपाः स्मृताः॥ १८॥
क्रथाद्विदर्भपुत्राय कुन्तिः कुन्तेस्तु धृष्टकः।
धृष्टस्य निधृतिस्तस्य उदक्रीवो विदूरथः॥ १९॥
दशार्हपुत्रो व्योमस्तु व्योमाज्जीमूत उच्यते।
जीमूतपुत्रो विकलस्तस्य भीमरथः सुतः॥ २०॥
भीमरथान्नवरथस्ततो दृढ़रथोऽभवत्।
शकुन्तिश्च दृढ़रथात् शकुन्तेश्च करम्भकः॥ २१॥
करम्भाद्देवलातोऽभूत्(२) देवक्षेत्रश्च तत्सुतः।
देवक्षेत्राच्मधुर्नाम मधोर्द्रवरसोऽभवत्॥ २२॥
द्रवरसात् पुरुहूतोऽभूज्जन्तुरासीत्तु तत्सुतः।
गुणी तु यादवो राजा जन्तुपुत्रस्तु सात्वतः॥ २३॥
सात्वताद्भजमानस्तु वृष्णिरन्धक एव च।
देवावृधश्च चत्वारस्तेषां वंशास्तु विश्रुताः(३)॥ २४॥
भजमानस्य वाह्नीऽभूद्वृष्टिः क्रमिर्निमिस्तथा।
देवावृधाद्बभ्रुरासीत्तस्य श्लोकोऽत्र गीयते॥ २५॥
यथैव शृणुमो दूरात् गुणांस्तद्वत्समन्तिकात्।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः॥ २६॥
चत्वारश्च सुता बभ्रोर्वासुदेवपरा नृपाः।

---

(१) धृतिरिति क०।

२ देवरातोऽभूदिति क०, ग०, घ०. ङ०. ञ०, ट० च।

३ विश्रुता इति क०, ङ० च।

कुकुरो भजमानस्तु(१) शिनिः कम्बलबर्हिषः ॥ २७ ॥
कुकुरस्य(२) सुतो धृष्णुर्धृष्णोस्तु तनयो धृतिः ।
धृतेः कपोतरोमाभूत्तस्य पुत्रस्तु तित्तिरिः ॥ २८ ॥
तित्तिरेस्तु नरः पुत्रस्तस्य चन्दनदुन्दुभिः ।
पुनर्वसुस्तस्य पुत्र आहुकश्चाहुकीसुतः ॥ २९ ॥
आहुकादेवको जज्ञे उग्रसेनस्ततोऽभवत् ।
देववानुपदेवश्च देवकस्य सुताः स्मृताः ॥ ३० ॥
तेषां स्वसारः सप्तासन् वसुदेवाय ता ददौ ।
देवकी शृतदेवी च शान्तिदेवी यशोधरा ॥ ३१ ॥
श्रीदेवी सत्यदेवी च सुरापी चेति सप्तमी ।
नवोग्रसेनस्य सुताः कंसस्तेषाञ्च पूर्वजः ॥ ३२ ॥
न्यग्रोधश्च सुनामा च कङ्कः शङ्कुश्च भूमिपः ।
सुतनूराष्ट्रपालश्च युद्धमुष्टिः सुमुष्टिकः ॥ ३३ ॥
भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः ।
राजाधिदेवः शूरश्च विदूरथसुतोऽभवत् ॥ ३४ ॥
राजाधिदेवपुत्रौ द्वौ शोणाश्वः श्वेतवाहनः ।
शोणाश्वस्य सुताः पञ्च शमी शत्रुजिदादयः(३) ॥ ३५ ॥
शमीपुत्रः प्रतिक्षेत्रः प्रतिक्षेत्रस्य भोजकः ।
भोजस्य हृदिकः पुत्रो हृदिकस्य दशात्मजाः ॥ ३६ ॥
कृतवर्म्मा शतधन्वा देवार्हो भीषणादयः ।

---

१ कुकुरो भजमानश्चेति क० । शुम्भनो भजमानश्चेति ज० ।
२ कुकुरस्येति क० ।
३ अक्रूरजिदादय इति च० ।

देवार्हात् कम्बलबर्हिरसमौजास्ततोऽभवत् ॥ ३७ ॥
सुदंष्ट्रश्च सुवासश्च धृष्टोऽभूदसमौजसः।
गान्धारी चैव माद्री च धृष्टभार्य्यौ बभूवतुः ॥ ३८ ॥
सुमित्रोऽभूच्च गान्धार्य्यां माद्री जज्ञे युधाजितम्(१)।
अनमित्रः शिनिर्धृष्णास्ततो वै देवमीढुषः ॥ ३९ ॥
अनमित्रसुतो निघ्नो निघ्नस्यापि प्रसेनकः।
सत्राजितः प्रसेनोऽथ मणिं सूर्य्यात्स्यमन्तकम् ॥ ४० ॥
प्राप्यारण्ये चरन्तन्तु सिंहो हत्वाऽग्रहीन्मणिं।
हतो जाम्बवता सिंहो जाम्बवान् हरिणा जितः ॥ ४१ ॥
तस्मान्मणिं जाम्बवतीं प्राप्यागाद्द्वारकां पुरीम्।
सत्राजिताय प्रददौ शतधन्वा जघान तम् ॥ ४२ ॥
हत्वा शतधनुं कृष्णो मणिमादाय कीर्त्तिभाक्।
बलयादवमुख्याग्रे अक्रूरान्मणिमर्पयेत् ॥ ४३ ॥
मिथ्याभिशस्तिं कृष्णस्य त्यक्त्वा स्वर्गी च सम्पठन्।
सत्राजितो भङ्गकारः सत्यभामा हरेः प्रिया ॥ ४४ ॥
अनमित्राच्छिनिर्जज्ञे सत्यकस्तु शिनेः सुतः।
सत्यकात्सात्यकिर्जज्ञे युयुधानाद्धुनिर्ह्यभूत् ॥ ४५ ॥
धुनेर्युगन्धरः पुत्रः स्वाह्नोऽभूत्(२) स युधाजितः।
ऋषभश्चेत्रकौ तस्य ह्यृषभाच्च स्वफल्कतः ॥ ४६ ॥
स्वफल्कपुत्रो ह्यक्रूरो अक्रूराच्च सुधन्वकः।
शूरात्तु वसुदेवाद्याः पृथा पाण्डोः प्रियाऽभवत् ॥ ४७ ॥

---

१ सुधाजितमिति ख०, ङ० च।

२ स्वाह्नोऽभूदिति ख०, ङ० च। स्वाह्नेऽभूदिति ज०।

धर्म्मात्युधिष्ठिरः पाण्डोर्वायोः कुन्त्यां वृकोदरः ।
इन्द्राद्धनञ्जयो माद्र्यां नकुलः सहदेवकः ॥ ४८ ॥
वसुदेवाच्च रोहिण्यां रामः सारणदुर्गमौ ।
वसुदेवाच्च देवक्यामादौ जातः सुषेनकः ॥ ४९ ॥
कीर्त्तिमान् भद्रसेनश्च जारुध्यो विष्णुदासकः ।
भद्रदेहः कंश्च एतान् षड्गर्भान्निजघान ह ॥ ५० ॥
ततो बलस्ततः कृष्णः सुभद्रा भद्रभाषिणी ।
चारुदेष्णश्च साम्बाद्याः कृष्णाज्जाम्बवतीसुताः ॥ ५१ ॥

इत्याग्नेये महापुराणे यदुवंशवर्णनं नाम चतुःसप्तत्यधिक-द्विशततमोऽध्यायः ।

अथ पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ।

—0*0—

द्वादशसङ्ग्रामाः ।

अग्निरुवाच । कश्यपो वसुदेवोऽभूदेवकी चादितिर्व्वरा ।
देवक्यां वसुदेवात्तु कृष्णोऽभूत्तपसान्वितः ॥ १ ॥
धर्म्मसंरक्षणार्थाय ह्यधर्म्महरणाय च ।
सुरादेः पालनार्थञ्च दैत्यादेर्व्वधनाय च ॥ २ ॥
रुक्मिणी सत्यभामा च सत्या नग्नजिती प्रिया ।
सत्यभामा हरेः सेव्या गान्धारी लक्ष्मणा तथा ॥ ३ ॥
मित्रविन्दा(१) च कालिन्दी देवी जाम्बवती तथा ।
सुशीला च तथा माद्री कौशल्या विजया जया ॥ ४ ॥

१ मित्रविन्देति क०, ङ० च ।

एवमादीनि देवीनां सहस्राणि तु षोड़श ।
प्रद्युम्नाद्याय रुक्मिण्यां भीमाद्याः सत्यभामया ॥ ५ ॥
जाम्बवत्याश्च शाम्बाद्याः कृष्णस्यासंस्तथापरे ।
शतं शतसहस्राणां पुत्राणां तस्य धीमतः ॥ ६ ॥
अशीतिश्च सहस्राणि यादवाः कृष्णरक्षिताः ।
प्रद्युम्नस्य तु वैदर्भ्यामनिरुद्धो रणप्रियः ॥ ७ ॥
अनिरुद्धस्य वज्राद्या यादवाः सुमहाबलाः ।
तिस्रः कोट्यो यादवानां षष्टिर्लक्षाणि दानवाः ॥ ८ ॥
मनुष्ये बाधका ये तु तन्नाशाय बभूव सः ।
कर्त्तुं कर्मव्यवस्थानं मनुष्यो जायते हरिः ॥ ९ ॥
देवासुराणां सङ्ग्रामा दायार्थं द्वादशाभवन् ।
प्रथमो नारसिंहस्तु द्वितीयो वामनो रणः ॥ १० ॥
सङ्ग्रामस्त्वथ वाराहश्चतुर्थोऽमृतमन्थनः ।
तारकामयसङ्ग्रामः षष्ठो ह्याजीवको रणः ॥ ११ ॥
त्रैपुरश्चान्धकवधो नवमो द्रुमघातकः ।
जितो हालाहलश्चाथ घोरः कोलाहलो रणः ॥ १२ ॥
हिरण्यकशिपोश्चोरो विदार्य्य च नखैः पुरा ।
नारसिंहो देवपालः प्रह्लादं कृतवान् नृपम् ॥ १३ ॥
देवासुरे वामनश्च छलित्वा बलिमूर्ज्जितम् ।
महेन्द्राय ददौ राज्यं काश्यपोऽदितिसम्भवः ॥ १४ ॥
वराहस्तु हिरण्याक्षं हत्वा देवानपालयत् ।
उज्जहार भुवं मग्नां देवदेवैरभिष्टुतः ॥ १५ ॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।

सुरासुरैश्च मथितं(१) देवेभ्यश्चामृतं ददौ ॥ १६ ॥
तारकामयसङ्ग्रामे तदा देवाश्च पालिताः।
निवार्य्येन्द्रं गुरून् देवान् दानवान्सोमवंशकृत् ॥ १७ ॥
विश्वामित्रवशिष्ठाचिकवयश्च रणे सुरान्।
अपालयन्ते निर्वार्य्य रागद्वेषादिदानवान् ॥ १८ ॥
पृथ्वीरथे ब्रह्मयन्तुरीशस्य शरणे हरिः।
ददाह त्रिपुरं देवपालको दैत्यमर्दनः ॥ १९ ॥
गौरीं जिह्मीर्षुणा रुद्रमन्धकेनार्दितं हरिः।
अनुरक्तश्च रेवत्यां चक्रे चान्धासुरार्दनम् ॥ २० ॥
अपां फेनमयो भूत्वा देवासुररणे हरन्(२)।
हत्वा देवहरं विष्णुर्देवधर्म्मानपालयत् ॥ २१ ॥
ग्राह्यादीन् दानवान् जित्वा हरिः परशुरामकः।
अपालयत् सुरादींश्च दुष्टत्वं निहत्य च ॥ २२ ॥
हालाहलं विषं दैत्यं निराकृत्य महेश्वरात्।
भयं निर्णाशयामास देवानां मधुसूदनः ॥ २३ ॥
देवासुरे रणे यश्च दैत्यः कोलाहलो जितः।
पालिताश्च सुराः सर्व्वे विष्णुना धर्म्मपालनात् ॥ २४ ॥
राजानो राजपुत्राश्च मुनयो देवता हरिः।
यदुक्तं यच्च नैवोक्तमवतारा हरेरिमे ॥ २५ ॥

इत्याग्नेये महापुराणे द्वादशसङ्ग्रामा नाम पञ्चसप्तत्यधिक-द्विशततमोऽध्यायः।

---

१ सुरासुरैरमन्यन्तेति क०, ङ० च०।
२ देवासुरहरोऽभवदिति क०, ङ०, ञ०, ट० च०।

अथ षट्सप्तत्यधिकद्विशततमोऽध्यायः।

———000———

राजवंशवर्णनं।

अग्निरुवाच। तुर्व्वसोश्च सुतो वर्गो गोभानुस्तस्य चात्मजः(१)।
गोभानोरासीत्(२) त्रैयानिस्त्रैशानेस्तु करन्धमः॥ १॥
करन्धमान्मरुत्तोभूद्दुष्मन्तस्तस्य चात्मजः।
दुष्मन्तस्य वरूथोऽ भूद्गाण्डीरस्तु वरूथतः॥ २॥
गाण्डीराच्चैव गान्धारः पञ्च जानपदास्ततः।
गान्धाराः केरलाश्चोलाः पाण्ड्याःकोला(३)महाबलाः॥३॥
दुष्मन्तस्तु वभ्रुसेतुश्च वभ्रुसेतोः पुरोवसुः।
ततो गान्धारा गान्धारैर्धर्म्मो धर्म्माद् घृतोऽभवत्॥ ४॥
घृतात्तु विदुषस्तस्मात् प्रचेतास्तस्य वै शतम्।
आनद्रुह्य सभानरश्चाक्षुषः परमेषुकः॥ ५॥
सभानरात् कालानलः कालानलजसृञ्जयः।
पुरञ्जयः सृञ्जयस्य तत्पुत्रो जनमेजयः॥ ६॥
तत्पुत्रस्तु महाशालस्तत्पुत्रोऽभून्महामनाः।
तस्मादुशीनरो ब्रह्मन्नृगायान्तु नृगस्ततः॥ ७॥
नरायान्तु नरस्वासीत् कृमिस्तु कृमितः सुतः।

---

१ गोभानुस्तस्य चात्मज इति ङ०।
२ गोभानोरासीदिति ङ०।
३ कर्णा इति अ०, ङ० च०।

दृशायां सुव्रतो जज्ञे दृषद्वत्यां शिविस्तथा ॥ ८ ॥
शिवेः पुत्रास्तु चत्वारः पृथुदर्भश्च वीरकः ।
कैकेयो भद्रकस्तेषां नाम्ना जनपदाः शुभाः ॥ ९ ॥
तितिक्षुरुशीनरजस्तितिक्षोश्च रुषद्रथः ।
रुषद्रथाद्भूत्पैलः पैलाच्च सुतपाः सुतः ॥ १० ॥
महायोगी बलिस्तस्मादङ्गो वङ्गश्च मुख्यकः ।
पुण्ड्रः कलिङ्गो बालेयो बलिर्योगी बलान्वितः ॥ ११ ॥
अङ्गाद्दधिवाहनोऽभूत्(१) तस्माद्दिविरथो नृपः ।
दिविरथाद्धर्मरथस्तस्य चित्ररथः सुतः ॥ १२ ॥
चित्ररथात्सत्यरथो लोमपादश्च तत्सुतः ।
लोमपादाच्चतुरङ्गः पृथुलाक्षश्च तत्सुतः ॥ १३ ॥
पृथुलाक्षाच्च चम्पोऽभूच्चम्पाद्धर्यङ्गकोऽभवत् ।
हर्यङ्गाच्च भद्ररथो बृहत्कर्म्मा च तत्सुतः ॥ १४ ॥
तस्माद्बभूवुर्बृहद्भानुर्बृहद्भानोर्बृहन्मनाः ।
तस्माज्जयद्रथो ह्यामोज्जयद्रथाद्बृहद्रथः ॥ १५ ॥
बृहद्रथाद्विश्वजिच्च कर्णो विश्वजितोऽभवत् ।
कर्णस्य वृषसेनस्तु पृथुसेनस्तदात्मजः ।
एतेऽङ्गवंशजा भूपाः पूरोर्वंशं निबोध मे ॥ १६ ॥

इत्याग्नेये महापुराणे राजवंशवर्णनं नाम षट्सप्तत्यधिक-द्विशततमोऽध्यायः ।

---

१ दधिवाहनोभूदिति च०, ब०, ज० च० ।

अथ सप्तसप्तत्यधिकद्विशततमोऽध्यायः ।

———000———

पुरुवंशवर्णनं ।

अग्निरुवाच । पुरोर्जनमेजयोऽभूत्प्राचीन्वन्तस्तु तत्सुतः ।
प्राचीन्वान्मनस्युस्तु तस्माद्दीतमयो नृपः ॥ १ ॥
शन्युर्वीतमयाच्चा ऽभूच्छन्योर्बहुविधः(१) सुतः ।
बहुविधाच्च संयातिरहोवादी च तत्सुतः ॥ २ ॥
तस्य पुत्रोऽथ भद्राश्वो भद्राश्वस्य दशात्मजाः ।
ऋचेयुश्च कृषेयुश्च सन्नतेयुस्तथात्मजः ॥ ३ ॥
घृतेयुश्च चितेयुश्च स्थण्डिलेयुश्च सत्तमः ।
धर्म्मेयुः सन्नतेयुश्च कृचेयुर्म्मतिनारकः ॥ ४ ॥
तंसुरोधः प्रतिरथः पुरस्तो मतिनारजाः ।
आसीत्प्रतिरथात्कण्वः कण्वान्मेधातिथिस्त्वभूत् ॥ ५ ॥
तंसुरोधाश्च चत्वारो दुष्मन्तोऽथ प्रवीरकः ।
सुमन्तश्चानयो वीरो दुष्मन्ताद्भरतोऽभवत् ॥ ६ ॥
यक्ष्मुन्तलायान्तु बली यस्य नाम्ना तु भारताः ।
सुतेषु मातृकोपेन नष्टेषु भरतस्य च ॥ ७ ॥
ततो मरुद्भिरानीय पुत्रः स तु बृहस्पतेः ।
संक्रामितो भरद्वाजः क्रतुभिर्व्वितथोऽभवत् ॥ ८ ॥
स चापि वितथः पुत्रान् जनयामास पञ्च वै ।

---

१ शन्युर्वीतमयाच्चाभूच्छन्योर्बहुविध इति क०, ज० च० ।

सुहोत्रस्य सुहोतारङ्गयङ्गर्भन्तथैव च ॥ ८ ॥
कपिलस्य महात्मानं सुकेतुञ्च सुतद्वयम् ।
कोशिकञ्च गृत्सपतिं तथा गृत्सपतेः सुताः ॥ १० ॥
ब्राह्मणाः क्षत्रिया वैश्याः काशे दीर्घतमाः(१) सुताः ।
ततो धन्वन्तरिर्यामीत्तत्सुतोऽभूच्च केतुमान् ॥ ११ ॥
केतुमतो हेमरथो दिवोदास इतिश्रुतः ।
प्रतर्दनो दिवोदासाद्भर्गवत्वो प्रतर्दनात् ॥ १२ ॥
वत्सादनर्क्ष आमीत्त अनर्क्षात् क्षेमकोऽभवत् ।
क्षेमकादृषिकेतुश्च वर्षकेतोऽर्विभुः स्मृतः(२) ॥ १३ ॥
विभोरानर्त्तः पुत्रोऽभूद्विभोश्च सुकुमारकः ।
सुकुमारात्सत्यकेतुर्वत्सभूमिस्तु वत्सकात् ॥ १४ ॥
सहोत्रस्य बृहत्पुत्रो बृहतस्तनयास्त्रयः ।
अजमीढो द्विमीढश्च पुरुमीढश्च वीर्य्यवान् ॥ १५ ॥
अजमीढस्य केशिन्यां जह्ने जह्नुः प्रतापवान्(३) ।
जह्नोरभूदजकाख्यो बलाकाख्यस्तदात्मजः ॥ १६ ॥
बलाकाख्यस्य कुशिकः कुशिकात् गाधिरिन्द्रकः ।
गाधेः सत्यवती कन्या विश्वामित्रः सूनोत्तमः ॥ १७ ॥
देवरातः कतिमुखा विश्वामित्रस्य ते सुताः ।
पुनःश्चैफोऽष्टकश्चान्यो ह्यजमीढात् सुतोऽभवत् ॥ १८ ॥
नीलिन्यां शान्तिरपरः पुरुजातिः सुशान्तितः ।

---

१ काशदीर्घतमा इति ज० ।
२ सुत इति ख०, ङ०, ज० च ।
३ प्रभावानिति ख० ।

पुरुजातेस्तु वाह्याश्वो वाह्याश्वात् पञ्च पार्थिवाः ॥ १९ ॥
मुकुलः सृञ्जयश्चैव राजा बृहदिषुस्तथा ।
यवीनरश्च(१) कृमिलः पाञ्चाला इति विश्रुताः ॥ २० ॥
मुकुलस्य तु मौकुल्याः क्षेत्रोपेता द्विजातयः ।
चक्षाश्वो मुकुलाज्जज्ञे चक्षाश्वान्मिथुनं ह्यभूत् ॥ २१ ॥
दिवोदासो बृहल्या च अहल्यायां शरद्वतात् ।
शतानन्दः शतानन्दात् सत्यधृन्मिथुनन्ततः ॥ २२ ॥
कृपः कृपी दिवोदासान्नैत्रेयः सोमपस्ततः ।
सृञ्जयात् पञ्चधनुषः सोमदत्तश्च तत्सुतः ॥ २३ ॥
सहदेवः सोमदत्तात् सहदेवात्तु सोमकः ।
आसीच्च सोमकाज्जन्तुर्ज्जन्तोश्च पृषतः सुतः ॥ २४ ॥
पृषताद्द्रुपदस्तस्माद्दृष्टद्युम्नोऽथ तत्सुतः ।
धृष्टकेतुश्च धूमिन्यामृक्षोऽभूदजमीढतः ॥ २५ ॥
ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्ततः ।
यः प्रयागादपाक्रम्य कुरुक्षेत्रञ्चकार ह ॥ २६ ॥
कुरोः सुधन्वा सुधनुःपरिक्षिच्चारिमेजयः ।
सुधन्वनः सुहोत्रोऽभूत् सुहोत्राच्चयवनो ह्यभूत् ॥ २७ ॥
वशिष्ठपरिचाराभ्यां समासन् गिरिकासुताः ।
बृहद्रथः कुशाग्रो वीरो यदुः प्रत्यग्रहो बलः ॥ २८ ॥
मत्स्यकाली कुशाग्रोऽतो ह्यासीद्राज्ञो बृहद्रथात् ।
कुशाग्राद्वृषभो जज्ञे तस्य सत्यहितः सुतः ॥ २९ ॥
सुधन्वा तत्सुतयोर्ज्ज जर्ज्जादासीच्च सम्भवः ।

---

१ यवीनवश्चेति ख०, घ०, ङ० च ।

सम्भवाच्च जरासन्धः सहदेवश्च तत्सुतः ॥ ३० ॥
सहदेवादुदापिश्च उदापेः श्रुतकर्मकः ।
परिक्षितस्य दायादो धार्मिको जनमेजयः ॥ ३१ ॥
जनमेजयात्तमदस्युर्जह्नीस्तु सुरथः सुतः ।
श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः ॥ ३२ ॥
जनमेजयस्य पुत्रौ तु सुरथो महिमांस्तथा ।
सुरथाद्विदूरथोऽभूद्दृढश्च आसीद्विदूरथात् ॥ ३३ ॥
कृतस्य तु द्वितीयस्य भीमसेनोऽभवत् सुतः ।
प्रतीपो भीमसेनात्तु प्रतीपस्य तु शान्तनुः ॥ ३४ ॥
देवापिर्व्वाह्लिकश्चैव सोमदत्तस्तु शान्तनोः ।
वाह्लिकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवाः शलः ॥ ३५ ॥
गङ्गायां शान्तनोर्भीष्मः काल्यायां विचित्रवीर्य्यकः ।
कृष्णद्वैपायनश्चैव क्षेत्रे वैचित्रवीर्य्यके ॥ ३६ ॥
धृतराष्ट्रश्च पाण्डुश्च विदुरश्चाप्यजीजनत् ।
पाण्डोर्युधिष्ठिरः कुन्त्यां भीमश्चैवार्जुनस्त्रयः ॥ ३७ ॥
नकुलः सहदेवश्च पाण्डोर्माद्र्यान्तु देवतः ।
अर्जुनस्य च सौभद्रः परिक्षिदभिमन्यतः ॥ ३८ ॥
द्रौपद्यां पाण्डवानान्तु प्रिया तस्यां युधिष्ठिरात् ।
प्रतिविन्ध्यो भीमसेनाच्छ्रुतकीर्त्तिर्जनस्त्रयात्(१) ॥ ३९ ॥
सहदेवाच्छ्रुतकर्म्मा शतानीकस्तु नाकुलिः ।
भीमसेनाद्धिडिम्बायामन्धं आसीद् घटोत्कचः ॥ ४० ॥
एते भूता भविष्याश्च नृपाः संख्या न विद्यते ।

---

१ क्वचित् पाठः पतितः जनस्त्रयात् क उत्पन्न इति विशेषाप्राप्तेः ।

गताः कालेन कालो हि हरिस्तं पूजयेद्द्विज।
होममग्नौसमुद्दिश्य कुरु सर्व्वप्रदं यतः॥ ४१॥

इत्याग्नेये महापुराणे पुरुवंशवर्णनं नाम सप्तसप्तत्यधिक-द्विशततमोऽध्यायः॥

अथाष्टसप्तत्यधिकद्विशततमोऽध्यायः।

सिद्धौषधानि।

अग्निरुवाच। आयुर्वेदं प्रवक्ष्यामि सुश्रुताय यमब्रवीत्।
देवो धन्वन्तरिः सारं मृतसञ्जीवनीकरं॥ १॥
सुश्रुत उवाच। आयुर्वेदं मम ब्रूहि नराम्बिभरगर्दनम्।
सिद्धयोगान्सिद्धमन्त्रान्मृतसञ्जीवनीकरान्॥ २॥
धन्वन्तरिरुवाच। रक्तन् बलं हि ज्वरितं लङ्घितं भोजयेद्विषक्।
सविश्वं लाजमण्डन्तु तड्ज्वरान्तं मृतं जलम्॥ ३॥
मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः।
षड्हे च व्यतिक्रान्ते तिक्तकं पाययेद्ध्रुवम्॥ ४॥
क्लेदयेत्तत्कफदोषन्तु(१) ततस्तञ्च विरेचयेत्।
जीर्णाः षष्टिकशालिप्रमोदकाः॥ ५॥
तद्विधास्ते ज्वरेष्विष्टा रुक्षानां विकृतिस्तथा।
मुद्गा मसूराश्चणकाः कुलत्थाश्च सकुष्ठकाः॥ ६॥

---

(१) पक्वदोषमिति अ०।

आटर्ष्यो नारकाद्याश्च कर्कोटककटोल्वकम् ।
पटोलं सफलं निम्बं पर्पटं दाडिमं ज्वरे ॥ ७ ॥
अधोगे वमनं शस्तमूर्ध्वगे च विरेचनम् ।
रक्तपित्ते तथा पानं षडङ्गं शुण्ठिवर्जितम् ॥ ८ ॥
शालुगोधूमलाजाश्च यवगालिमसूरकाः ।
सकुष्ठचणका मुद्गा भक्ष्या गोधूमका हिताः ॥ ९ ॥
साधिता घृतदुग्धाभ्यां क्षौद्रं क्षपरमो मधु ।
अतीसारे पुराणानां शालीनां भक्षणं हितम् ॥ १० ॥
अनभिष्यन्दि यच्चान्नं लोध्रवल्कलसंयुतम् ।
मारुतं वर्जयेद् यत्नः कार्य्यो गुल्मेषु सर्वथा ॥ ११ ॥
वाटं क्षौरेण चाश्नीयाद्दास्तूकं घृतसाधितं ।
गोधूमशालयस्तिक्ता हिता जठरिणामथ ॥ १२ ॥
गोधूमशालयो मुद्गा ब्रह्मदर्भखदिरोऽभया ।
पञ्चकोलश्चाङ्गेरी च निम्बवार्ताः पटोलिकाः ॥ १३ ॥
मातुलुङ्गरसाजातिशुष्कमूलकसैन्धवाः ।
कुष्ठिनाश्च तथा शस्तं पानार्थं खदिरोदकं ॥ १४ ॥
मसूरमुद्गौ पेयार्थं भोज्या जीर्णाश्च शालयः ।
निम्बपर्पटकैः शाकैर्भार्ङ्गीनां तथा रसः ॥ १५ ॥
विडङ्गं मरिचं मुस्तं कुष्ठं लोध्रं सुवर्चिका ।
मनःशिला च वालेयः कुष्ठघ्ना मूत्रपेषिताः ॥ १६ ॥
अपूपकुष्ठकुल्माषयवान्ना मेहिनां हिताः ।
यवान्नविकृतिर्मुद्गा कुलत्था जीर्णशालयः ॥ १७ ॥
तिक्तरूक्षाणि शाकानि तिक्तानि हरितानि च

तैलानि तिलगव्युकविभीतकेङ्गुदानि च ॥ १८ ॥
मुद्गाः सयवगोधूमा धान्यं वर्षस्थितञ्च यत्।
जाङ्गलस्य रसः शस्तो भोजने राजयक्ष्मिणां ॥ १९ ॥
कौलत्थमौद्गको राज्ञाशुष्कमूलकजाङ्गलैः।
यूषैर्वा विकिरैः सिद्धैर्दधिदाड़िमसाधितैः ॥ २० ॥
मातुलङ्गरसच्चौद्द्राक्षाव्योषादिसंस्कृतैः।
यवगोधूमशाल्यन्नैर्भोजयेच्छ्वासकासिनं ॥ २१ ॥
दशमूलबलाराज्ञाकुलत्थैरुपसाधिताः।
पेयाः पूपरसाः क्वाथाः श्वासहिक्कानिवारणाः ॥ २२ ॥
शुष्कमूलककौलत्थमूलजाङ्गलजैरसैः।
यवगोधूमशाल्यन्नं जीर्णं सोग्रीरमाचरेत् ॥ २३ ॥
सोषवान् सगुड़ां पथ्यां खादेद्वा गुड़नागरम्।
तक्रञ्च चित्रकश्चोभौ ग्रहणीरोगनाशनौ ॥ २४ ॥
पुराणयवगोधूमशालयो जाङ्गलो रसः।
मुद्गामलकखर्जूरमृद्वीकावदराणि च ॥ २५ ॥
मधु सर्पिः पयः शक्रं निम्बपर्पटको वृषम्।
तक्रारिष्टाश्च(१) शस्यन्ते मततं वातरोगिणाम् ॥ २६ ॥
क्षुद्रोगिणो विरेक्यास्तु पिप्पल्यो हिक्किनां हिताः।
तक्रावलालसिन्धूनि मुक्तानि गिरिराभ्रसा ॥ २७ ॥
मुक्ताः सौवर्चलाजादि मद्यं शस्तं मदात्यये(२)।
सचौद्रपयसा लाक्षां पिबेच्च क्षतवान्वरः ॥ २८ ॥

---

१ भद्राविल्वाश्चेति ख०।

२ सदामये इति ज०। दमात्यये इति ट०।

त्रयं मांसरसाहारी वह्निसंरक्षणाज्जयेत् ।
शालयो भोजने रक्ता नीवारकलमादयः ॥ २८ ॥
यवान्नविकृतिर्मांसं शाकं सौवर्चलं शटी ।
पथ्या तथैवार्शसां यन्मण्डं तक्रञ्च वारिणा(१) ॥ ३० ॥
मुस्ताभ्यासस्तथा लेपश्चित्रकेण हरिद्रया ।
यवान्नविकृतिः शालिर्व्वास्तूकं ससुवर्चलम् ॥ ३१ ॥
चणपत्रगोधूमाः क्षीरेक्षुघृतसंयुताः ।
मूत्रकृच्छ्रे च शस्ताः स्युः पाने मण्डसुरादयः ॥ ३२ ॥
लाजाः शक्तुस्तथा क्षौद्रं शूल्यं मांसं परूषकम् ।
वार्त्ताकुलावशिखिनस्तर्द्दिघ्नाः पानकानि च ॥ ३३ ॥
शाल्यन्नलोपयसी केवलोष्णे घृतेऽपि वा ।
तृष्णाघ्ने मुस्तगुडयोर्गुटिका वा मुखे धृता ॥ ३४ ॥
यवान्नविकृतिः पूपं(२) शुष्कमूलकजन्तथा ।
शाकं पटोलवेत्राग्रमरुन्मत्स्यविनाशनम् ॥ ३५ ॥
मुद्गाढ़कमसूराणां सतिलैर्जाङ्गलैरसैः ।
ससैन्धवघृतद्राक्षाशृङ्गवामलकौकसैः ॥ ३६ ॥
यूषैः पुराणगोधूमयवशाल्यन्नमभ्यसेत् ।
विसर्पी समिताक्षौद्रमृद्वीकादाड़िमोदकम् ॥ ३७ ॥
रक्तयष्टिकगोधूमयवमुद्गादिकं लघु ।
काकमारी च वेत्राग्रं वास्तुकञ्च सुवर्चला ॥ ३८ ॥
वातशोणितनाशाय तोयं शस्तं मितं मधु ।

---

१ पथ्या तथैव काश्यस्य मण्डं तक्रञ्च वारुणमिति ख०, ग० घ ।
२ दूषमिति ख०, ग० घ ।

नागारोगेषु च हितं घृतं दुर्व्वाप्रसाधितम् ॥ ३९ ॥
भृङ्गराजरसे सिद्धं तैलं धात्रीरसेऽपि वा।
नश्यं सर्व्वामयेष्विष्टं मूर्द्धजन्तूद्भवेषु च ॥ ४० ॥
शीततोयान्नपानञ्च तिलानां विप्र भक्षणम्।
द्विजदार्ढ्यकरं प्रोक्तं तथा तुष्टिकरम्परम् ॥ ४१ ॥
गण्डूषं तिलतैलेन द्विजदार्ढ्यकरं परं।
विड्भङ्गचूर्णं गोमूत्रं सर्व्वत्र क्रिमिनाशने ॥ ४२ ॥
धात्रीफलान्नपाज्यञ्च शिरोलेपनमुत्तमम्।
शिरोरोगविनाशाय स्निग्धमुष्णञ्च भोजनम् ॥ ४३ ॥
तैलं वा वस्तमूत्रञ्च कर्णपूरणमुत्तमम्।
कर्णशूलविनाशाय सर्वशुक्तानि(१) वा द्विज ॥ ४४ ॥
गिरिमृच्चन्दनं लाक्षा मालती कलिका तथा।
संयोज्या या लता वर्त्तिः क्षतशुक्रहरी तु सा ॥ ४५ ॥
व्योषं त्रिफलया युक्तं तुच्छकञ्च तथा जलम्।
सर्वाक्षिरोगशमनं तथा चैव रसाञ्जनं ॥ ४६ ॥
आज्यभृष्टं शिलापिष्टं लोध्रकाञ्जिकसैन्धवैः।
आस्रगोतनाविनाशाय सर्वनेत्रामये हितम् ॥ ४७ ॥
गिरिमृच्चन्दनैर्लेपो वह्निर्नेत्रस्य शस्यते।
नेत्रामयविघातार्थं त्रिफलां शीलयेत् सदा ॥ ४८ ॥
रात्रौ तु मधुसर्पिर्भ्यां दीर्घमायुर्जिजीविषुः।
शतावरीरसे सिद्धो हृद्यो क्षीरघृतो मृतौ ॥ ४९ ॥
कलम्बिकानि माषाश्च हृद्यौ क्षीरघृतौ तथा।

---

१ सर्व्वशुक्लानीति क०।

आयुष्या त्रिफला श्रेया पूर्ववन्मधुकान्विता ॥ ५० ॥
मधुकादिरसोपेता बलीपलितनाशिनी ।
वचामिश्रघृतं विप्र भूतदोषविनाशनम् ॥ ५१ ॥
कव्यं बुद्धिप्रदश्चैव(१) तथा सर्वार्थसाधनम् ।
बलाकल्ककषायेण सिद्धमभ्यञ्जने हितम् ॥ ५२ ॥
राज्ञामहचरैर्वापि तैलं वातविकारिणाम् ।
अनभिष्यन्दि यच्चास्यं तद्व्रणेषु प्रशस्यते ॥ ५३ ॥
शङ्खपिण्डी तथैवाम्ला पाचनाय प्रशस्यते ।
पक्वस्य च तथा भेदे निम्बचूर्णञ्च रोपणे ॥ ५४ ॥
तथा शुच्युपचारस्य(२) बलिकर्म विशेषतः ।
स्तनिका च तथा रक्षा प्राणिनान्तु सदा हिता ॥ ५५ ॥
भक्षणं निम्बपत्राणां सर्पदष्टस्य भेषजम् ।
तालनिम्बदलक्षौद्र्यं जीर्णसैलं यवाधृतम् ॥ ५६ ॥
धूपो वृश्चिकदष्टस्य शिखिपत्रधृतेन वा ।
अर्कक्षीरेण संपिष्टं लोपा वीजं पलाशजं ॥ ५७ ॥
वृश्चिकार्त्तस्य लवणा वा शिवा च फलसंयुता(३) ।
अर्कक्षीरं तिलं तैलं पललञ्च गुडं समम् ॥ ५८ ॥
पानाज्जयति दुर्वारं विषं शीघ्रमेव तु ।
पीत्वा मूलं त्रिवृत्तुल्यं तण्डुलीयस्य सर्पिषा ॥ ५९ ॥
सर्पकीटविषाण्याशु जयत्युत्तिष्ठलान्यपि ।
चन्दनं पद्मकङ्कुष्ठं लताम्बूशीरपाटलाः ॥ ६० ॥

---

१ कव्या बुद्धिप्रदश्चैवेति ख० । ३ फलसंयुतेति ज० ।
२ शुच्युपचारश्चेति ख० ।

निर्गुण्डी शारिवा मेलुर्लूताविषहरी गदः ।
गिरौ विरेचनं शस्तं गुडनागरकं द्विज ॥ ६१ ॥
स्नेहपाने तथा वस्तौ तैलं घृतमनुत्तमम् ।
स्वेदनीयः परो वह्निः शीताम्भःस्तम्भनं परम् ॥ ६२ ॥
छर्द्दि रेचने श्रेष्ठा वमने मदनं तथा ।
वस्तिर्विरेकी वमनं तैलं सर्पिस्तथा मधु ।
वातपित्तबलासानां क्रमेण परमौषधं ॥ ६३ ॥

इत्याग्नेये महापुराणे सिद्धौषधानि नामाष्टसप्तत्यधिक
द्विशततमोऽध्यायः ।

अथैकोनाशीत्यधिकद्विशततमोऽध्यायः ।

सर्वरोगहराण्यौषधानि ।

धन्वन्तरिरुवाच । शारीरमानसागन्तुसहजा व्याधयो मताः ।
शारीरा ज्वरकुष्ठाद्या क्रोधाद्या मानसा मताः ॥ १ ॥
आगन्तवो विषाद्यास्तथा सहजाः क्षुत्तरादयः ।
शारीरागन्तुनाशाय सूर्य्यवारे घृतं गुडम् ॥ २ ॥
लवणं सह्निरण्यञ्च विप्रायापूपमर्पयेत् ।
चन्द्रे चाभ्यङ्गदो विप्रे सर्वरोगैः प्रमुच्यते ॥ ३ ॥
तैलं शनैश्चरे दद्यादाश्विने गोरसान्नदः ।
घृतेन पयसा लिङ्गं संस्नाप्य स्याद्गुणभुक्तः ॥ ४ ॥

गायत्र्या भावयेद्भस्मौ दूर्व्वान्तिमधुराम्लुताम् ।
यस्मिन् भे व्याधिमाप्नोति तस्मिन् स्नानं बलिः शुभे ॥ ५ ॥
मानसानां रुजादीनां विष्णोः स्तोत्रं हरं भवेत् ।
वातपित्तकफा दोषा धातवश्च तथा शृणु ॥ ६ ॥
भुक्तं पक्वाशयादन्नं द्विधा याति च सुश्रुत ।
अग्निनैकेन किट्टत्वं रसताञ्चापरेण च ॥ ७ ॥
किट्टभागो मलस्तत्र विण्मूत्रस्वेददूषिकाः ।
नासामलङ्कर्णमलं तथा देहम[illegible]यत् ॥ ८ ॥
रसभागाद्रसस्तत्र समाच्छोणिततां व्रजेत् ।
मांसं रक्तात्ततो मेदो मेदसोऽस्थ्य भवत्ततः ॥ ९ ॥
अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भस्तयोजसः ।
देहमार्त्तिं बलं शक्तिं कालं प्रकृतिमेव च ॥ १० ॥
ज्ञात्वा चिकित्सितं कुर्य्याद्भेषजस्य तथा बलम् ।
तिथिं रिक्तान्त्यजेद् भौमं मन्दभान्दारुणाग्रकम् ॥ ११ ॥
हरिगोद्विजचन्द्रार्कसुरादीन् प्रतिपूज्य च ।
शृणु मन्त्रमिमं विद्वन् भेषजारम्भमाचरेत् ॥ १२ ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभृग्वत्र्यर्कोऽनिलानलाः ।
ऋषयश्चौषधिग्रामा भूतसङ्घाय पान्तु ते ॥ १३ ॥
रसायनमिवर्षीणां देवानाममृतं यथा ।
सुधेवोत्तमनागानां भेषज्यमिदमस्तु ते ॥ १४ ॥
वातश्लेष्मातको देशो बहुवृक्षो बहूदकः ।
अनूपदेशविख्यातो जाङ्गलस्तद्विवर्जितः ॥ १५ ॥
किञ्चिद्बहूदको देशस्तथा साधारणः स्मृतः ।

आर्द्रलः पित्तबहुलो मध्यः साधारणः स्मृतः ॥ १६ ॥
रूक्षः शीतबलो वायुः पित्तमुष्णं कटुत्रयम्।
स्थिरास्निग्धमधुरं बलाग्रञ्च प्रचक्षते ॥ १७ ॥
दृष्टिः समानैरेतेषां विपरीतैर्विपर्ययः।
रसाः स्वाद्वम्ललवणाः श्लेष्मला वायुनाशनाः ॥ १८ ॥
कटुतिक्तकषायाश्च वातलाः श्लेष्मनाशनाः।
कटुम्ललवणा ज्ञेयास्तथा पित्तविवर्द्धनाः ॥ १९ ॥
तिक्तस्वादुकषायाश्च तथा पित्तविनाशनाः।
रसस्यैतद्गुणं नास्ति विपाकस्यैतदिष्यते ॥ २० ॥
सौम्यौष्णाः कफवातघ्नाः शीताः पित्तविनाशनाः।
प्रभावतस्तथा कर्म्म ते कुर्वन्ति च सुश्रुत ॥ २१ ॥
गिरिरे च वसन्ते च निदाघे च तथा क्रमात्।
चयप्रकोपप्रशमाः कफस्य तु प्रकीर्त्तिताः ॥ २२ ॥
निदाघवर्षाशरदो च तथा शरदि सुश्रुत।
चयप्रकोपप्रशमाः पवनस्य प्रकीर्त्तिताः ॥ २३ ॥
मेघकाले च शरदि हेमन्ते च यथाक्रमात्।
चयप्रकोपप्रशमास्तथा पित्तस्य कीर्त्तिताः ॥ २४ ॥
वर्षादयो विसर्गास्तु हेमन्ताद्यास्तथा चयः।
गिरिराद्यास्तथादानं ग्रीष्मान्ता ऋतवस्त्रयः ॥ २५ ॥
सौम्यो विसर्गस्त्वादानमाग्नेयं परिकीर्त्तितम्।
वर्षादींस्त्रीन्नृतून् सौम्यरन् पर्य्यायशो रसान् ॥ २६ ॥
जनयत्यम्ललवणमधुरांस्त्रीन् यथाक्रमम्।
गिरिरादीन्नृतूनर्कश्चरन् पर्य्यायशो रसान् ॥ २७ ॥

विवर्द्धयेत्तथा तिक्तकषायकटुकान् क्रमात् ।
यथा रजन्यो वर्द्धन्ते बलमेकं हि वर्द्धते ॥ २८ ॥
क्रमशोऽथ मनुष्याणां क्षीयमानासु क्षीयते ।
रात्रिभुक्तदिनानाच्च वयसश्च तथैव च ॥ २९ ॥
आदिमध्यावसानेषु कफपित्तसमीरणाः ।
प्रकोपं यान्ति कोपादौ काले तेषाञ्चयः स्मृतः ॥ ३० ॥
प्रकोपोत्तरके काले शमस्तेषां प्रकीर्त्तितः ।
अतिभोजनतो विप्र तथा चाभोजनेन च ॥ ३१ ॥
रोगा हि मर्त्ये जायन्ते वेगोदीरणधारणैः ।
अन्नेन कुक्षेर्द्वावंशावेकं पानेन पूरयेत् ॥ ३२ ॥
आश्रयं पवनादीनां तथैकमवशेषयेत् ।
व्याधेर्विज्ञानमस्य तथा विपरीतमथौषधम् ॥ ३३ ॥
कर्त्तव्यमेतदेवात्र मया सारं प्रकीर्त्तितम् ।
नाभेरूर्द्धमधश्चैव गुदगोष्ठास्तथैव च ॥ ३४ ॥
श्लेष्मपित्तवातानां देहे स्थानं प्रकीर्त्तितं ।
तथापि सर्वगात्रेषु देहे वायुर्विशेषतः ॥ ३५ ॥
देहस्य मध्ये हृदयं स्थानं तस्यमनसः स्मृतम् ।
लघोऽस्यकेशगण्डौ बहुवाग्विषमानलः ॥ ३६ ॥
व्योमगश्च तथा स्वप्ने वातप्रकृतिरुच्यते ।
अकालपलितः क्रोधी प्रस्वेदी मधुरप्रियः ॥ ३७ ॥
स्वप्ने च दीप्तिमत्पक्षी पित्तप्रकृतिरुच्यते ।
दृढाङ्गः स्थिरचित्तश्च सुप्तभः स्निग्धमूर्द्धजः ॥ ३८ ॥
शुक्लाम्बुदर्शी स्वप्ने च कफप्रकृतिकौ नरः ।

तामसा राजसाश्चैव सात्विकाश्च तथा स्मृताः ॥ ३९ ॥
मनुष्या मुनिशार्दूल वातपित्तकफात्मकाः।
रक्तपित्तं व्यवायाच्च गुरुकर्म्मप्रवर्त्तनैः ॥ ४० ॥
कदन्नभोजनाद्वायुर्देहे शोकाच्च कुप्यति
विदाहिनां तथोल्कानामुष्णान्नाध्वनिसेविनां(१) ॥ ४१ ॥
पित्तं प्रकोपमायाति भयेन च तथा द्विज।
अत्यम्बुपानगुर्व्वन्नभोजिनां भुक्तशायिनाम् ॥ ४२ ॥
श्लेष्माप्रकोपमायाति तथा ये चालसा जनाः।
वातादीन्यानि रोगाणि ज्ञात्वा शास्त्राणि लक्षणैः॥ ४३ ॥
अस्थिभङ्गः कषायत्वमास्ये शुष्कास्यता तथा ।
जृम्भणं लोमहर्षश्च वातिकव्याधिलक्षणम् ॥ ४४ ॥
नखनेत्रगिरात्वन्तु पीतत्वं कटुता मुखे ।
तृष्णा दाहोष्णता चैव पित्तव्याधिनिदर्शनम् ॥ ४५ ॥
आलस्यञ्च प्रसेकश्च गुरुता मधुरास्यता ।
उष्णाभिलाषिता चेति श्लैष्मिकव्याधिलक्षणम् ॥ ४६ ॥
स्निग्धोष्णमन्नमभ्यङ्गस्तैलपानादि वातनुत् ।
आज्यं क्षीरं सिताद्यञ्च चन्द्ररश्म्यादि पित्तनुत् ॥ ४७ ॥
सक्षौद्रं त्रिफलातैलं व्यायामादि कफापहम् ।
सर्वरोगप्रशाम्त्यै स्याद्विष्णोर्ध्यानञ्च पूजनम् ॥ ४८ ॥

इत्याग्नेये महापुराणे सर्वरोगहराण्यौषधानि नामो-
नाशीत्यधिकद्विशततमोऽध्यायः।

---

(१) तथोल्कानामुष्णान्नाध्वसेविनामिति च।

अथाशीत्यधिकद्विशततमोऽध्यायः ॥

रसादिलक्षणं ।

धन्वन्तरिरुवाच । रसादिलक्षणं वक्ष्ये भेषजानां गुणं शृणु ।
रसवीर्य्यविपाकज्ञो नृपादोनुत्तयेद्वरः ॥ १ ॥
रसाः स्वादुम्ललवणाः सामजाः परिकीर्त्तिताः ।
कटुतिक्तकषायानि तथाग्नेया महाभुज ॥ २ ॥
त्रिधा विपाको द्रव्यस्य कटुम्ललवणात्मकः ।
द्विधा वीर्य्यं समुद्दिष्टमुष्णं शीतं तथैव च ॥ ३ ॥
अनिर्देश्यप्रभावस्य ओषधीनां द्विजोत्तम ।
मधुरस्य कषायस्य तिक्तस्यैव तथा रसः ॥ ४ ॥
शीतवीर्य्याः समुद्दिष्टाः शेषास्तूष्णाः प्रकीर्त्तिताः ।
गुडुची तच्च तिक्तापि भवत्युष्णातिवीर्यतः ॥ ५ ॥
उष्णा कषायापि तथा पथ्या भवति मानद ।
मधुरोपि तथा मांस उष्ण एव प्रकीर्त्तितः ॥ ॥ ६ ॥
लवणो मधुरश्चैव विपाकमधुरौ स्मृतौ ।
आम्लोष्णश्च तथा प्रोक्तः शेषाः कटुविपाकिनः ॥ ७ ॥
वीर्य्यपाके विपर्य्यस्ते प्रभावात्तच्च नित्यशः ।
मधुरोऽपि कटुः पाके यच्च चौद्रं(१) प्रकीर्त्तितं ॥ ८ ॥
क्वाथयेत् षोड्यगुणं पिबेद्द्रव्याच्चतुर्गुणम् ।

१ यच्चौद्रमिति च० ।

कल्पनैषा कषायस्य यत्र नोक्तो विधिर्भवेत् ॥ ९ ॥
कषायस्तु भवेत्तोयं स्नेहपाके चतुर्गुणं(१)।
द्रव्यतुल्यं समधृत्य द्रव्यं स्नेहं क्षिपेद्बुधः ॥ १० ॥
तावत्प्रमाणं द्रव्यस्य स्नेहपादं ततः क्षिपेत्।
तोयवर्ज्यन्तु यद्द्रव्यं स्नेहद्रव्यं तथा भवेत् ॥ ११ ॥
संवर्त्तितौषधः पाकः स्नेहानां परिकीर्त्तितः।
तत्तुल्यता तु लेह्यस्य तथा भवति सुश्रुत(२)॥ १२ ॥
कल्कमल्पौषधं क्वाथं कषायश्चोक्तवद्भवेत्।
अर्धं चूर्णस्य निर्दिष्टं कषायस्य चतुष्पलं ॥ १३ ॥
मध्यमैषा स्मृता मात्रा नास्ति मात्राविकल्पना।
वयः कालं बलं वह्निं देशं द्रव्यं रुजं तथा ॥ १४ ॥
समवेक्ष्य महाभाग मात्रायाः कल्पना भवेत्।
सौम्यास्तत्र रसाः प्रायो विज्ञेया धातुवर्द्धनाः ॥ १५ ॥
मधुरास्तु विशेषेण विज्ञेया धातुवर्द्धनाः।
दोषाणाञ्चैव धातूनां द्रव्यं समगुणन्तु यत् ॥ १६ ॥
तदेव हृदये ज्ञेयं विपरीतं क्षमावहम्।
उपस्तम्भत्रयं प्रोक्तं देहेऽस्मिन्मनुजोत्तम ॥ १७ ॥
आहारो मैथुनं निद्रा तेषु यत्नः सदा भवेत्।
असेवनात् सेवनाच्च अत्यन्तं नाशमाप्नुयात् ॥ १८ ॥
क्षयस्य बृंहणं कार्यं स्थूलदेहस्य कर्षणम्।
रक्षणं मध्यकायस्य देहभेदास्त्रयो मताः ॥ १९ ॥

---

१ स्नेहपाके च तद्वदिति ङ०।

२ तत्तुल्यताऽस्य तथा यथा भवति सुश्रुत इति ङ०।

उपक्रमत्रयं प्रोक्तं तर्पणं बाह्यतर्पणं ।
क्षिताग्नी च मिताग्नी च जीर्णाग्नी च तथा भवेत् ॥ २० ॥
औषधीनां पञ्चविधा तथा भवति कल्पना ।
रसः कल्कः सृतः शीतः फाण्टश्च मनुजोत्तम ॥ २१ ॥
रसश्च पीडको ज्ञेयः कल्क आलोडितादृ भवेत् ।
क्षिप्तश्च सृतो ज्ञेयः शीतः पर्युषितो निशां ॥ २२ ॥
मन्थोभिश्रुतपूतं यत् तत् फाण्टमभिधीयते ।
करणानां शतञ्चैव षष्टिश्चैवाधिका स्मृता ॥ २३ ॥
यो वेत्ति स भवेज्ज्ञेयः स्यात्सम्यग्वै वाहुशौण्डिकः ।
आहारशुद्धिरन्यर्थमग्निमूलं बलं नृणां ॥ २४ ॥
सर्पिस्तुतिफलाम्लाद्यात्सुराद्यं अभिवर्णदां ।
लाङ्गलञ्च रसं सिन्धुयुक्तं दधि पयःकणां ॥ २५ ॥
रसाधिकं समं कुर्य्यान्नरो वाताधिकोऽपि वा ।
निदाघे मर्दनं प्रोक्तं शिशिरे च समं वदृ ॥ २६ ॥
वसन्ते मध्यमं ज्ञेयविदाघे मर्दनोत्तमं ।
त्वचस्तु प्रथमं मर्दनमङ्गस्य तदनन्तरं ॥ २७ ॥
आयुरुधिरदेहेषु अस्थि भातीव मांसलं ।
स्नायौ वाङ्गे तथैवेह तथा जङ्घे मज्जानुगे ॥ २८ ॥
अरिवन्मर्दयेत् प्राज्ञो जघ वक्षस्य पूर्ववत् ।
अङ्गसन्धिषु सर्वेषु निष्पीड्य बहुलं तथा ॥ २९ ॥
प्रसारयेदङ्गसन्धीन्न च क्षेपेण चाक्रमात् ।
नाजीर्णे तु श्रमं कुर्य्यान्न भुक्ता पीतवारिः ॥ ३० ॥
दिनस्य तु चतुर्भागं कुर्य्यात्तु प्रहराईके ।

व्यायामं नैव कर्त्तव्यं स्नायाच्छीतेऽम्बुना सदा ॥ ३१ ॥
वार्य्युष्णञ्च श्रमं जह्याद्वृद्धा स्नानन्तु धारयेत् ।
व्यायामञ्च कफं हन्याद्दाहं हन्याच्च मर्दनम् ॥ ३२ ॥
स्नानं पित्ताधिकं हन्यात्तस्मान्ते घातपाः प्रियाः ।
आतपक्लेशकर्मादौ क्षेमव्यायामिनो नराः ॥ ३३ ॥

इत्याग्नेये महापुराणे रसादिलक्षणं नामाशीत्यधिकै-
द्विशततमोऽध्यायः ॥

अशैकाशीत्यधिकद्विशततमोऽध्यायः ।

———000———

वृक्षायुर्वेदः ।

धन्वन्तरिरुवाच । वृक्षायुर्वेदमाख्यास्ये वृक्षशास्त्रतः शुभः ।
प्राग्वटो याम्यतस्त्वाम्र आप्येऽश्वत्थः क्रमेण तु ॥ १ ॥
दक्षिणां दिशमुत्सृज्य समीपे कण्टकद्रुमाः ।
उद्यानं गृहवासे(१)स्यात् तिलान् वाप्यथ पुष्पितान् ॥ २ ॥
गङ्गोदाद्वीपयेद्वृक्षान् द्विजश्चन्द्रं प्रपूज्य च ।
ध्रुवादि पञ्च वायव्यं हस्तं प्राजेयवैष्णवं ॥ ३ ॥
नक्षत्राणि तथा मूलं ग्रसन्ते दूमरोपणे ।
प्रवेशयेन्नदीवाद्यान् पुष्करिण्यान्तु(२) कारयेत् ॥ ४ ॥

---

१ गृहवासे इति क० ।

२ पुष्करिण्यामिति पाठो न समीचीनः प्रतिभाति ।

हस्ता मघा तथा मैत्रमाद्यं पुष्यं सवासवं।
जलाशयसमारम्भे वारुणश्चोत्तराश्रयम् ॥ ५ ॥
संपूज्य वरुणं विष्णुं पर्जन्यं तत् समाचरेत्।
अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः ॥ ६ ॥
अशोकः कदली जम्बुस्तथा बकुलदाडिमाः।
सायं प्रातस्तु घर्मान्तौ शीतकाले दिनान्तरे ॥ ७ ॥
वर्षारात्रौ भुवः शोषे सेक्तव्या रोपिता द्रुमाः।
उत्तमं विंशतिर्हस्ता मध्यमं षोड्शान्तरम् ॥ ८ ॥
स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरं।
विफलाः स्युर्घना वृक्षाः शस्त्रेणादौ हि शोधनम् ॥ ९ ॥
विड्वराहतपङ्कान्नान् सेचयेच्छीतवारिणा।
फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः ॥ १० ॥
घृतशीतपयःसेकः फलपुष्पाय सर्वदा।
आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ॥ ११ ॥
गोमांसमुदकञ्चैव सप्तरात्रं निधापयेत्।
तत्सेकः सर्ववृक्षाणां फलपुष्पादिवर्द्धनः ॥ १२ ॥
मत्स्याश्मा तु सेकेन वृद्धिर्भवति शाखिनः।
विड्वराहतण्डुलोपेतं मत्स्यं मांसं हि दोहदं।
सर्वेषामविशेषेण वृक्षाणां रोगमर्दनम् ॥ १३ ॥

इत्याग्नेये महापुराणे वृक्षायुर्वेदो नामैकाशीत्यधिक-
द्विशततमोऽध्यायः ॥

———

अथ द्वयशीत्यधिकद्विशततमोऽध्यायः।

नानारोगहराण्यौषधानि।

धन्वन्तरिरुवाच। सिंही यष्टी(१) निशायुग्मं वत्सकं क्वाथसेवनं।
गिशीः सर्व्वातिसारेषु स्तन्यदोषेषु शस्यते॥ १॥
शृङ्गीं सकृष्णातिविषां चूर्णितां मधुना लिहेत्।
एका चातिविशा काशच्छर्दिज्वरहरी गिशीः॥ २॥
बालैः सैव्या वचा साज्या सदुग्धा वाथ तैलयुक्।
यष्टिकां शङ्खपुष्पीं वा बालः क्षीरान्वितां पिबेत्॥ ३॥
वायूपसम्पदयुक्तायुर्म्मेधाग्नीर्व्वर्द्धते गिशीः।
वचाह्नाग्निशिखावासाशुण्ठीकृष्णानिशागदं॥ ४॥
सयष्टिसैन्धवं बालः प्रातर्म्मेधाकरं पिबेत्।
देवदारुमहाभिशुफलत्रयपयोमुचां॥ ५॥
क्वाथः सकृष्णा महीका कल्कः सर्वान् क्रमीन्हरेत्।
त्रिफलाभृङ्गविम्बानां रसेषु मधुसर्पिषोः॥ ६॥
मेषीक्षीरे च गोमूत्रे सिद्धं रोगे हितं गिशीः।
नासारक्तहरी नस्याद्दुर्व्वारस इहोत्तमः॥ ७॥
लशुनार्द्रकभृङ्गाणां रसः कर्णस्य पूरणम्।
तैलमार्द्रकजात्यं वा मूलहा(२) चोष्टरोगनुत्(३)॥ ८॥

---

१ सिंही यष्टीति ख०। २ मूलहा इत्यत्र पुस्तकनिर्देश आर्षः। ३ मुखरोगनुदिति ख०।

जातीपत्रं फलं व्योषं कवलं मूत्रकं निशा।
दुग्धक्वाथेऽभयाकल्के सिद्धं तैलं द्विजार्त्तिनुत् ॥ ८ ॥
धान्याम्बु नारिकेलं गोमूत्रं क्रमुकविश्वयुक्।
क्वाथितं कवलं कार्य्यमधिजिह्वाधिशान्तये ॥ १० ॥
साधितं लाङ्गलीकल्के तैलं निर्गुण्डिकारसैः।
गण्डमालागलगण्डौ नाशयेन्नस्यकर्मणा ॥ ११ ॥
पल्लवैरर्कपूतीकक्षुद्रोग्घातजातिकैः।
उद्वर्त्तयेत् सगोमूत्रैः सर्वत्वग्दोषनाशनैः ॥ १२ ॥
वाकुची सतिला भुक्ता वत्सरात् कुष्ठनाशनी।
पथ्या भल्लातकी तैलगुडपिण्डी तु कुष्ठजित् ॥ १३ ॥
यूतीकवल्किरजनी त्रिफलाव्योषचूर्णयुक्।
तक्रं गदाङ्कुरे पेयं भक्ष्या वा सगुडाऽभया ॥ १४ ॥
फलदार्व्वीविषाणान्तु क्वाथो धात्रीरसोऽथवा।
पातव्यो रजनीकल्कः क्षौद्राच्चौद्रप्रमेहिणा ॥ १५ ॥
वासागर्भो व्याधिघातक्वाथ एरण्डतैलयुक्।
वातशोणितहृत् पानात् पिप्पली स्यात् प्लीहाहरी ॥ १६ ॥
क्षेव्या जठरिणा कृष्णा क्षुन्नीरवहुभाविता।
पयो वा रक्षदन्त्याग्निविड्डल्व्योषकल्कयुक् ॥ १७ ॥
ग्रन्थिकीयाभया कृष्णा विड्डङ्गाक्षा घृते स्थिता।
मांसलक्तं भक्षयंश्च पाण्डुगुल्मकृमीन् हरेत् ॥ १८ ॥
फलत्रयामृता वासा तिक्तभूनिम्बजस्तथा।
क्वाथः समाक्षिको हन्यात् पाण्डुरोगं सकामलं ॥ १९ ॥
रक्तपित्ती पिबेद्दामासुरसं सक्षितं मधु।

वरीद्राबलागुण्ठीसाधितं वा पयः पृथक् ॥ २० ॥
वरी विदारी पथ्या च बलात्रयं सवासकं ।
यष्टीद्राक्षामधुसर्पिर्भ्यामालिहेत् क्षयरोगवान् ॥ २१ ॥
पथ्याग्निशुण्ठ्यर्कत्वक्सारं मधुसिन्धुमत् ।
समूलं बिल्वधिं हन्ति परिपाकाय तत्त्वजित् ॥ २२ ॥
बिल्वजा जीवती दन्ती मञ्जिष्ठा शर्करोद्भवं ।
तार्क्षजं निम्बपत्रञ्च लेपः शस्तो भगन्दरे ॥ २३ ॥
रुग्घातरजनीलाक्षाचूर्णाजक्षीद्रसंयुता ।
वासोवर्त्तिर्व्रणे योज्या शोधनीगतिनाशनी ॥ २४ ॥
श्यामायष्टिनिशालोध्रपद्मकोत्पलचन्दनैः ।
समरीचैः घृतं तैलं क्षीरे स्याद्व्रणरोहणं ॥ २५ ॥
श्रीकार्पासदलैर्भल्लफलोपलवणा निशा ।
तत्पिण्डीस्वेदनं ताम्रे सतैलं स्यात् व्रतौषधं ॥ २६ ॥
कुम्भीसारं पयोयुक्तं वह्निदग्धं व्रणे लिपेत् ।
तदेव नाशयेल्लेखात्रारिकेलरजोद्धृतम् ॥ २७ ॥
बिल्वाजमोदसिन्धूत्थचित्रात्वग्भिः समाभया ।
तक्रेणोष्णाम्बुना वाथ पीतातीसारनाशनी ॥ २८ ॥
बलाकातिविषाबिल्वविल्वमुस्तामृतं जलं ।
सामे पुराणेऽतीसारे साम्लकशूले च पाययेत् ॥ २९ ॥
अङ्गारदग्धं सुगतं सिन्धुमुष्णाम्बुना पिबेत् ।
शूलवानथ वा तद्वि सिन्धुशिंशुकचाभया ॥ ३० ॥
कटुरोहीत्कणातङ्कलाजचूर्णं(१) मधुप्लुतं ।

१ कटुरोहीत्पलातङ्कलाजचूर्णमिति ट० ।

वस्त्रच्छिद्रगतं वस्त्रं न्यस्तं दृष्टां विनाशयेत् ॥ ३१ ॥
पाठादार्व्यौजातिदलं द्राक्षामूलफलत्वचैः(१) ।
साधितं समधु क्वाथं कवलं मुखपाकहृत् ॥ ३२ ॥
लक्षातिविषतिक्तेन्द्रदारुपाठापयोमुचां ।
क्वाथो मूत्रे घृतः क्षौद्रो सर्वज्वरगदापहः ॥ ३३ ॥
पथ्यागोक्षुरदुरालभराजवृक्षशिलाभिदां ।
कषायः समधुः पीतो मूत्रकृच्छ्रं व्यपोहति ॥ ३४ ॥
वंशत्वग्वरुणक्वाथः शर्करारामविघातनः ।
प्राक्षोटक्वाथसक्षौद्रक्षीराशी क्लीपदी भवेत् ॥ ३५ ॥
मार्कवत्वक्पयस्तैलं मधुसिक्तश्च सैन्धवं ।
पादरोगं हरेत्सर्पिर्जालकुक्कुटजं तथा ॥ ३६ ॥
शुण्ठीसौवर्चलाम्लिकाचूर्णं शुण्ठीरसैर्भृतम् ।
रजं हरेदथ क्वाथो विधि वह्न्यग्निसाधने ॥ ३७ ॥
सौवर्चलाम्लिकाचूर्णानां सदीप्यानां रसैर्युतं ।
विड्दीप्यकयुक्तं वा तक्रं गुल्मातुरः पिबेत् ॥ ३८ ॥
धान्यौषटीलसुन्नानां क्वाथः साज्यो विसर्पहा ।
शुण्ठीदारुनवाक्षीरक्षौद्रो मूत्राम्लितोऽपरः ॥ ३९ ॥
सज्योषायीरजःक्षारः फलक्वाथश्च शोथहृत् ।
गुडूचिमुण्डिकाद्वित्व सैन्धवानां रजोयुतः ॥ ४० ॥
त्रिफलायाः फलक्वाथः सगुडः स्याद्विरेचनः ।
वचाफलकषायोत्थं पयो वमनकृद्भवेत् ॥ ४१ ॥
त्रिफलायाः फलयुतं पृथग्भृङ्गजभावितम् ।

१ दार्व्यामलकजम्बूत्वक्फलैरिति अ०, ट०, च ।

विड्ङ्गं लौहचूर्णञ्च दशभागसमन्वितम् ॥ ४२ ॥
शतावरीगुडूच्यग्निपलानां शतविंशतिः(१) ।
मध्याज्यतिलजैर्लिह्याद्बलीपलितवर्जितः ॥ ४३ ॥
शतमब्दं हि जीवेत सर्वरोगविवर्जितः ।
त्रिफला सर्वरोगघ्नी समधुः शर्करान्विता ॥ ४४ ॥
सितामधुघृतैर्युक्ता सकृष्णा त्रिफला तथा ।
पथ्यात्रिचक्रशुण्ठ्याश्च गुडुचीमुषलीरजः ॥ ४५ ॥
सगुडं भक्षितं रोगहरं त्रिशतवर्षकृत् ।
किञ्चिच्चूर्णं जवापुष्पं पिष्टं विसृजेज्जले ॥ ४६ ॥
तैलं भवेद् घृताकारं किञ्चिच्चूर्णं जलान्वितं ।
धूपार्थं दृश्यते चित्रं हृषद्गंजरायुना ॥ ४७ ॥
पुनर्म्माक्षिकधूपेन दृश्यते तत्त्वथा पुरा ।
कर्पूरजलकाभेकतैलं(२) पाटलिमूलयुक् ॥ ४८ ॥
पिष्ट्वा लिप्त्वा पदे हे च चरेदङ्गारके नरः ।
व्रणोत्थानादिकं व्यूह्य दर्शयन्वै कुतूहलं ॥ ४९ ॥
विषग्रहरजध्वंसचुद्रनर्म्म च कामिकं ।
तन्त्रे षट्कर्म्मकं प्रोक्तं सिद्धिदृश्यसमाश्रयं ॥ ५० ॥
मन्त्रध्यानौषधिकथामुद्रेज्या यत्र सुष्टयः ।
चतुर्व्वर्गफलं प्रोक्तं यः पठेत्स दिवं व्रजेत् ॥ ५१ ॥

इत्याग्नेये महापुराणे नानारोगहराण्यौषधानि नाम द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥

---

१ षष्टिविंशतिरिति ज०, ट० च ।

२ कर्पूरजटकानेकमिति च० । कर्पूरजामुकानेकमिति ज० ।

अथ चत्वारिंशत्यधिकद्विशततमोऽध्यायः ।

—:०:—

मन्त्ररूपौषधकथनं ।

धन्वन्तरिरुवाच । आयुरारोग्यकर्त्तार ओंकाराद्याश्च नायकाः ।
ओंकारः परमो मन्त्रस्तं जप्त्वा चामरो भवेत् ॥ १ ॥
गायत्री परमो मन्त्रस्तं जप्त्वा मुक्तिमुक्तिभाक् ।
ओं नमो नारायणाय मन्त्रः सर्वार्थसाधकः ॥ २ ॥
ओं नमो भगवते वासुदेवाय सर्वदः ।
ओं क्ष्रौं नमो विष्णवे मन्त्रोयन्त्रौषधं परं ॥ ३ ॥
अनेन देवा ह्यसुराः सश्रियो निरुजोऽभवन् ।
भूतानामुपकारश्च तथा धर्मो महौषधम् ॥ ४ ॥
धर्म्मः सहर्म्मजद्धर्म्मी एतैर्धर्म्मैश्च निर्म्मलः ।
श्रीदः श्रीशः श्रीनिवासः श्रीधरः श्रीनिकेतनः ॥ ५ ॥
श्रियः पतिः श्रीपरम एतैः श्रियमवाप्नुयात् ।
कामी कामप्रदः कामः कामपालस्तथा हरिः ॥ ६ ॥
आनन्दो माधवश्चैव नाम कामाय वै हरेः ।
रामः परशुरामश्च नृसिंहो विष्णुरेव च ॥ ७ ॥
त्रिविक्रमश्च नामानि जप्तव्यानि जिगीषुभिः ।
विद्यामभ्यस्यतां नित्यं जप्तव्यः पुरुषोत्तमः ॥ ८ ॥
दामोदरो वज्रधरः पुष्कराक्षोऽचिरोगनुत् ।
हृषीकेशो भयहरो जपेदौषधकर्म्मणि ॥ ९ ॥

अच्युतश्चामृतं मन्त्रं सङ्ग्रामे चापराजितः।
जलतारे नारसिंहं पूर्व्वादौ क्षेमकामवान् ॥ १० ॥
चक्रिणङ्कदिनञ्चैव शार्ङ्गिणं खड्गिनं स्मरेत्।
नारायणं सर्वकाले नृसिंहोऽखिलभीतिनुत् ॥ ११ ॥
गरुडध्वजश्च विषहृत् वासुदेवं सदा जपेत्।
धान्यादिस्थापने स्वप्ने अनन्ताच्युतमीरयेत् ॥ १२ ॥
नारायणश्च दुःस्वप्ने दाहादौ जलशायिनं।
हयग्रीवश्च विद्यार्थी जगत्सूतिं सुताप्तये।
बलभद्रं गौरकार्य्यं(१) एकं नामार्थसाधकम्(२) ॥ १३ ॥

इत्याग्नेये महापुराणे मन्त्ररूपौषधकथनं नाम त्रयशीत्यधिकद्विशततमोऽध्यायः।

अथ चतुरशीत्यधिकद्विशततमोऽध्यायः।

—:०:—

मृतसञ्जीवनीकरसिद्धयोगः।

धन्वन्तरिरुवाच। सिद्धयोगान् पुनर्वक्ष्ये मृतसञ्जीवनीकरान्।
आग्नेयभाषितान् दिव्यान् सर्व्वव्याधिविमर्दनान्(३) ॥ १॥
आग्नेय उवाच। विल्वादिपञ्चमूलस्य क्वाथः स्याद्दातिके ज्वरे।
पावनं पिप्पलीमूलं गुडूची विश्वजोऽथ वा ॥ २ ॥

---

१ गौरकार्य्यं इति ख०। ३ सर्व्वव्याधिविनाशका इति ख०।
२ एकनामाथ चार्थकमिति ख०; ग० घ।

आमलक्यभया क्षौद्रा वह्निः सर्वज्वरान्तकः ।
विल्वाग्निमन्थशोनाकाश्मर्यः पारला स्थिरा ॥ ३ ॥
त्रिकण्टकं पृश्निपर्णी द्वृहती कण्टकारिकाः ।
ज्वराविपाकपार्श्वार्त्तिकाशमुत् कुशमूलकम् ॥ ४ ॥
गुडूची पर्पटी मुस्तं किरातं विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं घृतम् ॥ ५ ॥
त्रिवृद्विशालकटुकाचिफलारग्वधैः कृतः ।
संस्कारो भेदनक्वाथः पेयः सर्वज्वरापहः ॥ ६ ॥
देवदारुबलावासाचिफलाव्योषपञ्चकैः(१) ।
सविड्कैः सितातुल्यं तच्चूर्णं पञ्चकाग्रजित् ॥ ७ ॥
दशमूलीग्रटीराम्रापिप्पलीविल्वपौष्करैः ।
गृहीतामलकीभार्गीगुडूचीनागवल्लिभिः ॥ ८ ॥
यवाग्यं विधिना सिद्धं कषायं वा पिबेन्नरः ।
काशहृद्ग्रहणीपार्श्वहिक्काश्वासग्रशान्तये ॥ ९ ॥
मधुकं मधुना युक्तं विप्पलीं शर्करान्वितां ।
नागरं गुडसंयुक्तं हिक्काघ्नं लावणत्रयम् ॥ १० ॥
कारव्यजाजीमरिचं द्राक्षा द्व्याम्रादाडिमम् ।
सौवर्चलं गुडं क्षौद्रं सर्वारोचननाशनम् ॥ ११ ॥
शृङ्गवेररसश्चैव मधुना सह पाययेत् ।
अरुचिश्वासकासघ्नं प्रतिश्यायकफान्तकम् ॥ १२ ॥
वटं शृङ्गी शिलालोध्रदाडिमं मधुकं मधु ।
पिबेत् तण्डुलतोयेन च्छर्दिष्टष्णानिवारणम् ॥ १३ ॥

---

१ देवदारुबलावासाचिफलाव्योषपञ्चकैरिति ख० ।

गुडूची वासकं लोध्रं पिप्पलीक्षौद्रसंयुतम्।
कफान्वितक्षयेद्रक्तं तृष्णाकासज्वरापहम् ॥ १४ ॥
वासकस्य रसस्तद्वत् समधुस्ताम्रजो रसः।
शिरीषपुष्पस्वरसभावितं मरिचं हितं ॥ १५ ॥
सर्व्वार्त्तिनुन्नसूरोऽथ पित्तमुक् तण्डुलीयकं।
निर्गुण्डी मारिवा श्वेतु रक्तोत्पल(१)विषापहः ॥ १६ ॥
महौषधं स्मृतां क्षुद्रां पुष्करं(२) ग्रन्थिकोद्भवं(३)।
पिबेत् कषायुतं क्वाथं मूर्च्छायाञ्च मदेषु च ॥ १७ ॥
हिङ्गुसौवर्च्चलव्योषैर्द्विपलांशैर्घृताढकं।
चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनं ॥ १८ ॥
शङ्खपुष्पीवचाकुष्ठैः सिद्धं ब्राह्मीरसैर्युतं।
पुराणं हन्त्यपस्मारं सोन्मादं मेध्यमुत्तमं ॥ १९ ॥
पञ्चगव्यं घृतं तद्वत् कुष्ठनुच्चाभयायुतं।
पटोलत्रिफलानिम्बगुडूचीधात्रिणीहरैः ॥ २० ॥
सकरञ्जैर्घृतं सिद्धं कुष्ठनुद्व्यकं स्मृतं।
निम्बं पटोलं व्याघ्री च गुडूची वासकं तथा ॥ २१ ॥
कुर्य्यादृग्यपलान् भागान् एकैकस्य सकुट्टितान्।
जलद्रोणे विपक्तव्यं यावत्पादावशेषितं ॥ २२ ॥
घृतप्रस्थम्यचेत्तेन त्रिफलागर्भसंयुतं(४)।
पञ्चतिक्तमिति ख्यातं सर्पिः कुष्ठविनाशनं ॥ २३ ॥
अशीतिं वातजान्रोगान् चत्वारिंशच्च पैत्तिकान्।

---

१ रक्तोत्पलेति ख०, अ० घ।
२ पुष्करमिति अ०।
३ ग्रन्थिकोद्भवमिति ख०।
४ त्रिफलाशर्करायुतमिति ख०, अ०ग।

विंशतिं श्लैष्मिकान् कासपीनसार्शोघ्नवादिकान् ॥ २४ ॥
हन्त्यवश्यान् योगराजोऽयं यथार्कस्तिमिरं खलु ।
त्रिफलायाः कषायेण भृङ्गराजरसेन च ॥ २५ ॥
व्रणप्रक्षालनङ्कुर्यादुपदंशप्रशान्तये ।
पटोलदलचूर्णेन दाडिमत्वग्रजोऽथ वा ॥ २६ ॥
गुण्डयेच्च गजेनापि(१) त्रिफलाचूर्णकेन च ।
त्रिफलायोरजोयष्टिमार्कवोत्पलमारिचैः ॥ २७ ॥
ससैन्धवैः पचेत्तैलमभ्यङ्गाच्छर्दिकापहं ।
सक्षीरान् मार्कवरसान् द्विप्रस्थमधुकोत्पलैः ॥ २८ ॥
पचेत्तु तैलकुडवं तत्स्थं पलितापहं ।
निम्बसटीलं त्रिफला गुडूची खदिरं हृषं ॥ २९ ॥
भूनिम्बपाठात्रिफलागुडूचीरक्तचन्दनं ।
योगहयं ज्वरं हन्ति कुष्ठविस्फोटकादिकं ॥ ३० ॥
पटोलामृतभूनिम्बवासारिष्टकपर्पटैः ।
खदिरान्तयुतैः क्वाथो विस्फोटज्वरशान्तिकृत् ॥ ३१ ॥
दशमूली श्छिन्नरुहा पथ्या दारु पुनर्नवा ।
ज्वरविद्रधिशोथेषु शिग्रुविम्बजिता हिताः ॥ ३२ ॥
मधूकं निम्बपत्राणि लेपः स्याद्व्रणशोधनः ।
त्रिफला खदिरो दार्वी न्यग्रोधादिबलाकुशाः ॥ ३३ ॥
निम्बमूलकपत्राणां कषायाः शोधने हिताः ।
करञ्जारिष्टनिर्गुण्डीरसो हन्याद्व्रणक्रमीन् ॥ ३४ ॥

---

१ गुण्डयेन्नवजेनापीति च० अ० च ।

धातकीचन्दनबलासमङ्गामधुकोत्पलैः।
दार्वीमेदोन्वितैर्लेपः ससर्पिर्व्रणरोपणः॥ ३५॥
गुग्गुलुत्रिफलाव्योषसमांशैर्घृतयोगतः।
नाडीं दुष्टव्रणं शूलभगन्दरमुखं हरेत्॥ ३६॥
हरितकीं मूत्रसिद्धां सतैललवणान्वितां।
प्रातः प्रातश्च सेवेत कफवातामयापहां(१)॥ ३७॥
त्रिकटुत्रिफलाक्वाथं(२) सक्षारलवणं पिबेत्।
कफवातात्मकेष्वेव विरेकः कफहृद्धितः॥ ३८॥
पिप्पलीपिप्पलीमूलवचाचित्रकनागरैः।
क्वाथितं वा पिबेत्पेयमामवातविनाशनं॥ ३९॥
राज्ञां गुडूचीमेरण्डदेवदारुमहौषधं।
पिबेत् सर्वाङ्गिके वाते सामे सन्ध्यस्थिमज्जगे॥ ४०॥
दशमूलकषायं वा पिबेद्वा नागराम्भसा।
गुडूचीगोक्षुरक्वाथः प्रातः प्रातर्निषेवितः॥ ४१॥
सामवातकटीशूलपाचनो रुक्प्रणाशनः।
समूलपत्रशाखाया प्रसारस्याथ तैलकं॥ ४२॥
गुडूच्याः सुरसः कल्कः चूर्णं वा क्वाथमेव च।
प्रभूतकालमासेव्य मुच्यते वातशोणितात्॥ ४३॥
पिप्पलीं वर्धमानं वा सेव्यं पथ्या गुडेन वा।
पटोलत्रिफलातीव्रकटुकामृतसाधितं(३)॥ ४४॥
पक्षं पीत्वा जयत्याशु सदाहं वातशोणितं।

---

१ कफवातविनाशिनीमिति अ०।
२ त्रिकटुत्रिफलाकुडमिति अ०।
३ पटोलत्रिफलाभीरुकटुकामृत-साधितमिति ख०, ङ०, अ० च।

गुग्गुलं कोष्णगोतें(१) तु गुडुची त्रिफलाम्भसा ॥ ४५ ॥
बलापुनर्नवैरण्डहृतीद्दयगोचुरैः ।
सहिङ्गु लवणैः पीतं सद्यो वातरुजापहं ॥ ४६ ॥
कार्षिकं पिप्पलीमूलं पञ्चैव लवणानि च ।
पिप्पली चित्रकं शुण्ठी त्रिफला चित्रता वचा ॥ ४७ ॥
द्वौ क्षारौ शाहला दन्तौ स्वर्णक्षीरी विषाणिका ।
कोलप्रमाणां गुटिकां पिबेत् सौवीरकायुतां ॥ ४८ ॥
गोधावपाके त्रिवृता प्रसन्ने क्षोद्रादिके ।
क्षीरं गोधहरं दारु वर्षाभूर्नागरैः शुभम् ॥ ४९ ॥
सेकस्तथार्कवर्षाभूनिम्बक्वाथेन गोधजित् ।
व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि ॥ ५० ॥
साधितं पिबतः सर्पिः पतत्यर्शो न संशयः ।
विश्वक्सेनावनिगुग्गुल्वोः साधितं चापि लावणं ॥ ५१ ॥
विड्वह्नानलसिन्धूत्थक्षाराग्निक्षारदारुभिः ।
तैलं चतुर्गुणं सिद्धं कटुद्रव्यं जलेन वा ॥ ५२ ॥
गण्डमालापहं तैलमभ्यङ्गात् गलगण्डनुत् ।
शटीकुनागबलयक्वाथः क्षीरर्षे युतम् ॥ ५३ ॥
पयस्यापिप्पलीवासाकल्कं सिद्धं घृते हितम् ।
वचाविडभयाशुण्ठीहिङ्गुकुष्ठाग्निदीप्यकान् ॥ ५४ ॥
द्वित्रिषट्चतुरेकांशसमपक्वाग्निकाः क्रमात् ।
चूर्णं पीतं हन्ति गुल्मं उदरं शूलकासनुत् ॥ ५५ ॥
पाठानिम्बभृङ्गिकटुत्रिफलाग्निषु साधितम् ।

---

१ क्रोष्टुगोतेरिति च० ।

मूत्रेण चूर्णगुटिका गुल्मप्लीहादिमर्दनी ॥ ५६ ॥
वासानिम्बपटोलानि त्रिफला वातपित्तनुत् (१)।
लिह्यात् क्षौद्रेण विड्ङ्गं चूर्णं कृमिविनाशनम् ॥ ५७ ॥
विड्ङ्गसैन्धवक्षारमूत्रेणापि हरीतकी।
शल्लकीवदरीजम्बुपियालाम्बार्जुनत्वचः ॥ ५८ ॥
पीताः क्षीरेण मध्वक्ताः पृथक्शोणितवारणाः।
विल्वाम्रधातकीपाठाशुण्ठीमोचरसाः समाः ॥ ५९ ॥
पीता रक्तस्रुतीसारं गुडतक्रेण दुर्जयम्।
चाङ्गेरीकोलदध्यम्बुनागरक्षारसंयुतम् ॥ ६० ॥
घृतयुक्काथितं पेयं गुदभ्रंशे रुजापहम्।
विड्ङ्गातिविषामुस्तं दारुपाठाकलिङ्गकम् ॥ ६१ ॥
मरीचेन समायुक्तं शोथातीसारनाशनम्।
शर्करासिन्धुशुण्ठीभिः कृष्णामधुगुडेन वा ॥ ६२ ॥
हे हे खादेद्धरीतक्यौ जीवेद्वर्षशतं सुखी।
त्रिफला पिप्पलीयुक्ता समध्वाज्या तथैव सा ॥ ६३ ॥
चूर्णमामलकं तेन सुरसेन तु भावितम्।
मध्वाज्यशर्करायुक्तं लिह्वा क्षीरः पयः पिबेत् ॥ ६४ ॥
माषपिप्पलिशालीनां यवगोधूमयोस्तथा।
चूर्णभागैः समांशैश्च पचेत् पिप्पलिकां शुभां ॥ ६५ ॥
तां भक्षयित्वा च पिबेत् शर्करामधुरं पयः।
नवषष्टिकवर्षाणि दशवारान् स्त्रियं ध्रुवम् ॥ ६६ ॥
समङ्गाधातकीपुष्पलोध्रनीलोत्पलानि च।

---

१ त्रिफला वाक्षविषनुदिति ख०, अ० च।

एतत् क्षीरेण दातव्यं स्त्रीणां प्रदरनाशनं ॥ ६७ ॥
वीजक्षीरयष्टकस्यापि मधुकं श्वेतचन्दनं।
पद्मोत्पलस्य मूलानि मधुकं शर्करान्वितान् ॥ ६८ ॥
द्रवमाणेषु गर्भेषु गर्भस्थापनमुत्तमं।
देवदारु नभः कुष्ठं(१) नलदं विश्वभेषजं ॥६९ ॥
लेपः कार्श्विकसम्मिश्रस्तैलयुक्तः शिरोर्त्तिनुत्।
वस्त्रपूतं क्षिपेत् कीर्णं मिश्रूतथं कर्णशूलनुत् ॥ ७० ॥
लशुनार्द्रकशिग्रूणां कदल्या वा रसः पृथक्।
वलाशतावरीरास्नामृताः मैरीयके: पिवेत् ॥ ७१ ॥
त्रिफलासहितं सर्पिर्मिश्रिमरत्नमनुत्तमं।
त्रिफलाव्योषमिश्रस्वेर्दृतं सिद्धं पिवेन्नरः ॥ ७२ ॥
चाक्षुष्यमेदनं हृद्यं(२) दीपनं क्रफरोगनुत्।
नीलोत्पलस्य किञ्जल्कं गोशकृद्रससंयुतं ॥ ७३ ॥
गुटिकाञ्जनमेतत् स्यात् दिनरात्रमथोर्द्धितं।
यष्टीमधुयचाकृष्णावीजानां कुंटजस्य च ॥ ७४ ॥
कल्केनालोडय निम्बस्य कषायो वमनाय सः।
स्निग्धस्विन्नयवन्तोयं प्रदातव्यं विरेचनम् ॥ ७५ ॥
अन्यथा योजितं कुर्यात् मन्दाग्निं गौरवान्वितं।
पथ्यासैन्धवकुष्ठानां(३) चूर्णमुष्णाम्बुना पिवेत् ॥ ७६ ॥
विरेकः सर्व्वरोगघ्नः श्रेष्ठो नाराचसंज्ञकः।

---

१ कुष्ठमिति ख०। ३ पथ्यासैन्धवकुष्ठानामिति ख०।
२ कुष्ठमिति ग०।

सिद्धयोगा मुनिभ्यो ये आत्रेयेण प्रदर्शिताः ।
सर्वरोगहराः सर्वे योगाग्र्याः सुश्रुतेन हि ॥ ७७ ॥

इत्याग्नेये महापुराणे मृतसञ्जीवनीकरसिद्धयोगो नाम
चतुरशीत्यधिकद्विशततमोऽध्यायः ।

अथ पञ्चाशीत्यधिकद्विशततमोऽध्यायः ।

कल्पसागरः ।

धन्वन्तरिरुवाच । कल्पान्मृत्युञ्जयान्वक्ष्ये ह्यायुर्हीनोगमर्हताम् ।
भिन्नतो रोगहा मेध्या मध्याज्यत्रिफलामृता ॥ १ ॥
पलं पलार्धं कर्षं वा त्रिफलां सकलां तथा ।
बिल्वतैलस्य नस्यञ्च मासं पञ्चगतो कविः ॥ २ ॥
रोगापमृत्युबलिजित् तिलं(१) भल्लातकं तथा ।
पञ्चाङ्गं वाकुचीचूर्णं षण्मासं खदिरोदकैः ॥ ३ ॥
क्षाद्यैः कुष्ठक्षयेत् सेव्यं चूर्णं नीलकुरण्टजम् ।
क्षीरेण मधुना वापि शतायुः खण्डदुग्धभुक् ॥ ४ ॥
मध्याज्यगुग्गुलौ संसेव्य पलं प्रातः स मृत्युजित् ।
बलीपलितजिज्जीवेन्माण्डकीचूर्णदुग्धपाः ॥ ५ ॥
उच्चटामधुना कर्षं पयःपा मृत्युजिन्नरः ।
मध्याज्यैः पयसा वापि निर्गुण्डी रोगमृत्युजित् ॥ ६ ॥

---

१ तैलतिलं अ० ।

पलाग्रतैलं कर्षैकं षण्मासं मधुना पिबेत् ।
दुग्धभोजी पञ्चशती सहस्रायुर्भवेन्नरः ॥ ७ ॥
ज्योतिष्मतीपत्ररसं पयसा त्रिफलां पिबेत् ।
मधुनाज्यन्ततस्त्वाहृत् शतावर्या रजः पलं ॥ ८ ॥
क्षौद्राज्यैः पयसा वापि निर्गुण्डी रोगमृत्युजित् ।
पञ्चाङ्गं निम्बचूर्णस्य खदिरक्वाथभावितं ॥ ९ ॥
कर्षं भृङ्गरसेनापि रोगजिच्चामरी (१) भवेत् ।
वृद्धदारुकाज्यमधुभुक् दुग्धभोजी च मृत्युजित् ॥ १० ॥
कर्षचूर्णं हरीतक्या भावितं भृङ्गराड्रसैः ।
घृतेन मधुना सेव्य त्रिशतायुश्च रोगजित् ॥ ११ ॥
वाराहिका भृङ्गरसं लौहचूर्णं शतावरी ।
साज्यं कर्षं (२) पञ्चशतो कार्त्तचूर्णं शतावरी ॥ १२ ॥
भावितं भृङ्गराजेन मध्वाज्यन्त्रिशती भवेत् ।
ताम्रं मृतं (३) मृततुत्थं (४) गन्धकश्च कुमारिका ॥ १३ ॥
रसैर्विमृज्य हे गुञ्जे साज्यं पञ्चशताब्दवान् ।
भृङ्गरसा पलं तैलं साज्यं खण्डं शताब्दवान् ॥ १४ ॥
पलमुन्नवाचूर्णं मध्वाज्यपयसा पिबन् ।
भृङ्गोकचूर्णस्य पलं मध्वाज्यं पयसार्त्तिनुत् ॥ १५ ॥
तिलस्य तैलं समधु नस्यात् क्षणात्कचः शती ।
कर्षमक्षं समध्वाज्यं शतायुः पयसा पिबन् ॥ १६ ॥

---

१ रोगमृद्वामरी भवेदिति ब० । २ ताम्राहनमिति ब० ।
३ साज्य कर्षमिति ब० । ४ घृततुत्थमिति ब०, अ० च ।

अभयं सगुडक्षौद्रा घृतेन मधुरादिभिः ।
दुग्धान्नभुक् क्षयकेशोऽरोगी पञ्चशताब्दवान् ॥ १७ ॥
पलद्वयात्रिकाचूर्णं मध्याज्यपयसा पिबन् ।
मासं दुग्धान्नभोजी च सहस्रायुर्विरोगवान् ॥ १८ ॥
शालूकचूर्णं भृङ्गाज्यं समधाज्यं शताब्दकृत् ।
कटुतुम्बीतैलनस्यं कर्षं शतद्वयाब्दवान् ॥ १९ ॥
त्रिफला पिप्पली शुण्ठी सेविता त्रिशताब्दकृत् ।
शतावर्य्याः पूर्वयोगः सहस्रायुर्बलातिकृत् ॥ २० ॥
चित्रकेन तथा पूर्वस्तथा शुण्ठीविडङ्कृतः ।
लोहेन भृङ्गराजेन बलया निम्बपत्रकैः ॥ २१ ॥
खदिरेण च निर्गुण्ड्या कण्टकार्य्याथ वासकात् ।
वर्षाभुवा तद्भवैर्वा भाविता वटिकाशतः ॥ २२ ॥
चूर्णकृतैर्वा मधुना गुडाद्यैर्वारिणा तथा ।
ॐ क्रूं स इति मन्त्रेण मन्त्रितो योगराजकः ॥ २३ ॥
मृतसञ्जीवनीकल्पो रोगमृत्युक्षयो भवेत् ।
सुरासुरैश्च मुनिभिः सेविताः कल्पसागराः ।
गजायुर्वेदं प्रोवाच पालकाख्योऽङ्गराजकं ॥ २४ ॥

इत्याग्नेये महापुराणे कल्पसागरो नाम पञ्चाशीत्यधिक-
द्विशततमोऽध्यायः ।

अथ षडशीत्यधिकद्विशततमोऽध्यायः।

———ooo———

गजचिकित्सा।

पालकाप्य उवाच(१)। गजलक्ष्म चिकित्साश्च लोमपाद वदामि ते।
दीर्घहस्ता महोच्छ्वासाः प्रसन्नास्ते सहिष्णवः॥ १॥
विंशत्यष्टादशनखाः प्रीतकालमदाय ये।
दक्षिणश्वेतवर्णं तं हितं जलदोपमं॥ २॥
कर्णौ च विपुलौ येषां सूक्ष्मविन्यस्तत्वचौ।
ते धार्य्या न तथा धार्य्या वामना ये च सङ्कुशाः(२)॥३॥
हस्तिन्यः पार्श्वगर्भिण्यो ये च मूढा मतङ्गजाः।
वर्णं सत्वं बलं रूपं कान्तिः संहननञ्चवः॥ ४॥
सप्तस्थितो गजश्रेष्ठः सङ्ग्रामेष्वजेषु च।
कुञ्जराः परमा शोभा शिविरस्य बलस्य च॥ ५॥
आयत्तं कुञ्जरैश्चैव विजयं पृथिवीक्षितां।
पालकेषु च सर्वेषु कर्त्तव्यमनुशासनं॥ ६॥
घृततैलपरीपाकं स्नानं वातविवर्जितं।
स्कन्धेषु च क्रिया कार्य्या तथा पालकवत्कृपाः॥ ७॥
शोभनं पाण्डुरोगेषु रजनीभ्यां घृतन्विज।
आनाहे तैलसिक्तस्य निवेकस्तस्य शस्यते॥ ८॥
लवणैः पञ्चभिर्भिन्ना प्रतिपानाय वारुणी।

---

१ अस्मात्परमध्यायेति ञ०। २ सङ्कुशा इति ञ०।

विडङ्गत्रिफलाव्योषसैन्धवैः कवलान् कृतान् ॥ ८ ॥
मूर्च्छासु भोजयेन्नागं क्षीद्रसर्पिर्युतं पाययेत् ।
अभ्यङ्गः शिरसः शूले नस्यञ्चैव प्रशस्यते ॥ ९ ॥
नागानां क्षेहपुटकः पादरोगानुपक्रमेत् ।
पथ्यात् कल्ककषायेण शोधनञ्च विधीयते ॥ ११ ॥
शिखितित्तिरिलावानां पिप्पलीमरिचान्वितैः ।
रसैः सम्भोजयेन्नागं वेपथुर्यस्य जायते ॥ १२ ॥
बालबिल्वं तथा लोध्रं धातकी सितया सह ।
अतीसारविनाशाय पिष्टीं भुञ्जीत कुञ्जरः ॥ १३ ॥
नस्यं करग्रहे देयं घृतं लवणसंयुतम् ।
मागधीनागराजाजीयवागूर्मुस्तसाधिता ॥ १४ ॥
उत्कर्णके तु दातव्या वाराहञ्च तथा रसम् ।
दग्धमूलकुलत्थाक्षकाकमाचीविपाचितम् ॥ १५ ॥
तैलभूषणसंयुक्तं गलग्रहगदापहम् ।
अष्टभिर्लवणैः पिष्टैः प्रसन्नाः पाययेद्घृतम् ॥ १६ ॥
मूत्रभक्षे ऽथ वा वीजं क्षथितं नपुषस्य च ।
त्वग्दोषेषु पिबेद्बिल्वं हृषं वा क्षथितं द्विपः ॥ १७ ॥
गवां मूत्रं विडङ्गानि कृमिकोष्ठेषु शस्यते ।
शुक्लवेरकषाद्राक्षाशर्कराभिः शृतं पयः ॥ १८ ॥
क्षतक्षयकरं पानं तथा मांसरसः शुभः ।
मुद्गोदनं व्योषयुतमरुचौ तु प्रशस्यते ॥ १९ ॥
बिल्वशोणाग्निदन्त्यर्कश्यामाचीरेभपिप्पली ।
एतैर्गुल्महरः क्षेहः कृतश्चैव तथापरः ॥ २० ॥

भेदनद्रावणाभ्यङ्गस्नेहपानानुवासनैः।
सर्वानेव समुत्पन्नान् विद्रवान् समुपाहरेत् ॥ २१ ॥
यष्टिकं मुद्गसूपेन(१) शारदेन तथा पिबेत्।
बालविल्वैस्तथा लेपः कटुरोगेषु शस्यते ॥ २२ ॥
विडङ्गेन्द्रयवौ हिङ्गु सरलं रजनीद्वयम्।
पूर्वाह्णे पाययेत् पिण्डान् सर्वशूलोपशान्तये ॥ २३ ॥
प्रधानभोजने तेषां यष्टिकव्रीहिशालयः।
मध्यमौ यवगोधूमौ शेषा दन्तिनि चाधमाः ॥ २४ ॥
यवस्यैव तथैवेक्षुर्नागानां बलवर्धनः।
नागानां यवसं शुष्कं तथा धातुप्रकोपणं ॥ २५ ॥
मद्यक्षीणस्य नागस्य पयःपानं प्रशस्यते।
दीपनीयैस्तथा द्रव्यैः श्रृतो मांसरसः शुभः ॥ २६ ॥
वायसः कुक्कुरश्चोभौ काकोलूककुलौ हरिः।
भवेत् क्षौद्रेण संयुक्तः पिण्डो युद्धे महापदि(२) ॥ २७ ॥
कटुमत्स्यविडङ्गानि क्षारः कोषातकी पयः।
हरिद्रा चेति धूपोयं कुञ्जरस्य जयावहः ॥ २८ ॥
पिप्पलीतण्डुलास्तैलं माध्वीकं माक्षिकम् तथा।
नेत्रयोः परिषेकोयं दीपनीयः प्रशस्यते ॥ २९ ॥
पूरीषषटकायाश्च तथा पारावतस्य च।
क्षीरद्रुचक्करीषाश्च(३) प्रसन्नायेष्टमञ्जनं ॥ ३० ॥

---

१ मुद्गसूपेनेति अ०, अ० च। २ क्षीरद्रुचक्करीषाश्चेति अ०।
२ तदाह चेति अ०।

अनेनाञ्जिततनेत्रस्तु करोति कदनं रणे।
उत्पलानि च नीलानि सुस्नग्गरमिव च॥ ३१॥
तण्डुलोदकपिष्टानि नेत्रनिर्वापणं परम्।
नखहृद्धौ नखच्छेदस्तैलसेकश्च मास्यपि॥ ३२॥
अध्याख्यानं भवेच्चास्य करीषैः पांशुभिस्तथा।
अरत्रिदाहयोः सेकः सर्पिषा च तमेष्यते॥ ३३॥

इत्याग्नेये महापुराणे गजचिकित्सा नाम षडशीत्यधिक-द्विशततमोऽध्यायः।

अथ सप्ताशीत्यधिकद्विशततमोऽध्यायः।

—0*0—

अश्ववाहनसारः।

धन्वन्तरिरुवाच। अश्ववाहनसारस्तु वक्ष्ये चाश्वचिकित्सनम्।
वाजिनां संयतैः कार्य्यो धर्म्मकर्मार्थसिद्धये॥ १॥
अश्विनौ अश्वगं हस्तं उत्तराश्वितयन्तथा।
नक्षत्राणि प्रशस्तानि हयानामादिवाहने॥ २॥
हेमन्तः शिशिरश्चैव वसन्तश्चाश्ववाहने।
शीतेऽतिवृष्टि वर्षासु निषिद्धं वाहनं हये॥ ३॥
तीव्रैर्न च परैर्दण्डैरदेशे न च ताडयेत्।
कीलास्थिसंकुले चैव विषमे कण्टकान्विते॥ ४॥

वालुकापङ्कसंच्छन्ने, गर्त्तागर्त्तप्रदूषिते ।
अचित्तज्ञो विनोपायैर्वाहनं कुरुते तु यः ॥ ५ ॥
स वाह्यते हयेनैव पृष्ठस्थः कटिकां विना(१) ।
छन्दं विज्ञापयेत् कोपि सुकृती धीमतां वरः ॥ ६ ॥
अभ्यासादभियोगाच्च विनागास्त्रं स्ववाहकः ।
स्नातस्य प्राङ्मुखस्याथ देवान् वपुषि योजयेत् ॥ ७ ॥
प्रणवादिनमोन्तेन स्ववीजेन यथाक्रमम् ।
ब्रह्मा चित्ते बले विष्णुर्वैनतेयः पराक्रमे ॥ ८ ॥
पार्श्वे रुद्रा गुरुर्बुद्धौ विश्वेदेवाश्च मर्मसु ।
दृगावर्त्ते दृगीन्द्रार्कौ कर्णयोरश्विनौ तथा ॥ ९ ॥
जठरेऽग्निः स्वधा खेदे वाग्जिह्वायां जवेऽनिलः ।
पृष्ठतो नाकपृष्ठस्तु खुराग्रे सर्वपर्वताः ॥ १० ॥
तारास्य रोमकूपेषु हृदि चान्द्रमसी कला ।
तेजस्यग्नेरतिः श्रोण्यां ललाटे च जगत्पतिः ॥ ११ ॥
ग्रहाश्च हेषिते चैव तथैवोरसि वासुकिः ।
उपोषितोऽर्चयेत् सादी हयं दत्तस्रुतौ जपेत् ॥ १२ ॥
हय गन्धर्वराजस्त्वं शृणुष्व वचनं मम ।
गन्धर्वकुलजातस्त्वं माभूस्त्वं कुलदूषकः ॥ १३ ॥
द्विजानां सत्यवाक्येन सोमस्य गरुडस्य च ।
रुद्रस्य वरुणस्यैव पवनस्य बलेन च ॥ १४ ॥
हुताशनस्य दीप्त्या च स्मर जातिं तुरङ्गम ।
स्मर राजेन्द्रपुत्रत्वं सत्यवाक्यमनुस्मर ॥ १५ ॥

---

१ कटिकां विनेति क०, ग० च ।

स्मर त्वं वारुणीं कन्यां स्मर त्वं कौस्तुभं मणिं ।
क्षीरोदसागरे चैव मथ्यमाने सुरासुरैः ॥ १६ ॥
तत्र देवकुले जातः स्ववाक्यं परिपालय ।
कुले जातस्वमज्ञानां मित्रं मे भव शाश्वतम् ॥ १७ ॥
शृणु मित्र त्वमेतच्च सिद्धो मे भव वाहन ।
विजयं रक्ष मां चैव समरे सिद्धिमावह ॥ १८ ॥
तव पृष्ठं समारुह्य हता दैत्याः सुरैः पुरा ।
अधुना त्वां समारुह्य जेष्यामि रिपुवाहिनीं ॥ १९ ॥
कर्णजापन्ततः कृत्वा विमुच्य च तथा प्यरीन्(१) ।
पर्य्यानयेद्दयं मादौ वाहयेद्युद्धतो जयः ॥ २० ॥
सज्ञाताः स्वशरीरेण(२) दोषाः प्रायेण वाजिनां ।
छन्यन्तेऽतिप्रयत्नेन गुणाः सादिवरैः पुनः ॥ २१ ॥
सहजा इव दृश्यन्ते गुणाः सादिवरोद्भवाः ।
नाशयन्ति गुणानन्ये सादिनः सहजानपि ॥ २२ ॥
गुणानेको विजानाति वेत्ति दोषांस्तथाऽपरः ।
धन्यो धीमान् हयं वेत्ति नोभयं वेत्ति मन्दधीः ॥ २३ ॥
अकर्मशोऽनुपायज्ञो वेगासज्ञोऽतिकोपनः ।
घनदण्डरतिश्छिद्रे यः समोपि न शस्यते ॥ २४ ॥
उपायज्ञोऽथ चित्तज्ञो विशुद्धो दोषनाशनः ।
गुणार्जनपरो नित्यं सर्वकर्मविशारदः ॥ २५ ॥
प्रयत्नेन गृहीत्वाऽथ प्रविष्टो वाहभूतलम् ।
सम्यायसम्यभेदेन वाहनीयः स्वसादिना ॥ २६ ॥

---

१ तथाऽपरानिति ज०, ञ०, ड० थ । २ स्व जाता इरोरेवेति ज० ।

आरब्धं सहसा नैव ताड़नीयो हयोत्तमः ।
ताड़नाद्भयमाप्नोति भयान्मोहश्च जायते ॥ २७ ॥
प्रातः सादी प्रतेनैव वल्गामुद्धृत्य चालयेत् ।
मन्दं मन्दं विना नालं धृतवल्गो दिनान्तरे ॥ २८ ॥
प्रोक्तमाश्वसनं सामभेदोऽश्वेन नियोज्यते ।
क्षमादिताड़नं दण्डो दानं कालसहिष्णुता ॥ २९ ॥
पूर्व्वपूर्व्वविरुद्धो तु विदध्यादुत्तरोत्तरम् ।
जिह्वातले विनायोगं विदध्याद्वाहने हये ॥ ३० ॥
गुणेतरगतां वल्गां सक्रख्या सह गाहयेत् ।
विस्मार्य्य वाहनं कुर्य्याच्छिथिलानां शनैः शनैः ॥ ३१ ॥
हयं जिह्वाक्रमाहीने जिह्वायन्त्रं विमोचयेत् ।
गाढतां मोचयेत्तावद्यावत् स्तोभं न मुञ्चति ॥ ३२ ॥
कुर्य्याच्छ्रुतसुरस्राणमविलालञ्च मुञ्चति ।
जर्जानतः स्वभावाच्चस्योरस्राणमस्रयम् ॥ ३३ ॥
विधाय वाहयेद्वह्न्या लीलया सादिसत्तमः ।
तस्य सव्येन पूर्वेण संयुक्तं सव्यवल्गया ॥ ३४ ॥
यः कुर्य्यात्यधिमं पादं गृहीतस्तेन दक्षिणः ।
क्रमेणानेन यो खेदं कुरुते वामवल्गया ॥ ३५ ॥
पादो तेनापि पादः स्यादृग्गृहीतो वाम एव हि ।
अथ चेश्वरणे त्यक्ते जायते सुदृढ़ासनं ॥ ३६ ॥
यो द्रुतो दुष्करे चैव मोटके नाटकायनं ।
सम्यग्हीनं खलीकारो हनने गुणने तथा ॥ ३७ ॥
स्वभावं हि तुरङ्गस्य सुखव्यावर्त्तनं पुनः ।

न चैवेत्थं तुरङ्गाणां पादग्रहणहेतवः ॥ ३८ ॥
विस्रस्तं हयमालोक्य गाढमापीडा चासनं ।
रोकयित्वा मुखे पादं ग्राह्यतो लोकनं स्थितं ॥ ३९ ॥
गाढमापीडा रागाभ्यां वल्गामाकृष्य गृह्यते ।
ताडनाद् युग्मपादं(१) तद्दृक्वक्षनमुच्यते ॥ ४० ॥
संयोज्य वल्गया पादान् वल्गामामोच्य वाञ्छितम्।
वाह्यपार्ष्णिप्रयोगात्तु(२) यत्र तत्ताड़नं मतम् ॥ ४१ ॥
प्रलयाविप्लवे ज्ञात्वा क्रमेणानेन बुद्धिमान् ।
मोटनेन चतुर्थेन विधिरेष विधीयते ॥ ४२ ॥
नाधत्तेऽधय यः पादं योऽग्रो लघुनि मण्डले ।
मोटनोद्राकनाभ्यान्तु ग्राहयेत् पादमौग्रितं ॥ ४३ ॥
वटयित्वासने(३) गाढं मन्दमादाय यो व्रजेत् ।
ग्राह्यते संग्रहाद्यत्र तत्संग्रहणमुच्यते ॥ ४४ ॥
हत्वा पार्ष्णे प्रहारेण स्थानस्थो व्यथमानसम् ।
वल्गामाकृष्य पादेन ग्राह्यकण्टकपायनम्(४) ॥ ४५ ॥
उत्थितो योऽङ्घ्रिणानेन पार्ष्णिपादात्तुरङ्गमः ।
गृह्यते यत् खलीकृत्य खलीकारः स चेष्यते ॥ ४६ ॥
गतिभये प्रियः पादमादत्ते नैव वाञ्छितः ।
हत्वा तु यत्र दण्डेन ग्राह्यते ग्रहणं हि तत् ॥ ४७ ॥
खलीकृत्य चतुष्केण तुरङ्गो वल्गयान्यया ।
उच्छास्य ग्राह्यतेऽन्यत्र तत्स्यादुच्छासनं पुनः ॥ ४८ ॥

---

१ अडकाक्षाद्यतुत्पादमिति ज०। २ वाह्यपार्ष्णे प्रयोगाच्चेति ख०।
३ वष्टयित्वाधम इति ख०। ४ ग्राहकण्टकपायनमिति ख०।

स्वभावं वहिरस्यन्तं तस्यां दिशि पदायनं ।
नियोज्य वाहयेत्तत्तु मुखव्यावर्त्तनं मतम् ॥ ४८ ॥
वाहयित्वा ततः पादं त्रिविधासु यथाक्रमम् ।
साधयेत् पञ्चधारासु क्रमशो मण्डलादिषु ॥ ५० ॥
आजनोर्वाननं वाहं शिथिलं वाहयेत् सुधीः ।
अङ्गेषु लाघवं यावत्तावत्तं वाहयेद्दयं ॥ ५१ ॥
मृदुः स्कन्धे लघुर्वक्त्रे शिथिलः सर्वसन्धिषु ।
यदा स सादिनो वश्यः सङ्कल्पीयात्तदा हयं ॥ ५२ ॥
न त्यजेत् पश्चिमं पादं यदा साधुर्भवेत्तदा ।
तदाकृष्टिर्विधातव्या पाणिभ्यामिह वल्गया ॥ ५३ ॥
तत्र त्रिको यथा तिष्ठेदुद्ग्रीवोरुखः समाननः ।
धरायां पश्चिमौ पादौ अन्तरीक्षे यदाग्र्यौ ॥ ५४ ॥
तदा सन्धारणं कुर्य्यादृगाठवाहश्च मुष्टिना ।
सङ्गसैवं समाकृष्टो यस्तुरङ्गो न तिष्ठति ॥ ५५ ॥
शरीरं विक्षिपन्तश्च साधयेन्मण्डलभ्रमैः ।
क्षिपेत् स्कन्धश्च यो वाहं स च स्याप्यो हि वल्गया ॥ ५६ ॥
गोमयं लवणं मूत्रं क्षथितं मृत्समन्वितम् ।
अङ्गलेपो मक्षिकादिदंशमविनाशनः ॥ ५७ ॥
मध्ये भद्रादिजातीनां मण्डो देयो हि सादिना ।
दर्शनं भीततीक्ष्णस्य निरुत्साहः क्षुधा हयः ॥ ५८ ॥
यथा वश्यस्तथा शिक्षा विनश्यत्यतिवाहिताः ।
अवाहिता न सिध्यन्ति तृङ्गवत्सांश्च वाहयेत् ॥ ५९ ॥
सम्पीडा जानुयुग्मे न स्थिरमुष्टिस्तुरङ्गमं ।

गोमूत्राकुटिला वेणी पद्ममण्डलमालिका ॥ ६० ॥
पक्षीलूखलिका कार्या गर्वितास्त्रीऽतिकीर्त्तिता:(१) ।
संचिप्तश्चैव विक्षिप्तं क्षुब्धितश्च यथाचितम्(२) ॥ ६१ ॥
वल्गितावल्गितौ चैव घोटा चेत्थमुदाहृतम् ।
वीथीधनुःशतं यावद्यौतिर्भवतिसत्तमा ॥ ६२ ॥
भद्रः सुसाध्यो वाजी स्यान्मन्दो दण्डैकमानसः ।
मृगजङ्घो(२) मृगो वाजी सङ्कीर्णस्तत्समन्वयात् ॥ ६३ ॥
शर्करामधुलाजाद्यः सुगन्धोऽश्वः शुचिर्द्विजः ।
तेजस्वी क्षत्रियश्चाश्वो विनीतो बुद्धिमांश्च यः ॥ ६४ ॥
शूद्रोऽशुचिर्बली मन्दो विरूपो विमतिः खलः ।
वल्गया धार्य्यमाणोऽश्वो लालकं यश्च दशति(३) ॥ ६५ ॥
धारासु योजनीयोऽसौ प्रग्रहग्रहमोक्षणैः ।
अश्वादिलक्षणं वक्ष्ये शालिहोत्रो यथाऽवदत् ॥ ६६ ॥

इत्याग्नेये महापुराणे अश्ववाहनसारो नाम सप्ताशीत्य-
धिकद्विशततमोऽध्यायः ॥

---

१ सर्जनाऽतिकीर्त्तिता इति ख०।
२ यथाचितमिति ग०।
३ दशत इति ख०, ग० घ।

अथाष्टाशीत्यधिकद्विशततमोऽध्यायः।

———000———

अश्वचिकित्सा।

शालिहोत्र उवाच। अश्वानां लक्षणं वक्ष्ये चिकित्साञ्चैव(१)सुव्रत।
हीनदन्तो विदन्तश्च करालो कृष्णतालुकः॥ १॥
कृष्णजिह्वश्च यमजोजातमुष्कश्च यस्तथा।
द्विग्रफश्च तथा मूक्ष्णी त्रिवर्णो व्याघ्रवर्णकः॥ २॥
खरवर्णो भस्मवर्णो जातवर्णश्च काकुदी।
श्मश्री च काकसादी च खरसारस्तथैव च॥ ३॥
वानराक्षः कृष्णघटः कृष्णगुह्यस्तथैव च।
कृष्णप्रोथश्च शूकश्च यश्च तित्तिरिसन्निभः॥ ४॥
विषमः श्वेतपादश्च ध्रुवावर्त्तविवर्जितः।
अशुभावर्त्तसंयुक्तो वर्जनीयस्तुरङ्गमः॥ ५॥
रम्भोपरम्भयोर्द्वौ द्वौ द्वौ मस्तकवक्षसोः।
प्रयाणे च ललाटे च कण्ठावर्त्ताः शुभा दश॥ ६॥
सक्थ्याश्च ललाटे च कर्णमूले निगालके।
बाहुमूले गले श्रेष्ठा आवर्त्तास्त्वशुभाः परे॥ ७॥
शुकेन्द्रगोपचन्द्राभा ये च वायससन्निभाः।
सुवर्णवर्णाः स्निग्धाश्च प्रशस्यास्तु सदैव हि॥ ८॥
दीर्घग्रीवाश्चिकूटाश्च ह्रस्वकर्णाश्च शोभनाः।

---

१ चिकित्सालक्षणं च०।

राज्ञान्तुरङ्गमा यत्र(१) विजयं वर्जयेत्ततः ॥ ९ ॥
पालितस्तु हयो दन्ती शुभदो दुःखदोऽन्यथा।
श्रियः पुत्रास्तु गन्धर्व्वा वाजिनो रत्नसुत्तमम् ॥ १० ॥
अश्वमेधे तु तुरगः पवित्रत्वात्तु हूयते।
हपो निम्बहरीतक्यौ च गुडूची च समाक्षिका ॥ ११ ॥
सिंहा गन्धकरी पिण्डी स्वेदयं शिरसस्तथा।
हिङ्गु पुष्करमूलञ्च नागरं साम्लवेतसं ॥ १२ ॥
पिप्पलीसैन्धवयुतं शूलघ्नं चोष्णवारिणा।
नागरातिविषा मुस्ता सानन्ता बिल्वमालिका ॥ १३ ॥
क्वाथमेषां पिबेद्वाजी सर्व्वातीसारनाशनम्।
प्रियङ्गुसारिवाभ्याञ्च युक्तमाजं सृतं(२) पयः ॥ १४ ॥
पर्य्यायशर्करं पीत्वा श्रमाद्वाजी विमुच्यते।
द्रोणिकायान्तु दातव्या तैलवस्तिस्तुरङ्गमे ॥ १५ ॥
कोष्ठजा च शिरा वेध्या तेन तस्य सुखं भवेत्।
दाडिमं त्रिफला व्योषं गुडञ्च समभाविकम् ॥ १६ ॥
पिण्डमेतत् प्रदातव्यमश्वानां कासनाशनम्।
प्रियङ्गुलोध्रमधुभिः पिबेद्वृषरसं हयः ॥ १७ ॥
क्षीरं वा पञ्चकोलाढ्यं कासनाद्वि प्रमुच्यते।
प्रस्रवेषु च सर्व्वेषु श्रेय आदौ विशोधनम् ॥ १८ ॥
अभ्यङ्गोद्वर्त्तनैः स्नेहं नस्यवर्त्तिक्रमः स्मृतः।
ज्वरितानां तुरङ्गाणां पयसैव क्रियाक्रमः ॥ १९ ॥
लोध्रकन्धरयोर्मूलं मातुलाङ्गाग्निनागराः।

---

१ राज्ञोतुरङ्गमा यत्रेति ङ०। २ हृतमिति ङ०।

कुष्ठहिङ्गुवचाराजालेपोयं ग्रीवनाशनः ॥ २० ॥
मञ्जिष्ठा मधुकं द्राक्षाहरिद्रे रक्तचन्दनम् ।
अपुषीबीजमूलानि शृङ्गाटककसेरुकम् ॥ २१ ॥
अजापयःसृतमिदं सुशीतं शर्करान्वितं ।
पीत्वा नीरुग्जनो वाजी रक्तमेहात् प्रमुच्यते ॥ २२ ॥
मध्याह्नतुलिगालस्थशिराग्रीथो गलग्रहः ।
अभ्यङ्गः कटुतैलेन(१) तत्र तेष्वेव शस्यते ॥ २३ ॥
गलग्रहगदो ग्रीवः प्रायशो गलदेशके ।
प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः ॥ २४ ॥
क्षाराद्विङ्गुयुतैरेभिः कृत्वा नस्यं न सीदति ।
निशे ज्योतिष्मती पाठा कृष्णा कुष्ठं वचा मधु ॥ २५ ॥
जिह्वास्तम्भे च लेपोऽयं गुडमूत्रयुतो हितः ।
तिलैर्यव्या रजन्या च निम्बपत्रैश्च योजिता ॥ २६ ॥
यौद्रेण ग्रीवनी पिण्डी सर्पिषा व्रणरोपणी ।
अभिघातेन खञ्जन्ति ये वाधास्तीव्रवेदनाः ॥ २७ ॥
परिषेकक्रिया तेषां तैलेनाशु वजापहा ।
दोषकोपाभिघाताभ्यां पंङ्गभिश्च व्रणक्रमः ॥ २८ ॥
अश्वत्थोदुम्बरप्लक्षमधूकवटकल्कनैः ॥ २९ ॥
प्रभूतसलिलः क्वाथः सुखोष्णः व्रणशोधनः ।
घृताक्तो नागरं राज्ञा मञ्जिष्ठाकुष्ठसैन्धवैः ॥ ३० ॥
देवदारुवचायुग्मरजनीरक्तचन्दनैः ।
तैलसिद्धं कषायेण गुडूच्याः पयसा सह ॥ ३१ ॥

---

१ तिलतैलेनेति च० ।

मन्दाग्नौ वह्निनाशे च योज्यं सर्वत्र लिङ्गिने।
रक्तस्रावो जलौकाभिर्वैद्यान्ते नेत्ररोगिनः॥ ३२॥
खादिरोडुम्बराश्वत्थकषायेण च साधनम्।
धात्रीदूरालभाप्रियङ्गुकुङ्कुमैः समैः॥ ३३॥
गुडूच्या च कृतः कल्को हितो युक्तावलम्बिने।
उत्पाते च गिले आध्ये शुष्कार्शसि तथैव च॥ ३४॥
क्षिप्रकारिणि दोषे च सद्यो विदलमिष्यते(१)।
गोमूत्रोन्मिश्रिकाकुष्ठरजनीतिलमर्षपैः॥ ३५॥
गवां मूत्रेण पिष्टैश्च मर्दनं कण्डूनाशनम्।
शीतो मधुयुतः क्वाथो नासिकायां मशर्करः॥ ३६॥
रक्तपित्तहरः पानादश्वकर्णस्तथैव च।
समसे समसे देयमन्नानां लवणं दिने॥ ३७॥
सद्या भुक्तवतान्देया अतिपाने तु वारुणी।
जीवनीयैः ममधुरैर्मृद्वीकाशर्करायुतैः॥ ३८॥
सपिप्पलीकैः शरदि प्रतिपानं सपञ्चकैः।
विडङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः॥ ३९॥
सचित्रकैस्तुरङ्गाणां प्रतिपानं हिमागमे।
लोध्रप्रियङ्गुकामुस्तापिप्पलीविल्वभेषजैः॥ ४०॥
सक्षौद्रैः प्रतिपानं स्याद्वसन्ते कफनाशनम्।
प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समहौषधैः॥ ४१॥
निदाघे सगुडा देया मदिरा प्रतिपानके।

---

१ वेदनमिश्रित इति ज०, ञ० च।

लोध्रकाष्ठं सलवणं पिप्पल्यो विश्वभेषजम् ॥ ४२ ॥
भवेत्तैलयुतैरेभिः प्रतिपानं घनागमे ।
निदाघोद्धूतपित्तार्त्ताः शरत्सु पुष्टशोणिताः ॥ ४३ ॥
प्राहृड्भिन्नपुरीषाश्च पिबेयुर्वाजिनो घृतम् ।
पिबेयुर्वाजिनस्तैलं कफवायुधिकास्तु ये ॥ ४४ ॥
स्नेहव्यापन्नवो येषां कार्य्यं तेषां विरूक्षणम् ।
ग्राह्यं यवागूरूक्षा स्याद् भोजनं तक्रसंयुतम् ॥ ४५ ॥
शरन्निदाघयोः सर्पिस्तैलं शीतवसन्तयोः ।
वर्षासु गिरिरे चैव वस्तौ यमकमिष्यते ॥ ४६ ॥
गुर्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् ।
वायुवर्जञ्च वाहस्य स्नेहपीतस्य वर्जितम् ॥ ४७ ॥
स्नानं पानं शस्तकूष्ठमखानां सलिलागमे ।
अत्यर्थं दुर्दिने काले पानमेकं प्रशस्यते ॥ ४८ ॥
युक्तशीतातपे काले द्विःपानं स्नपनं सकृत् ।
ग्रीष्मे त्रिस्नानपानं स्याच्चिरं तस्यावगाहनम् ॥ ४९ ॥
निस्तुषाणां प्रदातव्या यवानां चतुराढकी ।
चणकत्रीहिमौद्गानि कुलत्थं वापि दापयेत् ॥ ५० ॥
अहोरात्रेण चार्द्धस्य यवसस्य तुला दश ।
अष्टौ शुष्कस्य दातव्याश्चतस्रोऽथ वुषस्य वा ॥ ५१ ॥
दूर्वा पित्तं यवः कासं वुषस्त्र श्लेष्मसञ्चयम् ।
नाशयत्यर्জुनः श्वासं तथा मांनो बलक्षयम् ॥ ५२ ॥
वातिकाः पैत्तिकाश्चैव श्लेष्मजाः सान्निपातिकाः ।
न रोगाः पीडयिष्यन्ति दूर्वाहारन्तुरङ्गमम् ॥ ५३ ॥

द्वौ रज्जुबन्धौ दुष्टानां पञ्चयोरुभयोरपि ।
पश्चाद्धनुश्च कर्त्तव्यौ दूरकीलव्यपाश्रयः ॥ ५४ ॥
वासेयुक्तास्तृते स्थाने ज्ञातधूपनभूमयः ।
यत्नोपन्यस्तसवसाः सप्रदीपाः सुरक्षिताः ।
लक्षवाजजकपयो धार्य्याश्चाश्वरक्षे मृगाः ॥ ५५ ॥

इत्याग्नेये महापुराणे अश्वायुर्वेदो नामाष्टाशीत्यधिक-
द्विशततमोऽध्यायः ।

अथोननवत्यधिकद्विशततमोऽध्यायः ।

अश्वशान्तिः ।

शालिहोत्र उवाच । अश्वशान्तिं प्रवक्ष्यामि वाजिरोगविमर्दनीं ।
नित्यां नैमित्तिकीं काम्यां त्रिविधां शृणु सुव्रत ॥ १ ॥
शुभे दिने श्रीधरञ्च श्रियमुच्चैःश्रवाञ्च तं ।
हयराजं समभ्यर्च्च सावित्र्यैर्जुहुयाद्धृतं ॥ २ ॥
द्विजेभ्यो दक्षिणान्दद्याद्दक्षद्विसाहा भवेत् ।
अश्वयुक् शुक्लपक्षस्य पञ्चदश्याञ्च शान्तिकं ॥ ३ ॥
वह्निः कुर्य्याद्विशेषेण नासत्यौ वरुणं यजेत् ।
सप्तर्षिरुद्रं ततो देवीं शाखाभिः परिवारयेत् ॥ ४ ॥
घटान्सर्व्वरसैः पूर्णान् दिक्षु दद्याच्चतुष्टयान् ।
यवाज्यं जुहुयात् प्राच्यं यजेदश्वांश्च साश्विनान् ॥ ५ ॥

विप्रेभ्यो दक्षिणान्दद्यान्नैमित्तिकमतः शृणु ।
मकरादौ हयानाञ्च पद्मैर्विष्णुं श्रियं यजेत् ॥ ६ ॥
ब्रह्माणं शङ्करं सोममादित्यञ्च तथाश्विनौ ।
देवन्तसुखैःश्रवसन्दिक्पालांश्च दलेष्वपि ॥ ७ ॥
प्रत्येकं पूर्णकुम्भैश्च वेद्यान्तस्तोय्यतः स्थले ।
तिलाज्यताज्यसिद्धार्थान् देवतानां शतं शतं ।
उपोषितेन कर्त्तव्यं कर्म चाश्वरुजापहं ॥ ८ ॥

इत्याग्नेये महापुराणे अश्वशान्तिर्नामोननवत्यधिक-
द्विशततमोऽध्यायः ॥

अथ नवत्यधिकद्विशततमोऽध्यायः ।

गजशान्तिः ।

अग्निरुवाच । गजशान्तिं प्रवक्ष्यामि गजरोगविमर्द्दनीम् ।
विष्णुं श्रियञ्च पद्मस्थां नागनैरावतं यजेत् ॥ १ ॥
ब्रह्माणं शङ्करं विष्णुं शक्रं वैश्रवणं यमं ।
चन्द्रार्कौ वरुणं वायुमग्निं पृथ्वीं तथा च खं ॥ २ ॥
मेघं शैलान् कुञ्जरांश्च ये तेऽष्टौ देवयोनयः ।
विरूपाक्षं महापद्मं भद्रं सुमनसन्तथा ॥ ३ ॥
कुमुदैरावतः पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नागा अष्टौ होमोऽथ दक्षिणा ॥ ४ ॥

गजाः प्राग्युदकासिता हृदो नैमित्तिकं शृणु।
गजानाग्नेयकरादौ च ऐशान्यां नगराद्रिः॥ ५॥
स्थण्डिले कमले मध्ये विष्णुं लक्ष्मीञ्च केशरे।
ब्रह्माणं भास्करं पृथ्वीं यजेत् स्कन्दं ह्यनन्तकं॥ ६॥
खं शिवं सोममिन्द्रादींस्तदस्त्राणि दले क्रमात्।
वज्रं शक्तिञ्च दण्डञ्च तोमरं पाशकं गदां॥ ७॥
शूलं पद्मञ्चाभिवृत्ते चक्रे सूर्यस्तथाश्विनौ।
वसूनष्टौ तथा साध्यान् याम्येऽथ नैर्ऋते दले॥ ८॥
देवानाङ्गिरसश्चाभिभृगवो मरुतोऽनिले(१)।
विश्वेदेवांस्तथा दत्ते रुद्रा रौद्रेऽथ मण्डले॥ ९॥
ततो वृत्तया रेखया तु देवान् वै बाह्यतो यजेत्।
सूत्रकारान्ऋषीन् वाणीं पूर्व्वादौ सरितो गिरीन्॥ १०॥
महाभूतानि कोणेषु ऐशान्यादिषु संयजेत्।
पद्मं चक्रं गदां खड्गं चतुरस्रन्तु मण्डलं॥ ११॥
चतुर्द्वारं ततः कुर्य्याः(२) अग्न्यादौ च पताकिकाः(३)।
चत्वारस्तोरणा द्वारि नागानैरवतादिकान्॥ १२॥
पूर्व्वादौ चौषधीभिश्च देवानां भाजनं पृथक्।
पृथक्शतानुशीयाद्यैर्गजानर्च्च्य प्रदक्षिणं॥ १३॥
नागं वह्निं देवतादीन् बाह्यैर्जप्त्वा स्वकं हृदम्।
द्विजेभ्यो दक्षिणां दद्यात् क्षयवैद्यादिकस्तथा॥ १४॥
करिणोन्तु समारुह्य वदेत् कर्णन्तु कालवित्।

---

१ मरुतोऽनिल इति ख०। २ पताकिन इति ख०।
३ चतुःकुर्य्या इति ख०।

नागराजेऽमृते शान्तिं कृत्वाऽमुष्मिन्(१) जपेन्मनुम्॥ १५॥
श्रीगजस्य कृतो राज्ञा भवानस्य गजाग्रणीः ।
प्रभूर्माङ्गल्यभक्तस्त्वां पूजयिष्यति पार्थिवः ॥ १६ ॥
लोकस्यदाश्रया पूजां करिष्यति तदा तव ।
पालनीयस्त्वया राजा युद्धेऽध्वनि तथा गृहे ॥ १७ ॥
तिर्यग्भावं समुत्सृज्य दिव्यं भावमनुस्मर ।
देवासुरे पुरा युद्धे श्रीगजस्त्रिदशैः कृतः ॥ १८ ॥
ऐरावणसुतः श्रीमानरिष्टो नाम वारणः ।
श्रीगजानान्तु तत् तेजः सर्व्वमेवोपतिष्ठते ॥ १९ ॥
तत्तेजस्तव नागेन्द्र दिव्यभावसमन्वितं ।
उपतिष्ठतु भद्रन्ते रक्ष राजानमाहवे ॥ २० ॥
इत्येवमभिषिक्तेनमारोहेत शुभे नृपः ।
तस्यानुगमनं कुर्युः सप्तप्रकृतयस्त्रजः ॥ २१ ॥
ग्रालाक्षसौ स्थण्डिलेऽग्रे दिक्पालादीन् यजेद्बहिः ।
केशरेषु बलं नागं भुवश्चैव सरस्वतीं ॥ २२ ॥
मध्येषु डिण्डिमं प्राच्यं गन्धमाल्यानुलेपनैः ।
कृत्वा देयन्तु कलसो रत्नपूर्णो द्विजाय च ॥ २३ ॥
गजाध्यक्षं हस्तिपञ्च गणितज्ञञ्च पूजयेत् ।
गजाध्यक्षाय तद्दद्यात् डिण्डिमं सोपि वादयेत् ।
शुभगम्भीरशब्दैः स्यात्प्रघनस्योऽभिवादयेत् ॥ २४ ॥

इत्याग्नेये महापुराणे गजशान्तिर्नाम नवत्यधिकद्विशततमोऽध्यायः ॥

---

१ कृत्वाऽमुष्मिन्निति ख०, ज०, अ० च।

अथैकनवत्यधिकद्विशततमोऽध्यायः।

———000———

गाव्यायुर्वेदः।

धन्वन्तरिरुवाच। गोविप्रपालनं कार्य्यं राज्ञा गोशान्तिमावदे।
गावः पवित्रा माङ्गल्या गोषु लोकाः प्रतिष्ठिताः॥ १॥
गव्यन्मूत्रं परं तासामलक्ष्मीनाशनं परं।
गवां कण्डूयनं वारि मृद्गस्याघौघमर्हनम्॥ २॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च रोचना।
षडङ्गं परमं पाने दुःस्वप्नाद्यादिवारणं॥ ३॥
रोचना विषरक्षोघ्नी ग्रासदः स्वर्गगो गवां।
यदृच्छहे दुःखिता गावः स याति नरकान्नरः॥ ४॥
परगोग्रासदः स्वर्गी गोहितो ब्रह्मलोकभाक्।
गोदानात्कीर्त्तनाद्दृष्ट्वा स्पृष्ट्वा क्षोद्धरते कुलम्॥ ५॥
गवां श्वासात् पवित्रा भूः स्वर्गनात्किल्बिषक्षयः।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्॥ ६॥
एकरात्रोपवासश्च पञ्चकमपि शोधयेत्।
सर्व्वाशुभविनाशाय पुराचरितमीश्वरैः॥ ७॥
प्रत्येकञ्च चरेदभ्यस्तं महासान्तपनं स्मृतं।
सर्वकामप्रदञ्चैतत् सर्व्वाशुभविमर्हनम्॥ ८॥
क्षपातिलक्षं पयसा दिवसानेकविंशतिं।
निर्मलाः सर्व्वकामाढ्या स्वर्गगाः सुवरोत्तमाः॥ ९॥

ब्राह्ममुष्णं पिबेन्मूत्रं ब्राह्ममुष्णं घृतं पिबेत् ।
ब्राह्ममुष्णं पयः पीत्वा वायुभक्षः परं ब्रह्म् ॥ १० ॥
तप्तकृच्छ्रव्रतं सर्व्वपापघ्नं ब्रह्मलोकदं ।
शीतैस्तु शीतकृच्छ्रं स्याद्ब्रह्मोक्तं ब्रह्मलोकदं ॥ ११ ॥
गोमूत्रेणाचरेत्स्नानं वृत्तिं कुर्य्याच्च गोरसैः ।
गोभिर्व्रजेच्च भुञ्जासु भुञ्जीताथ च गोव्रती ॥ १२ ॥
मासेनैकेन निष्पापो गोलोको स्वर्गगो भवेत् ।
विद्याच्च गोमतीं जप्ता गोलोकं परमं व्रजेत् ॥ १३ ॥
गीतैर्नृत्यैरप्सरोभिर्विमाने तत्र मोदते ।
गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः ॥ १४ ॥
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं परं ।
अन्नमेव परं गावो देवानां हविरुत्तमम् ॥ १५ ॥
पावनं सर्व्वभूतानां चरन्ति च वदन्ति च ।
हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि ॥ १६ ॥
ऋषीणामग्निहोत्रेषु गावो होमेषु योजिताः ।
सर्व्वेषामेव भूतानां गावः शरणमुत्तमं ॥ १७ ॥
गावः पवित्रं परमं गावो माङ्गल्यमुत्तमं ।
गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः ॥ १८ ॥
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ १९ ॥
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ॥ २० ॥

देवब्राह्मणगोसाधुसाध्वीभिः सकलं जगत् ।
धार्य्यते वै सदा तस्मात् सर्व्वे पूज्यतमा मताः ॥ २१ ॥
पिबन्ति येन तत्तोयं गङ्गाद्या गाव एव हि ।
गवां माङ्गल्यमूलं हि चिकित्सास्तु तथा शृणु ॥ २२ ॥
शृङ्गामयेषु धेनूनां तैलं दद्यात् ससैन्धवं ।
शृङ्गवेरबलामांसकल्कसिद्धं समाक्षिकं ॥ २३ ॥
कर्णशूलेषु सर्व्वेषु मञ्जिष्ठाहिङ्गुसैन्धवैः ।
सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः ॥ २४ ॥
विल्वमूलमपामार्गन्यातकी च सपाटला ।
कुटजस्तम्बमूलेषु लेपात्तत्कूलनाशनं ॥ २५ ॥
दन्तशूलहरैर्द्रव्यैर्घृतं राम विपाचितं ।
मुखरोगहरं ज्ञेयं जिह्वारोगेषु सैन्धवं ॥ २६ ॥
शृङ्गवेरं हरिद्रे द्वे त्रिफला च गलग्रहे ।
हृच्छूले वस्तिशूले च वातरोगे क्षये तथा ॥ २७ ॥
त्रिफला घृतमिश्रा च गवां पाने प्रशस्यते ।
अतीसारे हरिद्रे द्वे पाठाश्चैव प्रदापयेत् ॥ २८ ॥
सर्व्वेषु कोष्ठरोगेषु तथा शाखागदेषु च ।
शृङ्गवेरञ्च भार्गीञ्च कासे श्वासे प्रदापयेत् ॥ २९ ॥
दातव्या भस्मसन्धाने प्रियङ्गुर्लवणान्विता ।
तैलं वातहरं पित्ते मधुयष्टीविपाचितं ॥ ३० ॥
कफे व्योषञ्च समधु सपुष्टकरजोऽञ्जने ।
तैलाज्यं हरितालञ्च भस्मचूर्णितमुद्दिशेत् ॥ ३१ ॥
मासाश्चिलाः सगोधूमाः पयश्चीरं घृतं तथा ।

एषां पिण्डी सलवणा वत्सानां पुष्टिदात्रियं ॥ १२ ॥
बलप्रदा विषाणां स्यादग्रहनाशाय धूपकः ।
देवदारु वचा मांसी गुग्गुलुर्हिङ्गु सर्षपाः ॥ १३ ॥
ग्रहादिगदनाशाय एष धूपो गवां हितः ।
घण्टा चैव गवां कार्य्या धूपेनानेन धूपिता ॥ १४ ॥
अश्वगन्धातिलैः शुक्लं तेन गोः क्षीरिणी भवेत् ।
रसायनञ्च पिन्याकं मन्त्रो यो धार्य्यते गृहे ॥ १५ ॥
गवां पुरीषे पद्मस्थां नित्यं शान्त्यै श्रियं यजेत् ।
वासुदेवञ्च गन्धाद्यैरपरा शान्तिरुच्यते ॥ १६ ॥
अश्वयुक्शुक्लपक्षस्य पञ्चदश्यां यजेद्धरिं ।
हरिरुद्रमजं सूर्य्यं श्रियमग्निं घृतेन च ॥ १७ ॥
दधि सम्प्राश्य गाः पूज्य काल्यं वह्निप्रदक्षिणं ।
वृषाणां योजयेद् युद्धं गीतवाद्यरवैर्बहिः ॥ १८ ॥
गवान्तु लवणन्देयं ब्राह्मणानाञ्च दक्षिणा ।
नैमित्तिके माकरादौ यजेद्विष्णुं सह श्रिया ॥ १९ ॥
स्थण्डिलेऽे मध्यगते दिक्षु केशरगान् सुरान् ।
सुभद्राजो रविः पूज्यो बहुरूपो बलिर्बहिः ॥ ४० ॥
स्व विश्वरूपा सिद्धिश्च ऋद्धिः शान्तिश्च रोहिणी ।
दिग्धेनवो हि पूर्वाद्याः क्षीरदैश्चन्द्र ईश्वरः ॥ ४१ ॥
दिक्पालाः पद्मपत्रेषु कुम्भेष्वग्नौ च होमयेत् ।
क्षीरवृक्षस्य समिधः सर्षपाश्चततण्डुलान् ॥ ४२ ॥
शतं शतं सुवर्णञ्च कांस्यादिकं द्विजे ददेत् ।
गावः पूज्या विमोक्तव्याः शान्त्ये क्षीरादिसंयुताः ॥ ४३ ॥

अग्निरुवाच । शालिहोत्रः सुश्रुताय हयायुर्वेदमुक्तवान् ।
पालकाप्योऽङ्गराजाय गजायुर्वेदमब्रवीत् ॥ ४४ ॥

इत्याग्नेये महापुराणे शाल्यायुर्वेदो नामैकनवत्यधिक-द्विशततमोऽध्यायः ।

अथ द्विनवत्यधिकद्विशततमोऽध्यायः ।

—:०:—

मन्त्रपरिभाषा ।

अग्निरुवाच । मन्त्रविद्याहरिं वक्ष्ये भुक्तिमुक्तिप्रदं शृणु ।
विंशत्यर्णाधिका मन्त्रा मालामन्त्राः स्मृता द्विज ॥ १ ॥
दशाक्षराधिका मन्त्रास्तदर्वाग्बीजसंज्ञिताः ।
वार्द्धके सिद्धिदा ह्येते मालामन्त्रास्तु यौवने ॥ २ ॥
पञ्चाक्षराधिका मन्त्राः सिद्धिदाः सर्वदापरे ।
स्त्रीपुंनपुंसकत्वेन त्रिधाः स्युर्मन्त्रजातयः ॥ ३ ॥
स्त्रीमन्त्रा वह्निजायान्ता नमोन्ताश्च नपुंसकाः ।
शेषाः पुमांसस्ते शस्ता वश्योच्चाटविषेषु च(१) ॥ ४ ॥
क्षुद्रक्रियामयध्वंसे स्त्रियोऽन्यत्र(२) नपुंसकाः ।
मन्त्रावाग्नेयसौम्याख्यौ तारायन्तार्हयोजपेत् ॥ ५ ॥
तारान्त्याग्नेवियत्प्रायो मन्त्र आग्नेय इष्यते ।
शिष्टः सौम्यः प्रशस्तौ तौ कर्म्मणोः क्रूरसौम्ययोः ॥ ६ ॥

---

१ वश्योच्चाटवधेषु चेति ज० । २ स्त्रियो नापेति ज० ।

आग्नेयमन्त्रः सौम्यः स्यात्प्रायशोऽन्ते नमोऽन्वितः ।
सौम्यमन्त्रस्तथाग्नेयः फट्कारेणान्ततो युतः ॥ ७ ॥
सुप्तः प्रबुद्धमात्रो वा मन्त्रः सिद्धिं न यच्छति ।
ग्लापकालो महावाहो जागरो दक्षिणावहः ॥ ८ ॥
आग्नेयस्य मनोः सौम्यमन्त्रस्यैतद्विपर्ययात् ।
प्रबोधकालं जानीयादुभयोरुभयोरहः ॥ ९ ॥
दुष्टर्क्षराशिविद्वेषिवर्णादीन् वर्जयेन्मनून् ।
राज्यलाभोपकाराय प्रारभ्यारिः स्वरः कुरून् ॥ १० ॥
गोपालककुटीं प्रायात् पूर्णामित्युदिता लिपिः ।
नक्षत्रचक्रमाद्योक्ता स्वराक्ष्यो रेवतीयुजौ ॥ ११ ॥
वेला गुरुः स्वराः शोणः कर्मणेवेतिभेदिताः ।
लिप्यर्णा वह्निषु ज्ञेया षष्ठेशादींश्च योजयेत् ॥ १२ ॥
लिपौ चतुष्पथस्थायामाख्यवर्णपदान्तराः ।
सिद्धाः साध्या द्वितीयस्थाः सुसिद्धा वैरिणः परे ॥ १३ ॥
सिद्धादीन् कल्पयेदेवं सिद्धात्यन्तगुणैरपि(१) ।
सिद्धे सिद्धो जपात् साध्यो जपपूजादृतादिना(२) ॥ १४ ॥
सुसिद्धो ध्यानमात्रेण साधकं नाशयेदरिः ।
दुष्टार्णप्रचुरो यः स्यान्मन्त्रः सर्वविनिन्दितः ॥ १५ ॥
प्रविश्य विधिवद्दीक्षामभिषेकावमानिकाम् ।
श्रुत्वा तन्त्रं गुरोर्लब्ध्वा साधयेदीप्सितं मनुम् ॥ १६ ॥
धीरो दक्षः शुचिर्भक्तो जपध्यानादितत्परः ।

---

१ सिद्धाद्यन्तदशैरपीति ज० । २ जपपूर्णाक्षतादिनेति ज० ।

सिद्धसाधकौ कुशलस्तन्त्रज्ञः सत्यभाषणः ॥ १७ ॥
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ।
शान्तो दान्तः पटुर्वीर्णब्रह्मचर्यो हविष्यभुक् ॥ १८ ॥
कुर्वन्नाचार्यशुश्रूषां सिद्धीच्छाही स शिष्यकः ।
स तूपदेश्यः पुत्रश्च विनयी वसुदस्तथा ॥ १९ ॥
मन्त्रन्दद्यात् सुसिद्धौ तु सहस्रं दैशिकं जपेत् ।
यदृच्छया श्रुतं मन्त्रं छलेनाथ बलेन वा ॥ २० ॥
पत्रे स्थितञ्च गाथाञ्च जनयेद्यदनर्थकम् ।
मन्त्रं यः साधयेदेकं जपहोमार्चनादिभिः ॥ २१ ॥
क्रियाभिर्भूरिभिस्तस्य सिध्यन्ते स्वल्पसाधनात् ।
सम्यक्सिद्धैकमन्त्रस्य नासाध्यमिह किञ्चन ॥ २२ ॥
बहुमन्त्रवतः पुंसः का कथा शिव एव सः ।
दशलक्षजपादेकं वर्णी मन्त्रः प्रसिध्यति ॥ २३ ॥
वर्णलक्षा जपक्लासस्तेनान्येषां समूहयेत् ।
बीजाद्विगुणान्मन्त्रान्मालामन्त्रे जपक्रिया ॥ २४ ॥
सङ्ख्यानुक्तौ शतं साष्टं सहस्रं वा जपादिषु ।
जपाद्दशांशं सर्व्वत्र साभिषेकं हुतं विदुः ॥ २५ ॥
द्रव्यानुक्तौ हुतं होमे जपोऽशक्तस्य सर्व्वतः ।
मूलमन्त्राद्दशांशः स्यादङ्गादीनां जपादिकम् ॥ २६ ॥
जपात्सप्तगुणन्मन्त्रं कामदा मन्त्रदेवताः ।
साधकस्य भवेत् क्षमा ध्यानहोमार्चनादिना ॥ २७ ॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपे शतगुणः सहस्रो मानसः स्मृतः ॥ २८ ॥

प्राङ्मुखोऽवाङ्मुखो वापि मन्त्रकर्म्म समारभेत् ।
प्रणवाद्याः सर्व्वमन्त्रा वाग्यतो विहिताशनः ॥ २९ ॥
आसीनस्तु जपेन्मन्त्रान्देवताचार्य्यतुल्यधृक् ।
कुटीविविक्ता देशाः स्युर्देवालयनदीह्रदाः ॥ ३० ॥
सिद्धो यवागूपूपैर्व्वा पयो भक्ष्यं हविष्यकम् ।
मन्त्रस्य देवता तावत्(१) तिथिवारेषु वै जपेत् ॥ ३१ ॥
कृष्णाष्टमीचतुर्दश्योर्ग्रहणादौ च साधकः ।
दक्षो यमोऽनलो धाता शशी रुद्रो गुरुर्दितिः ॥ ३२ ॥
सर्पाः पितरोऽथ भगोऽर्यमा शीतेतरद्युतिः ।
त्वष्टा मरुत इन्द्राग्नी मित्रेन्द्रौ निर्ऋतिर्ज्जलम् ॥ ३३ ॥
विश्वेदेवा हृषीकेशो वायवः सलिलाधिपः ।
अजैकपादहिर्ब्रध्नः पूषाश्विन्यादिदेवताः ॥ ३४ ॥
अग्निर्दस्रावुमा निघ्नो नागश्चन्द्रो दिवाकरः ।
मातृदुर्गा दिशामीशः कृष्णो वैवस्वतः शिवः ॥ ३५ ॥
पञ्चदश्याः शशाङ्कस्तु पितरस्तिथिदेवताः ।
हरो दुर्गा गुरुर्विष्णुर्ब्रह्मा लक्ष्मीर्धनेश्वरः ॥ ३६ ॥
एते सूर्य्यादिवारेशा लिपिन्यासोऽथ कथ्यते ।
केशान्तेषु च हस्तेषु चक्षुषोः श्रवणद्वये ॥ ३७ ॥
नासागण्डोष्ठदन्तानां हे हे सूर्य्यादयोः क्रमात् ।
वर्णान् पञ्चस्वरवर्गाणां(२) बाहुचरणसन्धिषु ॥ ३८ ॥
पार्श्वयोः पृष्ठतो नाभौ हृदये च क्रमान्न्यसेत् ।

---

१ तारेति ख० । २ पञ्चस्वरवर्गाणामिति ख० ।

यादींश्च हृदये न्यस्येदेषां स्युः सप्तधातवः ॥ ३९ ॥
त्वगसृङ्मांसकस्नायुमेदोमज्जाशुक्राणि धातवः ।
वसाः पयो वासको लिख्यन्ते चैव लिपीश्वराः ॥ ४० ॥
श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्त्तिरमरेश्वरः ।
अग्नीशो भावभूतिश्च तिथीशः स्थानुको हरः ॥ ४१ ॥
दण्डीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः ।
अक्रूरश्च महासेनः शरण्या देवता अमूः ॥ ४२ ॥
ततः क्रोधीशचण्डौ च पञ्चान्तकशिवोत्तमौ ।
तथैव रुद्रकूर्मौ च त्रिनेत्रौ चतुराननः ॥ ४३ ॥
अजेशः सर्पसोमेशौ तथा लाङ्गलिदारुकौ ।
अर्द्धनारीश्वरश्चोमा कान्तश्चाषाढिदण्डिनौ ॥ ४४ ॥
अदितिर्दीनश्च मेषश्च लोहितश्च शिखी तथा ।
छगलण्डद्विरण्डौ द्वौ समहाकालवालिनौ ॥ ४५ ॥
भुजङ्गश्च पिनाकी च खड्गीशश्च बकः पुनः ।
श्वेतो भृगुर्लगुडीशाश्चश्च सम्वर्त्तकः स्मृतः ॥ ४६ ॥
रुद्राश्चमग्नान् लिख्यादीन् नमोन्तान् विन्यसेत् क्रमात् ।
अङ्गानि विन्यसेत्सर्व्वे मन्त्राःसाङ्गास्तु सिद्धिदाः ॥ ४७ ॥
हृल्लेखाव्योमसपूर्व्वाण्येतान्यङ्गानि विन्यसेत् ।
हृदादीन्यङ्गमन्त्रान्तैर्यो जपेद्धृदये नमः ॥ ४८ ॥
स्वाहा शिरस्यथ वषट्शिखायां कवचे च हुं ।
वौषट् नेत्रेऽस्त्राय फट्स्यात् पञ्चाङ्गं नेत्रवर्जितम् ॥ ४९ ॥
निरङ्गस्यात्मना षाङ्गं न्यसेन्मन्त्रियुतं जपेत् ।
क्रमाभ्यां देवीं वागीशीं यथोक्तांस्तु तिलान् हुनेत् ॥ ५० ॥

लिपिदेवी साक्षसूत्रकुक्षपुस्तकपद्मधृक्।
कवित्वादि प्रयच्छेत कर्म्मादौ सिद्धये न्यसेत्।
निष्कविर्निर्म्मलः सर्व्वे मन्त्राः सिध्यन्ति मादृशि: ॥५१॥

इत्याग्नेये महापुराणे मन्त्रपरिभाषा नाम त्रिनवत्यधिक-
द्विशततमोऽध्यायः।

अथ त्रिनवत्यधिकद्विशततमोऽध्यायः।

नागलक्षणानि।

अग्निरुवाच। नागादयोऽथ भावादिदशसंख्यानानि कर्म्म च।
सूतकं दष्टचेष्टेति सप्तलक्षणमुच्यते ॥ १ ॥
शेषवासुकितक्षाख्याः कर्कटोऽब्जो महाब्जः।
शङ्खपालश्च कुलिक इत्यष्टौ नागवर्य्यकाः ॥ २ ॥
दशाष्टपञ्चत्रिगुणशतमूर्द्धान्विता क्रमात्।
विप्रो नृपो विशो शूद्रो द्वौ द्वौ नागेषु कीर्त्तितौ ॥ ३ ॥
तदन्वयाः पञ्चशतं तेभ्यो जाता असंख्यकाः।
फणिमण्डलिराजीलवातपित्तकफात्मकाः ॥ ४ ॥
व्यन्तरा दीर्घमिश्रास्ते सर्पा दर्व्वीकराः स्मृताः।
रक्ताङ्गलाङ्गलच्छत्रस्वस्तिकाङ्गधारिणः(१) ॥ ५ ॥
गोनसा मन्दगा दीर्घा मण्डलैर्विविधैर्युताः(२)।

---

१ रक्ताङ्गलाङ्गलच्छत्रस्वस्तिकाङ्गधारिण इति ख०। २ युता इति ख०।

राजिलाश्चित्रिताः स्निग्धास्तीर्थगूर्धश्च वाजिभिः ॥ ६ ॥
व्यन्तरा मिश्रचिह्नाश्च भूवर्णाज्ञेयवायवः।
चतुर्विधास्ते षड्विंशभेदाः षोढ़श गोनसाः ॥ ७ ॥
त्रयोदश च राजीला व्यन्तरा एकविंशतिः।
येऽनुल्बणाले जायन्ते सर्पास्ते व्यन्तराः स्मृताः ॥ ८ ॥
आषाढादित्रिमासैः स्याद्गर्भो माघचतुष्टये।
अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते ॥ ९ ॥
सर्पा ग्रसन्ति सूतोधान् विना स्त्रीपुत्रपुंसकान्।
उन्मीलतेऽक्षि सप्ताहात् क्षणो मासाद्वेहहिः ॥ १० ॥
द्वादशाहात् सुबोधः स्यात् दन्ताः स्युः सूर्यदर्शनात्।
द्वात्रिंशद्दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः ॥ ११ ॥
करालो मकरो कालरात्री च यमदूतिका।
एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः ॥ १२ ॥
यन्मासान्मुच्यते क्षत्तिं जोवेत्सष्टिसमाहयं।
नागाः सूर्य्यादिवारेशाः सप्त उक्ता दिवा निशि ॥ १३ ॥
खेषां षट् प्रतिवारेषु कुलिकः सर्व्वसन्धिषु।
शक्रेण वा मन्दजेन सह तस्योदयोऽथवा ॥ १४ ॥
द्वयोर्व्वा नाडिकामन्त्यमन्त्यकं(१) कुलिकोदयः।
दुष्टः स कालः सर्व्वत्र सर्पदंशे विशेषतः(२) ॥ १५ ॥
कृत्तिका भरणी स्वाती मूलं पूर्व्वत्रयाश्विनी।
विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी ॥ १६ ॥
हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः।

---

१ नाडिकामाषनन्त्यकमिति अ०। २ विशिष्टमेदिनि क०, ख०, ग०, ट० घ।

षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्थ्यौ ॥ १७ ॥
सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः ।
एकद्विबहवो दंशा दृष्टविद्धश्च खण्डितम् ॥ १८ ॥
अदंशमवगुप्तं(१) स्यादंशमेवं चतुर्विधम् ।
त्रयो हेयकृता दंशा वेदना रुधिरोल्बणा ॥ १९ ॥
नक्तञ्चेकाङ्घ्रिकूर्म्याभा दंशाश्च यमचोदिताः ।
दीर्घौपिपीलिकास्पर्शौ कण्ठगोत्थरुजान्वितः(२) ॥ २० ॥
सतोदो ग्रन्थितो दंशः सविषो न्यस्तनिर्विषः ।
देवालये शून्यगृहे वल्मीकोद्यानकोटरे ॥ २१ ॥
रथ्यासन्धौ श्मशाने च नद्याश्च सिन्धुसङ्गमे ।
द्वीपे चतुष्पथे सौधे गृहेऽजे पर्वतात्रतः ॥ २२ ॥
विलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके ।
शिग्रुश्लेष्मातकाक्षेषु जम्बू डुम्बरणेषु च ॥ २३ ॥
वटे च जीर्णप्राकारे खास्यक्षुत्कक्षजन्तुषि ।
तालौ गण्डे गले मूर्ध्नि चिबुके नाभिपाद्योः ॥ २४ ॥
दंशोऽशुभः शुभो दूतः पुष्पहस्तः सुवाक् सुधीः ।
लिङ्गवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः ॥ २५ ॥
अपद्वारगतः शस्त्री प्रमादी भुग्नतेक्षणः ।
विवर्णवासाः पाशादिहस्तो गद्गद्वर्णभाक् ॥ २७ ॥
शुष्ककाष्ठाश्रितः खिन्नस्खलल्लकरांशुकः ॥ २५ ॥
आर्द्रवासाः क्षणरक्तपुष्पयुक्तशिरोरुहः ।
कुचमर्दी नखच्छेदी गुदस्पृक् पादलेखकः ।

---

१ अदंशमवगुप्तमिति अ० । २ कण्ठगोपरजान्वित इति अ० ।

केशमुखौ तृणच्छेदौ दुष्टा दूतास्त्रयैकगः ॥ २८ ॥
दृङ्मान्या वा वहेद्धेधा यदि दूतस्य चाक्षतः ।
आभ्यां द्वाभ्यां पुष्टयाद्यान् विद्यास्त्रीपुन्नपुंसकान् ॥ २९ ॥
दूतः स्मृशति यद्गात्रं तस्मिन् दंशमुदाहरेत् ।
दूताङ्गिवलनं दुष्टमुत्थितिर्निश्चला शुभा ॥ ३० ॥
जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः ।
जीवो गतागतैर्दुष्टः शुभो दूतनिवेदने ॥ ३१ ॥
दूतस्य वाक् प्रदुष्टा सा पूर्वमाजार्धनिन्दिता ।
विभक्तैस्तस्य वाक्यान्तैर्विषमैर्विषकालता ॥ ३२ ॥
आद्यैः स्वरैश्च काद्यैश्च वर्गैर्भिन्नलिपिर्द्विधा ।
स्वरजो वसुमान्वर्गी इतिचेपा च मातृका ॥ ३३ ॥
वाताग्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम् ।
नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः ॥ ३४ ॥
दुष्टो दूतस्य वाक्पादौ वाताग्नी मध्यमो हरिः ।
प्रशस्ता वारुणा वर्णा अतिदुष्टा नपुंसकाः ॥ ३५ ॥
प्रस्थाने मङ्गलं वाक्यं गर्जितं मेघहस्तिनोः ।
प्रदक्षिणं फले वृक्षे वामस्य च कृतं जितं ॥ ३६ ॥
शुभा गीतादिशब्दाः स्युरीहितं स्यादसिद्धये ।
अनर्थगौरथाक्रन्दो दक्षिणे विकृतं श्रुतम् ॥ ३७ ॥
वेश्या श्रुतौ नृपः कन्या गौर्हन्ती सुरजध्वजौ ।
क्षीराज्यदधिगङ्गाम्बु छत्रं भेरी फलं सुराः ॥ ३८ ॥
तण्डुला हेम फल्यश्च सिद्धयेऽभिमुखा अमी ।
सकाष्ठः सानलः कारुर्मलिनाम्बरभावहृत् ॥ ३९ ॥

गलस्थटङ्को गोमायुगृध्रीलूककपर्दिकाः।
तैलं कपालकार्पासा निषेधे भस्म नष्टये ॥ ४० ॥
विषरोगाश्च सप्त स्युर्धातोर्धात्वन्तरागितः।
विषदंशी ललाटं यात्यतोनेत्रं ततो मुखम्।
आस्याच्च वचनीनाडीं धातून् प्राप्नोति हि क्रमात् ॥४१॥

इत्याग्नेये महापुराणे नागलक्षणादिर्नाम त्रिनवत्यधिक द्विशततमोऽध्यायः।

अथ चतुर्नवत्यधिकद्विशततमोऽध्यायः।

—ooo—

दष्टचिकित्सा।

अग्निरुवाच। मन्त्रध्यानौषधैर्दष्टचिकित्सां प्रवदामि ते।
ॐ नमो भगवते नीलकण्ठायेति।
जपनाद्विषहानिः स्यादौषधं जीवरक्षणं ॥ १ ॥
साज्यं सक्षद्रसं पेयं द्विविधं विषमुच्यते।
जङ्गमं सर्पमूषादि शृङ्गयादि स्थावरं विषं ॥ २ ॥
शान्तस्वरान्वितो ब्रह्मा लोहितं तारकं(१) शिवः।
वियतेर्नाममन्त्रोऽयं तार्क्ष्यः शब्दमयः स्मृतः ॥ ३ ॥
ॐ ज्वल महामते हृदयाय गरुडविरालशिरसे(२) गरुडग्नि-
खाये गरुड विषभञ्जन प्रभेदन प्रभेदन विनाशय विनाशय विम-

---

१ तारकः इति ख०। २ गरुडविलाशशिरसे इति ख०।

ईय विमर्दय कवचाय अप्रतिहतशासनं वं ह्रूं फट् अस्त्राय उग्र-रूपधारक सर्वभयङ्कर भीषय सर्वं दह दह भस्मीकुरु कुरु स्वाहा नेत्राय।

सप्तवर्गान्तयुग्माष्टदिग्दलस्थर केशरादिवर्णरञ्जं वह्निराभूत-कर्णिकं मालतीप्रसूनजं।

ज्ञात्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत्।
अङ्गुष्ठादौ न्यसेद्वर्णान्वियतेर्भेदिताः कलाः(१)॥ ४॥
पीतं वज्रचतुष्कोणं पार्थिवं ब्रह्मदैवतं।
हृत्तार्धमाप्यपद्मार्धं शुक्लं वरुणदैवतं॥ ५॥
त्र्यस्रं स्वस्तिकयुक्तञ्च तैजसं वह्निदैवतं।
वृत्तं विन्दुयुतं वायुदैवतं कृष्णमालिनम्॥ ६॥
अङ्गुष्ठाद्यङ्गुलीमध्ये पर्व्वस्तेषु स्ववेश्मसु।
सुवर्णनागवाहेन वेष्टितेषु न्यसेत् क्रमात्॥ ७॥
वियतेश्चतुरो वर्णान् सुमण्डलसमत्विषः।
अरूपे रक्तमाभे(२) आकाशेग्निवदेवते॥ ८॥
कनिष्ठामध्यपर्व्वस्थे न्यसेत्तस्याद्यमक्षरम्।
नागानामादिवर्णांश्च स्वमण्डलगताञ्न्यसेत्॥ ९॥
भूतादिवर्णान् विन्यसेदङ्गुष्ठाद्यन्तपर्वसु।
तन्मात्रादिगुणाभ्यर्णानङ्गुलीषु न्यसेद्बुधः॥ १०॥
स्वर्णनादेवतार्च्चेण हस्ते हृन्मादिहृदयं।
मण्डलादिषु तान् वर्णान् वियतेः कवयो जिताः। ११॥
ज्येष्ठाङ्गुलिभिर्हृनाभिस्थानेषु पर्वसु।

---

१ भेदिताश्चेति च०। २ रक्तमाभे इति च०।

आजानुतः सुवर्णाभमानाभेस्तद्विनग्नभम् ॥ १२ ॥
कुङ्कुमारुणमाकण्ठादाकेशान्तात् सितेतरं ।
ब्रह्माण्डव्यापिनं तार्क्ष्यचन्द्राख्यं नागभूषणम् । १३ ॥
नीलोग्रनागमात्मानं महापद्मं स्मरेद्बुधः ।
एवन्तार्क्षमनो वाक्यान्मन्त्रः स्यान्मन्त्रिणो विषे ॥ १४ ॥
सृष्टिस्तार्क्षकरस्यान्तःस्थिताङ्गुष्ठविषापहा ।
तार्क्षं हस्तं समुद्यम्य तत्पद्माङ्गुलिचालनात् ॥ १५ ॥
कुर्य्याद्विषस्य स्तम्भादींस्तदुक्तमदवीर्यया ।
आकाशादेष भूबीजः पद्मार्णाधिपतिर्मनुः ॥ १६ ॥
संस्तम्भयेतिविषतो भावया स्तम्भयेद्विषम् ।
व्यस्तभूषया बीजो मन्त्रोऽयं साधुसाधितः ॥ १७ ॥
संभवः भावय यमः(१) शब्दाद्यः संहरेद्विषं ।
दष्टमुत्थापयेदेष सुजलाम्भोऽभिषेकतः ॥ १८ ॥
सुजलग्रहभेर्य्यादिनिस्वनश्रवणेन वा ।
संदष्टस्येव संयुक्तो भूतेजोव्यत्ययात् स्थितः ॥ १९ ॥
भूवायुव्यत्ययान्मन्त्रो विषं संक्रामयत्यसौ ।
अन्तस्थो निजवेश्मस्थो बीजाम्भोदुग्धलाक्षभिः ॥ २० ॥
एतत् कर्म नयेन्मन्त्री गरुडाकृतिविग्रहः ।
तार्क्षवरुणगेहस्थस्तत्प्रपात्रायवेद्विषम् ॥ २१ ॥
जानुदघ्नोदमुद्दितं स्वधास्त्रीबीजलाञ्छितं ।
स्नानपानात्तर्व्विषं ज्वरारोगापमृत्युजित् ॥ २२ ॥
पचि पचि महापचि महापचि विधि स्वाहा ।

---

१ यम इति अ० ।

पचि पचि महापचि महापचि चि चि स्वाहा ।

द्वावेतौ पचिराड्मन्त्रौ विषव्याधिनिमर्दनात् ।

पचिराजाय विद्महे पचिदेवाय धीमहि तन्नो गरुड़ प्रचोदयात् ।

वह्निस्त्री पार्श्वतत्पूर्वौ दन्तत्रीवौ च दक्षिणौ ॥ २३ ॥

सकाणौ खाङ्गणौ चेति नीलकण्ठाख्यमीरितं ।

वज्रःकण्ठग्निजायेतं व्यसेत्स्वाभे सुखंस्मृतो ॥ २४ ॥

हर हर रुद्रदयाय नमः कपर्दिने च शिरसे नीलकण्ठाय वै शिखां कालकूटविषभक्षणाय स्वाहा ।

अथ वर्म च कण्ठे नेत्रं शक्तिवासाक्षिनेभं पूर्वाद्यैराननैर्युक्तं श्वेतपीतारुणासितैः ।

अभयं वरदं चापं वासुकिञ्च दधद्भुजैः ।

यज्ञोपवीतपार्श्वस्थगौरीरुद्रोऽस्य देवता ॥ २५ ॥

पादजानुगुह्यनाभिहृत्कण्ठाननमूर्धसु ।

मन्त्रार्णान्यस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥ २६ ॥

तर्जन्यादितदन्तासु सर्वमङ्गुष्ठयोर्न्यसेत् ।

ध्यात्वैवं संहरेत् क्षिप्रं वह्नया मूलमुद्रया ॥ २७ ॥

कनिष्ठा ज्येष्ठया वद्धा तिस्रोऽन्याः प्रसृतेर्ज्वलाः ।

विषनाशे वामहस्तमन्यस्मिन् दक्षिणं करं ॥ २८ ॥

ॐ नमो भगवते नीलकण्ठाय चिः अमलकण्ठाय चिः ।

सर्वभूतकण्ठाय चिः चिप ॐ स्वाहा ।

अमलनीलकण्ठाय नैकसर्वविषापहाय ।

नमस्ते रुद्रमन्यव इतिसर्वार्णनादिकं विनश्यति न सन्देहः

कर्षजाप्या उपानहौ ।

यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ।
विषव्याधिविनाशः स्यात् कृत्वा रुद्रविधानकं ॥ २८ ॥

इत्याग्नेये महापुराणे दृष्टचिकित्सा नाम चतुर्णवत्यधिकद्विशततमोऽध्यायः ॥

अथ पञ्चनवत्यधिकद्विशततमोऽध्यायः ।

पञ्चाङ्गरुद्रविधानं ।

अग्निरुवाच । वक्ष्ये रुद्रविधानन्तु पञ्चाङ्गं सर्व्वदं परं ।
हृदयं शिवसङ्कल्पः शिवः सूक्तन्तु पौरुषम् ॥ १ ॥
शिखाभ्यः सम्भृतं सूक्तमाहुः कवचमेव च ।
शतरुद्रियमस्त्रञ्च रुद्रस्याङ्गानि पञ्च हि ॥ २ ॥
पञ्चाङ्गाद्यस्य तं ध्यात्वा जपेद्रुद्रांस्ततः क्रमात् ।
यज्जाग्रत इति सूक्तं यष्टचं मानसं विदुः ॥ ३ ॥
ऋषिः स्याच्छिवसङ्कल्पस्त्रिष्टुबुदाहृतं ।
शिवः सहस्रशीर्षेति तस्य नारायणोऽप्यृषिः ॥ ४ ॥
देवता पुरुषोऽनुष्टुप्छन्दो ध्येयश्च चैष्टुभम् ।
अघ्यवसम्भृतं सूक्तमृषिरुत्तरगौनरः(१) ॥ ५ ॥
आद्यानान्तिसृणां त्रिष्टुप्छन्दोऽनुष्टुवुत्तरयोरपि ।

---

१ उत्तरगौनस इति ज०, ट० च ।

छन्दस्त्रैष्टुभमन्त्यायाः पुरुषोऽस्यापि देवता ॥ ६ ॥
आशुरिन्द्रो हादश्यानां छन्दस्त्रिष्टुवुदाहृतं ।
ऋषिः प्रोक्तः प्रतिरथः सूक्ते सप्तदशार्चके ॥ ७ ॥
पृथक् पृथक् देवताः स्युः पुरुषविदङ्गदेवता ।
अवशिष्टदैवतेषु छन्दोऽनुष्टुवुदाहृतं ॥ ८ ॥
असौ यमो भवित्रीन्द्रः पुरुषलिङ्गोक्तदेवताः(१) ।
पङ्क्तिश्छन्दोऽथ मन्त्राणि त्वपलिङ्गोक्तदेवताः ॥ ९ ॥
रौद्राध्याये च सर्वस्मिन्नार्षं स्यात् परमेष्ठ्यपि ।
प्रजापतिर्वा देवानां कुत्सस्य तिसृणां पुनः ॥ १० ॥
मनोहयोरुमैका स्याद्रुद्रो रुद्रास्य देवताः ।
आद्यानुवाकोऽथ पूर्व्य एकरुद्राख्यदैवतः ॥ ११ ॥
छन्दो गायत्रमाद्याया अनुष्टुप् तिसृणामृचाम् ।
तिसृणाञ्च तथा पङ्क्तिरनुष्टुवथ संस्मृतम् ॥ १२ ॥
द्वयोश्च जगतीछन्दो रुद्राणामप्यशीतयः ।
हिरण्यबाहवस्तिस्रो नमो वः किरिकाय च ॥ १३ ॥
पञ्चर्ची रुद्रदेवाः स्युर्मन्त्रे रुद्रानुवाककः(२) ।
विंशके रुद्रदेवास्ताः प्रथमा बृहती स्मृता ॥ १४ ॥
ऋग्द्वितीया त्रिजगती तृतीया त्रिष्टुबेव च ।
अनुष्टुभो यजुस्तिस्र आर्ष्यादिस्रः सुसिद्धिभाक् ॥ १५ ॥
त्रैलोक्यमोहनेनापि विषव्याधरिमर्दनं(३) ।

---

१ असौ यमो भवित्रीन्द्रः पुरुषलिङ्गोक्तदेवतेति ख० ।
२ रुद्रानुवाचक इति ज०, ट० च ।
३ विषव्याधिविमर्दनमिति ज० ।

ह्रूं श्रीं क्ष्रौं क्ष्रौं ह्रूं(१) त्रैलोक्यमोहनाय विष्णवे नमः ।
अनुष्टुभं नृसिंहेन विषव्याधिविनाशनं ॥ १६ ॥
ॐ ह्रूं ह्रूं(२) उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युनमाम्यहं ॥ १७ ॥
अयमेव तु पद्माङ्को मन्त्रः सर्वार्थसाधकः ।
द्वादशाष्टाक्षरो मन्त्रो विषव्याधिविमर्दनौ ॥ १८ ॥
कुलिका त्रिपुरा गौरी चन्द्रिका(३) विषहारिणी ।
प्रसादमन्त्रो विषहृदायुरारोग्यवर्द्धनः ।
सौरो विनायकस्त्वद्रुद्रमन्त्राः सदाखिलाः ॥ १९ ॥

इत्याग्नेये महापुराणे पद्माङ्करुद्रविधानंनाम षण्ण-
नवत्यधिकद्विशततमोऽध्यायः ॥

अथ षण्णनवत्यधिकद्विशततमोऽध्यायः ।

000

विषहृन्मन्त्रौषधं ।

अग्निरुवाच । ओं नमो भगवते रुद्राय क्षिन्द २ विषं ज्वलितपरशुपाणये च । नमो भगवते पश्चिमरुद्राय दष्टकं उत्थापय २ दष्टकं कम्पय २ जल्पय २ सर्व्वदष्टमुत्थापय ललं २ बन्ध २ मोचय २ वररुद्र गच्छ २ बध २ त्रुट २ वुक २ भीषय २ मुष्टिना संहर विषं ठ ठ ।

---

१ ॐ ह्रां श्रीं ह्रूमिति अ० ।
२ ॐ क्ष्रौं क्ष्रौं ह्रूं इति अ० ।
३ चण्डिका इति अ० ।

पञ्चिरुद्रेण हृ विषं नाशमायाति मन्त्रणात् ।

ॐ नमो भगवते रुद्र नाशय विषं स्थावरजङ्गमं कृत्रिमाकृत्रिमविषमुपविषं नाशय नानाविषं दृष्टकविषं नाशय धम २ दम २ वम २ मेघान्धकारधाराकर्षनिर्विषयीभव संहर २ गच्छ२ आवेशय २ विषोत्थापनरूपं मन्त्रान्ताद्विषधारणं ॐ क्षिप ॐ क्षिप स्वाहा ।

ॐ क्रां क्रीं खीं सः ठन्द्रौं क्रौं ठः ।

जपादिना साधितस्तु सर्पान् बध्नाति नित्यशः ॥ १ ॥

एकद्वित्रिचतुर्बीजः कृष्णचक्राङ्कपञ्चकः ।

गोपीजनवल्लभाय स्वाहा सर्वार्थसाधकः ॥ २ ॥

ओं नमो भगवते रुद्राय प्रेताधिपतये गुल्ल २(१) गर्ज्ज २ भ्रामय २ मुञ्च २ मुञ्च २ कट २ आविश २ सुवर्णपतङ्ग रुद्रो ज्ञापयति ठ २ ।

पातालचौभमन्त्रोयं मन्त्रणाद्विषनाशनः ।

दंशकाद्विदंशे सद्यो दष्टः काष्ठग्निलादिना ॥ ३ ॥

विषशान्त्यै दहेद्दंशं ज्वालकोकनदादिना(२) ।

गिरीषबीजपुष्पार्कक्षीरबीजकटुत्रयं ॥ ४ ॥

विषं विनाशयेत् पानलेपनेनाञ्जनादिना ।

गिरीषपुष्पस्य रसभावितं मरिचं सितं ॥ ५ ॥

पाननस्याञ्जनाद्यैश्च विषं हन्यान्न संशयः ।

कोषातकीवचाद्विङ्ग गिरीषार्कपयोयुतं ॥ ६ ॥

---

१ गुल्ल २ इति अ० ।

२ ज्वालको कलदादिनेति अ० ।

कुटुम्बयं समेषाभो हरेन्नस्यादिना विषं ।
रामठेक्ष्वाकुसर्वाङ्गचूर्णं नस्यादिषापहं ॥ ७ ॥
इन्द्रबलाग्निकन्द्रोणं तुलसी देविका सहा ।
तद्रसाक्तं त्रिकटुकं चूर्णभक्ष्यविषापहं ।
पक्षाङ्गं कृष्णपक्षम्यां गिरीषस्य विषापहं ॥ ८ ॥

इत्याग्नेये महापुराणे विषघ्नमन्त्रौषधं नाम षन्नवत्यधिक-द्विशततमोऽध्यायः ।

अथ सप्तनवत्यधिकद्विशततमोऽध्यायः ।

गोनसादिचिकित्सा ।

अग्निरुवाच । गोनसादिचिकित्साञ्च वशिष्ठ शृणु वच्मि ते ।
क्रौं क्रौं अमलपत्रि स्वाहा ।
ताम्बूलखादनान्मन्त्री हरेन्मण्डलिनो विषं ॥ १ ॥
लशुनं रामठफलं कुष्ठाग्निव्योषकं विषे ।
स्नुहीक्षीरं गव्यघृतं पक्वं पीत्वाऽहिजे विषे ॥ २ ॥
अथ राजिलदष्टे च पेया कृष्णा ससैन्धवा ।
आज्यक्षौद्रशक्तोयं पुरीतत्या विषापहं ॥ ३ ॥
सकृष्णाखण्डदुग्धाज्यं पातव्यन्तेन माक्षिकं ।
व्योषं पिप्पलिं विडालास्थि नकुलाङ्गरजैः समैः ॥ ४ ॥
चूर्णितैर्मेषदुग्धाक्तैर्धूपः सर्वविषापहः ।

रोमनिर्गुण्डिकाकोलवर्षैर्वा लशुनं समं ॥ ५ ॥
मुनिपत्रैः क्षतक्षेदं दष्टं काश्मिकपाचितैः ।
मूषिकाः षोडश प्रोक्ता रसक्षारासजम्भिवेत् ॥ ६ ॥
सतैलं मूषिकार्त्तिघ्नं फलिनीकुसुमन्तथा ।
सनागरगुडश्चास्यं तद्विषारोचकापहं ॥ ७ ॥
चिकित्सा विंशतिर्भूता लूताविषहरो गणः ।
पद्मकं पाटली कुष्ठं नतमूशीरचन्दनं ॥ ८ ॥
निर्गुण्डी शारिवा शैलु लूतार्त्तं सेचयेज्जलैः ।
गुञ्जानिर्गुण्डिकक्षीलपर्णं शुण्ठी निशाद्वयं ॥ ९ ॥
करञ्जास्थि च तत्पङ्कैः(१) दृश्चिकार्त्तिहरं नृणं ।
मञ्जिष्ठा चन्दनं व्योषपुष्पं शिरीषकोशुदं ॥ १० ॥
संयोज्यायतुरो योगा लेपादौ दृश्चिकापहाः ।

ॐ नमो भगवते रुद्राय चिवि २(२) छिन्द २ किरि २ भिन्द २ खड्गेन छेदय २ शूलेन भेदय २ चक्रेण दारय २ ॐ फूँ फट् ।

मन्त्रेण मन्त्रितो देयो गर्भभादौविलन्तति ॥ ११ ॥
त्रिफलोशीरमुस्ताम्बुमांसीपद्मकचन्दनं ।
अजाक्षीरेण पानादेर्गर्भादेर्विषं हरेत् ॥ १२ ॥
हरेत् शिरीषपञ्चाङ्गं व्योषं शतपदीविषं ।
सकन्धरं शिरीषास्थि हरेदुन्दूरजं विषं ॥ १३ ॥
व्योषं ससर्पिः पिष्टीतमूलमस्य विषं हरेत् ।

---

१ तत्पङ्केरिति ज०; अ०, ढ० च ।

२ चिरि २ इति ज० ।

क्षारव्योषवचाडिङ्गविडङ्गं सैन्धवव्रतं ॥ १४ ॥
अम्बष्ठातिबलाकुष्ठं सर्वकीटविषं हरेत् ।
यष्टिव्योषगुडक्षीरयोगः(१) शूनो विषापहः ॥ १५ ॥
ॐ सुभद्रायै नमः ॐ सुप्रभायै नमः ।
यान्यौषधानि गृह्यन्ते विधानेन विना जनैः ॥ १६ ॥
तेषां बीजक्रिया प्राप्तमिति ब्रह्माऽब्रवीच्च ताम् ।
ताम्रगम्यौषधीम्यस्यात् यवान् प्रक्षिप्य मुष्टिना ।॥ १७॥
दग्ध जह्मा मन्त्रमिदं नमस्कृत्यास्यौषधं ।
त्वामुदराम्यूर्ध्वनेत्रामनेनैव च भक्षयेत् ॥ १८ ॥
नमः पुरुषसिंहाय नमो गोपालकाय च ।
आत्मनैवाभिजानाति रणे कृष्णपराजयं ॥ १९ ॥
एतेन सत्यवाक्येन अगदो मेऽस्तु सिध्यतु ।
नमो वैदूर्यमाते तत्र २ रक्ष मां सर्वविषेभ्यो गौरि गान्धारि चाण्डालि मातङ्गिनि स्वाहा हरिमाये।
औषधादौ प्रयोक्तव्यो मन्त्रोऽयं स्थावरे विषे ॥ २० ॥
भुक्तमात्रे स्थिते ज्वाले पद्मं गोतास्व सेवितं ।
पाययेत्सघृतं क्षौद्रं विषच्छेत्तदनन्तरं ॥ २१ ॥

इत्याग्नेये महापुराणे गोनसादिचिकित्सा नाम सप्तनवत्यधिकद्विशततमोऽध्यायः ।

---

१ यष्टिव्योषगुडक्षीरयोग इति क०, ज०, ञ०, ट० च।

अथाष्टनवत्यधिकद्विशततमोऽध्यायः ।

———000———

बालग्रहहरबालतन्त्रम् ।

अग्निरुवाच । बालतन्त्रं प्रवक्ष्यामि बालादिग्रहमर्दनं ।
अथ जातदिने वत्सं ग्रही गृह्णाति पापिनी ॥ १ ॥
गात्रोद्वेगो निराहारो नानाग्रीवाविवर्त्तनं ।
तच्चेष्टितमिदं तत्स्यान्मातृणाञ्च बलं हरेत् ॥ २ ॥
मत्स्यमांससुराभक्ष्यगन्धस्रग्धूपदीपकैः ।
लिम्पेच्च धातकीलोध्रमञ्जिष्ठातालचन्दनैः ॥ ३ ॥
महिषाक्षेण धूपयेद्विरात्रे भीषणो ग्रही ।
तच्चेष्टा कासनिश्वासो गात्रसङ्कोचनं मुहुः ॥ ४ ॥
आजमूत्रैर्लिपेत् क्षणासेव्यापामार्गचन्दनैः ।
गोशृङ्गदन्तकेशैश्च धूपयेत् पूर्ववद्बलिः ॥ ५ ॥
ग्रही त्रिरात्रे घण्टाली तच्चेष्टा क्रन्दनं मुहुः ।
जृम्भणं स्खलितश्वासो गात्रोद्वेगमरोचनं ॥ ६ ॥
केशराश्वनगोहस्तिदन्तं साजपयो लिपेत् ।
नखराजीविल्वदलैर्धूपयेच्च बलिं हरेत् ॥ ७ ॥
ग्रही चतुर्थी काकोली गात्रोद्वेगप्ररोचनं ।
फेनोद्गारो दिशो दृष्टिः कुल्माषैः सासवैर्बलिः ॥ ८ ॥
गजदन्ताहिनिर्मोकवाजिमूत्रप्रलेपनं ।
मराजीनिम्बपत्रेण धूतकेशेन धूपयेत् ॥ ९ ॥
हंसाधिका पञ्चमी स्याज्जृम्भाश्वासोर्द्धधारिणी ।

मुष्टिबन्धश्च तच्चेष्टा बलिं मत्स्यादिना हरेत् ॥ १० ॥
मेषशृङ्गबलालोध्रशिलातालैः शिशुं लिपेत् ।
फट्कारी तु ग्रही षष्ठी भयमोहप्ररोदनं ॥ ११ ॥
निराहारोऽङ्गविक्षेपो हरेन्मत्स्यादिना बलिं ।
राजीगुग्गुलुकुष्ठैभदन्त्याद्यैर्धूपलेपनैः ॥ १२ ॥
सप्तमे मुक्तकेशश्चार्त्तः पूतिगन्धो विजृम्भणं ।
सादः प्ररोदनश्वासो धूपो व्याघ्रनखैर्लिपेत् ॥ १३ ॥
वत्सागोमयगोमूत्रैः औदग्डी चाष्टमे ग्रहो ।
दिशो निरीक्षणं जिह्वाचालनश्वासरोदनं ॥ १४ ॥
बलिः पूर्ववत् मत्स्याद्यैर्धूपलेपे च(१) हिङ्गुला ।
वचासिद्धार्थलशुनैर्यौद्यग्राही महाग्रहो ॥ १५ ॥
उद्वेजनोद्वेनिःश्वासः स्वमुष्टिदशखादनं ।
रक्तचन्दनकुष्ठाद्यैर्धूपयेल्लेपयेच्छिशुं ॥ १६ ॥
कपिरोमनखैर्धूपो दशमो रोदनी ग्रहो ।
तच्चेष्टा रोदनं शश्वत् सुगन्धो नीलवर्णता ॥ १७ ॥
धूपो निम्बेन भूतोग्रराजोमज्जरसैर्लिपेत् ।
बलिं बर्हिहरेन्माजकुल्माषकवकोदनम्(२) ॥ १८ ॥
यावत्त्रयोदशाहं स्यादेवं धूपादिका क्रिया ।
गृह्णाति मासिकं वत्सं पूतनासङ्कुलो ग्रहो ॥ १९ ॥
काकवद्रोदनं श्वासो मूत्रगन्धोऽक्षिमीलनं ।
गोमूत्रस्नपनं तस्य गोदन्तेन च धूपनम् ॥ २० ॥

१ धूपदीपे चेति ट० ।
२ कारकोदनमिति ख० ।

पीतवस्त्रं ददेद्रात्रौ गन्धौ तैलदीपकः ।
त्रिविधं पायसन्नाद्यं तिलमांसञ्चतुर्विधम् ॥ २१ ॥
करञ्जाधो यमदिशि सप्ताहं तैर्बलिं हरेत् ।
द्विमासिकञ्च मुकुटा वपुः शीतञ्च शीतलं ॥ २२ ॥
कृष्णैः स्यान्मुखशोषादिपुष्पगन्धांशुकानि च ।
अपूपमोदनं दीपः कृष्णं नीरादि धूपकम् ॥ २३ ॥
तृतीये गोमुखी निद्रा सवित्रमूत्रप्ररोदनम् ।
यवाः प्रियङ्गुः पलनं कुल्माषं शाकमोदनम् ॥ २४ ॥
क्षीरं पूर्व्वं ददेन्मध्येऽहनि धूपश्च सर्षपा ।
पञ्चभङ्गेन तत् स्नानं चतुर्थे पिङ्गलार्त्तिहृत् ॥ २५ ॥
तनुः शीता पूतिगन्धः शोषः स म्रियते ध्रुवम् ।
पञ्चमी ललना गात्रसादः स्यान्मुखशोषणं ॥ २६ ॥
अपानः पीतवर्णश्च मत्स्यादौर्हृत्तिले बलिः ।
षण्मासे पङ्कजा चेष्टा रोदनं विकृतः स्वरः ॥ २७ ॥
मत्स्यमांससुराभक्तपुष्पगन्धादिभिर्बलिः ।
सप्तमे तु निराहारा पूतिगन्धादिदन्तरुक् ॥ २८ ॥
पिष्टमांससुरामांसैर्बलिः स्याद्यमुनाष्टमे ।
विस्फोटशोषणाद्यं स्यात् तच्चिकित्सान्न कारयेत् ॥ २९ ॥
नवमे कुम्भकर्णार्त्ती ज्वरी च्छर्दति पालकम् ।
रोदनं मांसकुल्माषमद्यादैर्वश्वके बलिः ॥ ३० ॥
दशमे तापसी चेष्टा निराहारोन्मिलनम् ।
घण्टा पताका पिष्टोक्ता सुरामांसबलिः समे ॥ ३१ ॥
राक्षसैकादशी पीड़ा नेत्राद्यं न चिकित्सनम् ।

चञ्चला द्वादशे श्वासः चासादिकविचेष्टितम् ॥ ३२ ॥
बलिः पूर्वेऽथ मध्याह्ने कुल्माषाद्यैस्तिलादिभिः ।
यातना तु द्वितीयेऽब्दे यातनं रोदनादिकम् ॥ ३३ ॥
तिलमांसमद्यमांसैर्बलिः स्नानादि पूर्ववत् ।
तृतीये रोदनौ कम्पो रोदनं रक्तमूत्रकं ॥ ३४ ॥
गुडौदनं तिलापूपः प्रतिमा तिलपिष्टजा ।
तिलस्नानं पञ्चपत्रैर्धूपो राजफलत्वचा ॥ ३५ ॥
चतुर्थे चटकाशीफो ज्वरः सर्वाङ्गसादनम् ।
मत्स्यमांसतिलाद्यैश्च बलिः स्नानञ्च धूपनम् ॥ ३६ ॥
चञ्चला पञ्चमेऽब्दे तु ज्वरस्तामोऽङ्गसादनम् ।
मांसौदनाद्यैश्च बलिर्मेषशृङ्ग्या धूपनम् ॥ ३७ ॥
पलाशोदुम्बराश्वत्थवटबिल्वदलाम्बुधृक् ।
षष्ठेऽब्दे धावनोगोपो वैरस्यं(१) गात्रसादनम् ॥ ३८ ॥
सप्ताहोभिर्बलिः पूर्वैर्धूपस्नानञ्च भङ्गकैः(२) ।
सप्तमे यमुनाच्छर्दिरवनोहासरोदनम् ॥ ३९ ॥
मांसपायसमद्याद्यैर्बलिः स्नानञ्च धूपनम् ।
अष्टमे वा जातवेदा निरुच्छ्वासं प्ररोदनम् ॥ ४० ॥
क्षुद्रापूपदध्याद्यैर्बलिः स्नानञ्च धूपनम् ।
कालाब्दे नवमे वाङ्गैराम्फोटा गलनं भयम् ॥ ४१ ॥
बलिः स्यात् क्षुद्रापूपगलकुल्मासपायसैः ।
दशमेऽब्दे कलहंसो दाहोऽङ्गक्षुगता ज्वरः ॥ ४२ ॥

---

१ वैवर्ण्यमिति ख० ।
२ भागकैरिति ख० ।

पौलिकाषष्ठद्रव्यैः पञ्चरात्रं बलिं हरेत् ।
निम्बधूपकुष्ठलेप एकादशमके ग्रहे ॥ ४३ ॥
देवदूतो निष्ठुरवाक् बलिर्लेपादि पूर्ववत् ।
बलिका द्वादशे स्वामी बलिर्लेपादि पूर्ववत् ॥ ४४ ॥
त्रयोदशे वायवी च मुखवाद्याङ्गसादनम् ।
रक्तात्रगन्धमाल्याद्यैर्बलिः पञ्चदलैः स्रपेत् ॥ ४५ ॥
राजीनिम्बदलैर्धूपो यक्षिणी च चतुर्दशे ।
चेष्टा शूलं ज्वरो दाही मांसभक्षादिकेर्बलिः ॥ ४६ ॥
स्नानादि पूर्ववच्छान्त्यै सुण्डिकात्रिंस्रिपञ्चके ।
तच्चेष्टास्रक्स्रवः शश्वत्कुर्य्यान्मातृचिकित्सनम् ॥ ४७ ॥
वानरो षोडशो भूमौ पतेन्निद्रा सदा ज्वरः ।
पायसाद्यैस्त्रिरात्रञ्च बलिः स्नानादि पूर्ववत् ॥ ४८ ॥
गन्धवती समदृशे गात्रद्वेषः परोदनम् ।
कुल्माषाद्यैर्बलिः स्नानधूपलेपादि पूर्ववत् ॥ ४९ ॥
दिनेशाः पूतना नाम वर्षेशाः सुकुमारिकाः ।

ओं नमः सर्वमातृभ्यो बालपीड़ासंयोगं भुञ्ज भुञ्ज चुट चुट स्फोटय स्फोटय स्फुर स्फुर रुह रुह आकर्षय आकर्षय एवं सिद्धरूपो ज्ञापयति । हर हर निर्दोषं कुरु कुरु बालिकां बालं स्त्रियम् पुरुषं वा सर्वग्रहाणामुपक्रमात् ।

चामुण्डे नमो देव्यै क्रूं क्रूं क्रों अपसर अपसर दुष्टग्रहान् क्रूं तथा गच्छन्तु रुद्रिकाः अन्यत्र पन्थानं रुद्रो ज्ञापयति ।

सर्वबालग्रहेषु स्यान्मन्त्रोऽयं सर्वकामिकः ॥ ५० ॥

ओं नमो भगवति चामुण्डे मुञ्च मुञ्च बलिं बालिकां वा ।

बलिं गृह्ण गृह्ण जय जय वस वस ।
सर्वत्र बलिदानेऽयं रक्षाकृत् पठते मनुः ।
ब्रह्मा विष्णुः शिवः स्कन्दो गौरी लक्ष्मीर्गणादयः ।
रक्षन्तु च ज्वराभ्यान्तं मुञ्चन्तु च कुमारकम् ॥ ५१ ॥

इत्याग्नेये महापुराणे बालग्रहहरं बालतन्त्रं नाम
अष्टनवत्यधिकद्विशततमोऽध्यायः ।

अथ नवनवत्यधिकद्विशततमोऽध्यायः ।

ग्रहग्रहन्मन्त्रादिकम् ।

अग्निरुवाच । ग्रहापहारमन्त्रादीन् वक्ष्ये ग्रहविमर्दनान् ।
हर्षेच्छाभयशोकादिविरुद्धाशुचिभोजनात् ॥ १ ॥
गुरुदेवादिकोपाच्च पक्षोन्मादा भवन्त्यथ ।
त्रिदोषजा[1] सन्निपाता आगन्तुरिति ते स्मृताः ॥ २ ॥
देवादयो ग्रहा जाता रुद्रक्रोधादनेकधा ।
मरित्सरस्तडागादौ शैलेषूपवनेषु च ॥ ३ ॥
नदीसङ्गे शून्यगृहे विल्वाश्वत्थैकवृक्षके ।
ग्रहा गृह्णन्ति पुंसश्च स्त्रियः(१) सुप्ताश्च गर्भिणीम् ॥ ४ ॥
आसन्नपुष्यान्नग्नाश्च ऋतुस्नानं करोति या ।
अवमानं नृणां वैरं विघ्नं भाग्यविपर्ययः ॥ ५ ॥
देवतागुरुधर्म्मादिसदाचारादिलङ्घनम् ।

---

[1] स्त्रिय इति अ०, ट० पु० ।

पतनं गेलहत्त्वादेर्विधुत्वन्मूर्द्धजं मुहुः ॥ ६ ॥
कदन्नुत्यति रक्ताक्षो भृंरूपोऽनुग्रहो नरः ।
उद्विग्नः शूलदाहार्त्तः क्षुत्तृष्णार्त्तः शिरोर्त्तिमान् ॥ ७ ॥
देहि देहीति याचेत बलिकामग्रहो नरः ।
स्त्रीमालाभोगस्नानेच्छूरतिकामग्रहो नरः ॥ ८ ॥
महासुदर्शनो व्योमव्यापी विटपनासिकः(१) ।
पातालनारसिंहाद्या चण्डोमत्त्वा ग्रहार्दनाः ॥ ९ ॥
पृश्निोहिङ्गुवचाचक्रशिरीषदयितस्मरम् ।
पाशाङ्कुशधरं देवमत्तमालाकपालिनम् ॥ १० ॥
षड्दोर्ज्ञाज्ञादिशक्तिञ्च दधानं चतुराननम् ।
अस्त्रबीजादिषड्दोर्ज्ञपद्मस्थं रविमण्डले ॥ ११ ॥
आदित्यादियुतं प्राच्यं उदितेर्कोऽर्घ्यकं ददेत् ।
श्यामविषाग्निविप्रकुण्डोच्चलेखासकलो भृगुः ॥ १२ ॥
अर्काय भूर्भुवःस्वश्च ज्वालिनीं कुलमुद्वरम् ।
पद्मासनोऽरुणो रक्तवस्त्रमद्युतिविग्रहः ॥ १३ ॥
उदारः पद्मघण्टीर्भ्यां सौम्यः सर्व्वाङ्गभूषितः ।
रक्ता हृदादयः सौम्या वरदाः पद्मधारिणः ॥ १४ ॥
विद्युत्पुञ्जनिभं वस्त्रं श्वेतः सौम्योऽरुणः कुजः ।
बुधस्तदद्गुरुः पीतः शुक्रः शुक्रः शनैश्चरः ॥ १५ ॥
छायाङ्गारनिभो राहुर्धूम्रः केतुरुदाहृतः ।
वामोरुवामहस्तान्ते दत्तहस्ताभयप्रदा ॥ १६ ॥
स्वनामाद्यन्तु बीजास्ते हस्तौ संशोध्य चास्त्रतः ।

---

१ चिपिटनासिक इति अ० ।

अङ्गुष्ठादौ तले नेत्रे हृदादयं व्यापकं न्यसेत् ॥ १७ ॥
मूलबीजैस्त्रिभिः प्राणध्यायकं न्यस्य माङ्गकम् ।
प्रक्षाल्य पात्रमस्त्रेण मूलेनापूर्य्य वारिणा ॥ १८ ॥
गन्धपुष्याक्षतं न्यस्य दूर्व्वामर्घाञ्च मन्त्रयेत् ।
आत्मानं तेन सम्प्रोक्ष्य पूजाद्रव्यञ्च वै ध्रुवम् ॥ १९ ॥
प्रभूतं विमलं सारमाराध्यं परमं सुखम् ।
पीठाद्यान् कल्पयेदेतान् हृदा मध्ये विदिक्षु च ॥ २० ॥
पीठोपरि हृदा मध्ये दिक्षु चैव विदिक्षु च ।
पीठोपरि हृदाऽजस्रं केशवैश्चटशक्तयः ॥ २१ ॥
वां दीप्तां वीं तथा सूक्ष्मां वुक्षयां वूञ्च भद्रिकां ।
वें विभूतीं वैं विमलां वोंममिघारावियुताम् ॥ २२ ॥
वौं सर्व्वतोमुखीं वं पीठं वः प्रार्च्य रविं यजेत् ।
आवाह्य दद्यात् पाद्यादि हृत्षड़ङ्गेन सुव्रत ॥ २३ ॥
खकारो दण्डिनो चण्डो मज्जा दशनसंयुता ।
मांसदीर्घा जरद्वायुहृदैतत् मर्व्वदं रवेः ॥ २४ ॥
वह्नीशरक्षो मरुतां दिक्षु पूज्या हृदादयः ।
खमन्त्रैःकर्णिकान्तस्था दिक्षस्त्रं पुरतः सदृक् ॥ २५ ॥
पूर्व्वादिदिक्षु सम्पूज्यास्त्वन्द्रज्ञगुरुभार्गवाः ।
नस्याञ्जनादि कुर्व्वीत साजमृत्वै ग्रहापहैः ॥ २६ ॥
पाठापथ्यावचाशिग्रुमिन्मूव्योपैः पृथक् फलैः ।
अजाक्षीराढके पक्वसर्पिः सर्व्वग्रहान् हरेत् ॥ २७ ॥
हपुषिकालीफलीकुष्ठं लवणानि च शार्ङ्गकम् ।
अपस्मारविनाशाय तज्जलं त्वभिभोजयेत् ॥ २८ ॥

विदारीकुशकाशेक्षुकाश्यजं पाययेत् पयः ।
द्रोणे सयष्टिकुष्माण्डरसे सर्पिश्च संस्कृतौ ॥ २९ ॥
पञ्चगव्यं घृतं तद्वद्योगं ज्वरहरं शृणु ।
ओं भग्नास्त्राय विद्महे एकदंष्ट्राय
धीमहि तन्नो ज्वरः प्रचोदयात् ।
कृष्णोषणनिशारास्नाद्राक्षातैलं गुडं लिहेत् ॥ ३० ॥
श्यामवानथ वा भार्गीं सयष्टिमधुसर्पिषा ।
पाठा तिक्ता कणा भार्गी अथवा मधुना लिहेत् ॥ ३१ ॥
धात्री विश्वमिता कृष्णा मुस्ता खर्जूरमागधी ।
पिवरस्येति हिक्काघ्नं तत् त्रयं मधुना लिहेत् ॥ ३२ ॥
कामली जीरमाण्डूकीनिशाधात्रीरसं पिबेत् ।
व्योषपद्मकबिल्वफलाकिङ्क्षदेवदारवः ।
रास्नाचूर्णं समं खण्डैर्जग्ध्वा कासहरं ध्रुवम् ॥ ३३ ॥
इत्याग्नेये महापुराणे ग्रहहन्मन्त्रादिकं नाम
नवनवत्यधिकद्विशततमोऽध्यायः ॥

अथ त्रिशततमोऽध्यायः ।

सूर्य्यार्च्चनम् ।

अग्निरुवाच । शृण्या तु दण्डिसाजेशपावकश्चतुरानन: ।
सर्व्वार्थसाधकमिदं बीजं पिण्डार्थमुच्यते ॥ १ ॥
स्वयं दीर्घस्वराद्यश्च बीजेष्वङ्गानि सर्व्वगः ।
खातं साधु त्रिपञ्चैव सबिन्दुं सकलं तथा ॥ २ ॥

गणस्य पञ्च बीजानि पृथगुद्दिष्टफलं महत् ।
गणं जयाय नमः एकदंष्ट्राय अचल-
कर्णिने गजवक्त्राय महोदरहस्ताय ।
पञ्चाङ्गं सर्व्वसामान्यं सिद्धिः स्यात्तज्जाप्यतः ॥ ३ ॥
गणाधिपतये गणेश्वराय गणनायकाय गणक्रीडाय ।
दिग्दले पूजयेन्मूर्त्तीः पुरावच्चाङ्गपञ्चकम् ।
वक्रतुण्डाय एकदंष्ट्राय महोदराय गजवक्त्राय ।
विकटाय विघ्नराजाय धूम्रवर्णाय ।
दिग्विदिक्षु यजेदेतान्लोकांशांश्चैव मुद्रया ॥ ४ ॥
मध्यमातर्ज्जनीमध्यगताङ्गुष्ठौ समुष्टिकौ ।
चतुर्भुजो मोदकाढ्यो दण्डपाशाङ्कुशान्वितः ॥ ५ ॥
दन्तभग्नधरं रक्तं साज्ञं पाशाङ्कुशैर्वृतम् ।
पूजयेत्तं चतुर्थ्यां च विशेषेनाथ नित्यशः ॥ ६ ॥
श्वेतार्कमूलेन कृतं सर्व्वासिः स्यात्तिलैर्घृतैः ।
तण्डुलैर्दधिमध्वाज्यैः सौभाग्यं वश्यता भवेत् ॥ ७ ॥
घोषासृक्प्राणधात्वर्दी दण्डी मार्त्तण्डभैरवः ।
धर्म्मार्थकाममोक्षाणां कर्त्ता विश्वपुटाकृतः ॥ ८ ॥
रूक्षाः स्युर्मूर्त्तयः पञ्च दीर्घा अङ्गानि तस्य च ।
सिन्दूरारुणमीशाने वामार्द्धदयितं रविं ॥ ९ ॥
आग्नेयादिषु कोणेषु कुजमन्दाहिकेतवः ।
स्नात्वा विधिवदादित्यमाराध्यार्घ्यपुरःसरं ॥ १० ॥
कृतान्तमैशे निर्म्मांसं तेजश्चण्डाय दीपितं ।
रोचना कुङ्कुमं वारि रक्तगन्धाक्षताङ्कुराः ॥ ११ ॥

वेणुबीजयवाः शालिश्यामाकतिलराजिकाः ।
जवापुष्पान्वितां दत्वा पात्रैः शिरसि धार्य्य तत्(१) ॥१२॥
जानुभ्यामवनीकृत्वा सूर्य्यायार्घं निवेदयेत् ।
स्वविद्यामन्त्रितैः कुम्भैर्नवभिः प्रार्च्य वै ग्रहान् ॥ १३ ॥
ग्रहादिशान्तये स्नानं जप्त्वार्कं सर्वमाप्नुयात् ।
संग्रामविजयं साग्निं बीजदोषं सविन्दुकं ॥ १४ ॥
न्यस्य मूर्धादिपादान्तं मूलं पूज्य तु मुद्रया ।
स्वाङ्गानि च यथान्यासमात्मानं भावयेद्रविं ॥ १५ ॥
ध्यानञ्च मारणस्तम्भे पीतमाप्यायने सितम् ।
रिपुघातविधौ(२) कृष्णं मोहयेच्छक्रचापवत् ॥ १६ ॥
योऽभिषेकजपध्यानपूजाहोमपरः सदा ।
तेजस्वी ह्यजयः श्रीमान् समुद्रादौ जयं लभेत् ॥ १७ ॥
ताम्बूलादाविदं न्यस्य जप्त्वा दद्यादुशीरकं ।
न्यस्तबीजेन हस्तेन स्पर्शनं तद्वशे स्मृतं ॥ २८ ॥

इत्याग्नेये महापुराणे सूर्य्यार्चनं नाम त्रिशततमोऽध्यायः ॥

अथैकाधिकत्रिशततमोऽध्यायः ।

नानामन्त्राः ।

अग्निरुवाच । वाक्कर्म्मपार्श्वयुक्शुक्रतोकक्रते मतो ध्रुवः ।
हुतान्ता देशवर्णेयं विद्या सुख्या सरस्वती ॥ १ ॥

---

१ धार्य्येति ब० ।

२ विद्युन्मालविधाविति ब०, ज०, ञ०, ट० च ।

अघोराग्नी वर्णलक्षं जपेत् स मतिमान् भवेत् ।
अग्निः सवक्त्रिर्वामाक्षिविन्दुरिन्द्राय हृत्परः ॥ २ ॥
वज्रपद्मधरं शक्रं पीतमावाह्य पूजयेत् ।
नियुतं होमयेदाज्यतिलांस्तेनाभिषेचयेत् ॥ ३ ॥
नृपादिर्भ्रष्टराज्यादीन्राज्यपुत्रादिमाप्नुयात् ।
हृल्लेखा अग्निदेवाख्या दोषाग्निर्दण्डदण्डवान् ॥ ४ ॥
शिवमिष्ट्वा जपेच्छक्तिमष्टम्यादिचतुर्थयौ ।
चक्रपाशाङ्कुशधरां साभयां वरदायिकां ॥ ५ ॥
होमादिना च सौभाग्यं कवित्वं पुत्रवान् भवेत् ।
ओं क्लीं ओं नमः कामाय सर्व्वजनहिताय सर्व्वजनमोह-
नाय प्रज्वलिताय सर्व्वजनहृदयं ममात्मगतं कुरु२ ओं ।
एतज्जपादिना मन्त्री वशयेत् सकलं जगत् ॥ ६ ॥
ओं क्लीं चामुण्डे अमुकन्दह२ पच२ मम वशमानय२ ठ२ ।
वशीकरणकल्पज्ञैश्चामुण्डायाः प्रकीर्त्तितः ।
फलत्रयकषायेण वराङ्गं क्षालयेद्यदि ॥ ७ ॥
अखगन्धायवैः स्त्री तु निशाकर्पूरकादिना ।
पिप्पलीतण्डुलान्यष्टौ मरिचानि च विंशतिः ॥ ८ ॥
हृहतीरसलेपस्तु वशी स्यान्मरणान्तिकं ।
कटीरमूलत्रिकटुचोद्रलेपस्तथा भवेत् ॥ ९ ॥
हिमं कपित्थकरभं मागधी मधुकं मधु ।
तेषां लेपः प्रयुक्तस्तु दम्पत्योः स्वस्तिमावहेत् ॥ १० ॥
सयर्क्करयोर्निलेपात् कदम्बरसको मधु ।
वहदेवी महालक्ष्मीः पुत्रजीवी लताञ्जलिः ॥ ११ ॥

एतच्चूर्णं शिरःस्नानं लोकस्य वशमुत्तमम् ।
त्रिफलाचन्दनक्वाथप्रस्था द्विकुडवम् पृथक् ॥ १२ ॥
भृङ्गहेमरसन्दोषातावती चुक्रुकं मधु ।
घृतैः पक्वा निशा छाया शुष्का लोध्रा तु रञ्जनी ॥ १३ ॥
विदारीं सोक्षटामाषचूर्णीभूतां सशर्करां ।
मथितां यः पिवेत् क्षीरैर्नित्यं स्त्रीशतकं व्रजेत् ॥ १४ ॥
गुल्ममाषतिलव्रीहिचूर्णक्षीरसितान्वितं ।
अश्वत्थवंशदर्भाणां मूलं वै वैष्णवीस्त्रियोः ॥ १५ ॥
मूलं दूर्व्वाखगन्धोत्थं पिवेत् क्षीरैः सुतार्थिनी ।
कौन्तीलक्ष्मणाः शिफा धात्री वज्रं लोध्रं वटाङ्कुरम् ॥१६॥
आज्यक्षीरमृतौ पेयं पुत्रार्थं त्रिदिवं स्त्रिया ।
पुत्रार्थिनी पिवेत् क्षीरं श्रीमूलं सवटाङ्कुरम् ॥ १७ ॥
श्रीवटाङ्कुरदेवीनां रसं नस्ये पिवेच्च सा ।
श्रीपद्ममूलमुत्क्षीरमश्वत्थोत्तरमूलयुक् ॥ १८ ॥
तरलं पयसा युक्तं कार्पासफलपल्लवं ।
अपामार्गस्य पुष्पाग्रं नवं समहिषीपयः ॥ १९ ॥
पुत्रार्थश्चार्द्धषट्शाकैर्योगाश्चत्वार ईरिताः ।
शर्करोत्पलपुष्पाक्षलोध्रचन्दनसारिवाः ॥ २० ॥
स्रवमाणे स्त्रिया गर्भे दातव्यास्तण्डुलाम्भसा ।
लाजा यष्टिसिताद्राक्षाक्षौद्रसर्पींषि वा लिहेत् ॥ २१ ॥
अटरूषकलाङ्कुष्ठः कोकमाक्षाः शिफा पृथक् ।
नाभेरधः समालिप्य प्रसूते प्रमदा सुखम् ॥ २२ ॥
रक्तं शुक्लं जावापुष्पं रक्तशुक्लस्रुतौ पिवेत् ।

केशरं हरितालमूलं गोपीयष्टिहरेणुत्पलम् ॥ २३ ॥
साजक्षीरं सतैलं तंडुलवणं रोमजन्मकृत् ।
शीर्य्यमाणेषु केशेषु स्थापनञ्च भवेदिदम् ॥ २४ ॥
धात्रीभृङ्गरसप्रस्थतैलञ्च क्षीरमाढकम् ।

ओं नमो भगवते त्र्यम्बकाय उपशमय२ शुलु२ मिलि२ भिद२ गोमानिनि चक्रिणि क्रूँ फट् ॥

अस्मिन् ग्रामे गोकुलस्य रक्षां कुरु२ शान्तिं कुरु२ ।
घण्टाकर्णो महासेनो वीरः प्रोक्तो महाबलः ॥ २५ ॥
मारीनिर्नाशनकरः स मां पातु जगत्पतिः ।
ओंकौ चैव न्यसेदेतो मन्त्रो गोरक्षको पृथक ॥ २६ ॥

इत्याग्नेये महापुराणे नानामन्त्रा नामैकाधिक-
त्रिशततमोऽध्यायः ॥

अथ द्व्यधिकत्रिशततमोऽध्यायः ।

अङ्गाक्षरार्चनम् ।

अग्निरुवाच । यदा जन्मर्क्षगश्चन्द्रो भानुः सप्तमराशिगः ।
पौष्णः कालः स विज्ञेयस्तदा ग्रासं परीक्षयेत् ॥ १ ॥
कण्ठोष्ठौ चलतः स्थानाद्यस्य वक्त्रं च नासिका ।
जिह्वा च जिह्वा समाहं जीवितं तस्य वै भवेत् ॥ २ ॥
तारो मेषो विषं दन्ती नरो दीर्घो घण्टा रसः ।
क्रूरोल्काय महोल्काय वीरोल्काय शिखा भवेत् ॥ ३ ॥

ह्लक्षाय सहसोल्काय वैष्णवोष्टाक्षरो मनुः ।
कनिष्ठादितदष्टानामङ्गुलीनांच पर्वसु ॥ ४ ॥
ज्येष्ठाद्येन क्रमात्तावन् मूर्द्धन्यष्टाक्षरं न्यसेत् ।
तर्ज्जन्यान्तारमङ्गुष्ठे लग्ने मध्यमया च तत् ॥ ५ ॥
तलेङ्गुष्ठे तदुत्तारं वीजोत्तारं ततो न्यसेत् ।
रक्तगौरधूम्रहरिज्जातरूपाः सितास्त्रयः ॥ ६ ॥
एवं रूपानिमान् वर्णान् भाववुद्ध्यन्यसेत् क्रमात् ।
हृदास्यनेत्रमूर्द्धाङ्घ्रितालुगुह्यकरादिषु(१) ॥ ७ ॥
अङ्गानि च न्यसेद्वीजान्यस्याश्च करदेहयोः ।
यथात्मनि तथा देवे न्यासः कार्य्यः करं विना ॥ ८ ॥
हृदादिस्थानगान् वर्णान् गन्धपुष्पैः समर्च्चयेत् ।
धर्म्माद्यग्न्याद्यधर्मादि गात्रे पीठेऽम्बुजे न्यसेत् ॥ ९ ॥
यत्र केशरकिञ्जल्कव्यापिसूर्य्येन्दुदाहिनां ।
मण्डलत्रितयन्तावद् भेदैस्तत्र न्यसेत् क्रमात् ॥ १० ॥
गुणाश्च तन्मात्रसत्त्वाद्याः केशरस्थाश्च शक्तयः ।
विमलोत्कर्षणीज्ञानक्रियायोगाश्च वै क्रमात् ॥ ११ ॥
प्रह्वी सत्या तथेशानानुग्रहा मध्यतस्ततः ।
योगपीठं समभ्यर्च्च समावाह्य हरिं यजेत् ॥ १२ ॥
पाद्यार्घ्याचमनीयञ्च पीतवस्त्रविभूषणं ।
एतत् पञ्चोपचारञ्च सर्व्वं मूलेन दीयते ॥ १३ ॥
वासुदेवादयः पूज्याश्चत्वारो दिक्षु मूर्त्तयः ।
विदिक्षु श्रीसरस्वत्यै रतिशान्त्यै च पूजयेत् ॥ १४ ॥

---

१ हृदास्यनेत्रमूर्द्धाङ्घ्रिनाभिगुह्यकरादिषिति ख० ।

शङ्खं चक्रं गदां पद्मं मुषलं खड्गशार्ङ्गिके ।
वनमालान्वितं दिक्षु विदिक्षु च यजेत् क्रमात् ॥ १५ ॥
अभ्यर्च्य च बहिस्तार्क्ष्यं देवस्य पुरतोऽर्चयेत् ।
विष्वक्सेनञ्च सोमेशं मध्ये आवरणाहहिः(१) ।
इन्द्रादिपरिचारेण पूज्य सर्व्वमवाप्नुयात् ॥ १६ ॥

इत्याग्नेये महापुराणे अङ्गार्चनं नाम द्व्यधिक-
त्रिशततमोऽध्यायः ॥

अथ त्र्यधिकत्रिशततमोऽध्यायः ।

पञ्चाक्षरादिपूजामन्त्राः ।

अग्निरुवाच । मेषः संज्ञा विषं साज्यमस्ति दीर्घोदकं रसः ।
एतत् पञ्चाक्षरं मन्त्रं शिवदञ्च शिवात्मकं ॥ १ ॥
तारकादि समभ्यर्च्य देवत्वादि समाप्नुयात् ।
ज्ञानात्मकं परं ब्रह्म परं बुद्धिः शिवो हृदि ॥ २ ॥
तच्छक्तिभूतः सर्व्वगो भिन्नो ब्रह्मादिमूर्त्तिभिः ।
मन्त्रार्णाः पञ्च भूतानि तन्मन्त्रा विषयास्तथा ॥ ३ ॥
प्राणादिवायवः पञ्च ज्ञानकर्म्मेन्द्रियाणि च ।
सर्वं पञ्चाक्षरं ब्रह्म तदृदष्टाक्षरान्तकः ॥ ४ ॥
गव्येन प्रत्ययेहीत्याख्यानं मन्त्रेण चोदितं ।
तन्मन्त्रसम्भूतसम्भावः शिवमिष्ट्वा विधानतः ॥ ५ ॥

---

१ मध्येषु नीरवाहविरिति ब०, ज०, ञ० च ।

मूलमूर्त्यङ्गविद्याभिस्तण्डुलक्षेपणादिकम्।
कृत्वा चरुञ्च यत् क्षीरं पुनस्तद्विभजेत् त्रिधा ॥ ६ ॥
निवेद्यैकं परं हुत्वा सग्निष्ठोऽन्यद्व्रजेद्गुरुः।
आचम्य सकलीकृत्य दद्याच्छिष्याय देशिकः ॥ ७ ॥
दन्तकाष्ठं हृदा जप्तं क्षीरवृक्षादिसम्भवम्।
संग्रोध्य दन्तान् संक्षिप्ता प्रक्षाल्येतत् क्षिपेद्भुवि ॥ ८ ॥
पूर्व्वेण सौम्यवारीशगतं शुभमतौ शुभम्।
पुनस्तं शिष्यमायान्तं(१) शिखाबन्धादिरर्चितं ॥ ९ ॥
कृत्वा वेद्यां सहानेन स्वपेद्दर्भास्तरे बुधः।
सुषुप्तं वीक्ष्य तं शिष्यः प्रभाते श्रावयेद्गुरुं ॥ १० ॥
शुभैः सिद्धिपदैर्भक्तिस्तैः पुनर्मण्डलार्च्चनम्।
मण्डलं भद्रकाद्युक्तं पूजयेत्सर्व्वसिद्धिदं ॥ ११ ॥
स्नात्वाचम्य मृदा देहं मन्त्रैरालिप्य कल्पते।
शिवतीर्थे नरः स्नायादघमर्षणपूर्वकम् ॥ १२ ॥
हस्ताभिषेकं कृत्वाथ प्रायात् पूजादिकं बुधः।
मूलेनासनं कुर्य्यात्तेन पूरककुम्भकान् ॥ १३ ॥
आत्मानं योजयित्वोर्द्धं शिखान्ते द्वादशाङ्गुले।
संशोष्य दग्ध्वा स्वतनुं प्लावयेदमृतेन च ॥ १४ ॥
ध्यात्वा दिव्यं वपुस्तस्मिन्नात्मानञ्च पुनर्नयेत्।
कृत्वैवं चात्मशुद्धिः स्याद्दिव्यस्यार्च्चनमारभेत् ॥ १५ ॥
क्रमात् कृष्णसितश्यामरक्तपीता नगादयः।
मन्त्राणां दक्षिणाङ्गानि तेषु सर्व्वास्तु मूर्त्तयः ॥ १६ ॥

---

१ शिष्यमाचान्तमिति ज०।

अङ्गुष्ठादिकनिष्ठान्तं विन्यस्याङ्गानि सर्व्वतः।
न्यसेन्मन्त्राक्षरं पादंगुल्फहृद्वक्त्रमूर्द्धसु ॥ १७ ॥
व्यापकं न्यस्य मूर्द्धादि मूलमङ्गानि विन्यसेत्।
रक्तपीतश्यामसितान् पीठपादान् स्वकालजान् ॥ १८ ॥
स्वाङ्गान्मन्त्रैर्न्यसेद्वाच्यधर्म्मादीनि दिक्षु च।
तत्र पद्मस्य सूर्य्यादिमण्डले चितयं गुणान् ॥ १९ ॥
पूर्व्वादिपत्रे कामाद्या नवकं कर्णिकोपरि।
वामा ज्येष्ठा क्रमाद्रौद्री कालो कलविकारिणी ॥ २० ॥
बलविकारिणी चाथ बलप्रमथनी तथा।
सर्व्वभूतदमनो च नवमी च मनोन्मनी ॥ २१ ॥
श्वेता रक्ता सिता पीता श्यामा वह्निनिभाषिता।
कृष्णारुणाश्च ताः पत्रोर्ज्वलारूपाः स्मरेत् क्रमात् ॥२२॥
अनन्तयोगपीठाय भावाद्याय हृदन्ततः।
स्फटिकाभं चतुर्व्वाहुं फलशूलधरं शिवम् ॥ २३ ॥
साभयं वरदं पद्मवदनञ्च त्रिलोचनम्।
पत्रेषु मूर्त्तयः पञ्च स्थाप्यास्तत्पुरुषादयः ॥ २४ ॥
पूर्व्वे तत्पुरुषः श्वेतो अघोरोऽष्टभुजोऽसितः।
चतुर्व्वाहुमुखः पीतः सद्योजातश्च पश्चिमे ॥ २५ ॥
वामदेवः स्त्रीविलासी चतुर्वक्त्रभुजोऽरुणः।
सौम्ये पद्मास्य ईशाने ईशानः सर्व्वदः सितः ॥ २६ ॥
दृष्टाङ्गानि यथान्यायमनन्तं सूक्ष्ममर्च्चयेत्।
सिद्धेश्वरं त्रिनेत्रं च पूर्व्वादौ दिशि पूजयेत् ॥ २७ ॥
एकरुद्रं त्रिनेत्रञ्च श्रीकण्ठञ्च शिखण्डिनम्।

ऐशान्यादिविदिक्षेते विघ्नेशाः कमलासनाः(१) ॥ २८ ॥
श्वेतः पीतः सितो रक्तो धूम्रो रक्तोऽरुणः स्मितः ।
शूलाग्निशरखड्गासवाहवश्चतुराननाः ॥ २९ ॥
उमा चण्डेशनन्दीशौ महाकालो गणेश्वरः ।
ऋषी भृङ्गरिटिस्कन्दानुत्तरादौ प्रपूजयेत् ॥ ३० ॥
कुलिशं शक्तिदण्डौ च खड्गपाशध्वजौ गदां ।
शूलं चक्रं यजेत् पद्मं पूर्वादौ देवमर्च्य च ॥ ३१ ॥
ततोऽधिवासितं शिष्यं पाययेद्व्यपञ्चकम् ।
आचान्तं प्रोक्ष्य नेत्राभ्यां नेत्रेण वन्धयेत् ॥ ३२ ॥
द्वारं प्रवेशयेच्छिष्यं मण्डपस्याथ दक्षिणे ।
सासनादिकुशासीनं तत्र संयोधयेद्गुरुः ॥ ३३ ॥
आदितत्त्वानि संहृत्य परमार्थे लयः क्रमात् ।
पुनरुत्पाद्येच्छिष्यं सृष्टिमार्गेण दैशिकः ॥ ३४ ॥
न्यासं शिष्ये ततः कृत्वा तं प्रदक्षिणमानयेत् ।
पश्चिमद्वारमानीय क्षेपयेत् कुसुमाञ्जलिम् ॥ ३५ ॥
यस्मिन् पतन्ति पुष्पाणि तन्नामाद्यं विनिर्दिशेत् ।
पार्श्वे योगभुवः खाते कुण्डे सम्यभिमेखले(२) ॥ ३६ ॥
शिवाग्निं जनयित्वेष्ट्वा पुनः शिष्येण चार्चयेत् ।
ध्यानेनात्मनिभं शिष्यं संहृत्य प्रलयः क्रमात् ॥ ३७ ॥
पुनरुत्पाद्य तत्पाणौ दद्याद्भौमं च मन्त्रितान् ।
पृथिव्यादीनि तत्त्वानि क्षुद्रयाद्यदयादिभिः ॥ ३८ ॥

---

१ कमलासनादयः इति ङ० ।

२ वह्न्यादिमेखले इति ङ० ।

एकैकस्य शतं हुत्वा व्योममूलेन होमयेत् ।
हुत्वा पूर्णाहुतिं कुर्य्यादस्त्रेणाष्टाहुतीर्हुनेत् ॥ ३९ ॥
प्रायश्चित्तं विशुद्ध्यर्थं ततः शेषं समापयेत् ।
कुम्भं समन्त्रितं प्राच्यं मिश्रं पीठेऽभिषेचयेत् ॥ ४० ॥
मिश्रे तु समयं दत्वा स्वर्णाद्यैः स्वगुरुं यजेत् ।
दीक्षा पञ्चाक्षरस्योक्ता विष्ण्वादेरेवमेव हि ॥ ४१ ॥

इत्याग्नेये महापुराणे पञ्चाक्षरादिपूजामन्त्रा नाम
त्र्यधिकत्रिशततमोऽध्यायः ॥

अथ चतुरधिकत्रिशततमोऽध्यायः ।

पञ्चपञ्चाशद्विष्णुनामानि ।

अग्निरुवाच । जपन् वै पञ्चपञ्चाशद्विष्णुनामानि यो नरः ।
मन्त्रजप्यादिफलभाक् तीर्थेष्वर्चादि चाक्षयम् ॥ १ ॥
पुष्करे पुण्डरीकाक्षं गयायाञ्च गदाधरम् ।
राघवञ्चित्रकूटे तु प्रभासे दैत्यसूदनम् ॥ २ ॥
जयं जयन्त्यां तद्वच्च जयन्तं हस्तिनापुरे ।
वाराहं वर्द्धमाने च काश्मीरे चक्रपाणिनम् ॥ ३ ॥
जनार्द्दनञ्च कुब्जाम्रे मथुरायाञ्च केशवम् ।
कुब्जाम्रके हृषीकेशं गङ्गाद्वारे जटाधरम् ॥ ४ ॥
शालग्रामे महायोगं हरिं गोवर्द्धनाचले ।

पिण्डारके चतुर्व्यूहं शङ्खोद्धारे च शङ्खिनम् ॥ ५ ॥
वामनञ्च कुरुक्षेत्रे यमुनायां त्रिविक्रमम् ।
विश्वेश्वरं तथा ओघे कपिलं पूर्व्वसागरे ॥ ६ ॥
विष्णुं महोदधौ विद्याद्गङ्गासागरसङ्गमे ।
वनमालञ्च किष्किन्ध्यां देवं रैवतकं विदुः ॥ ७ ॥
काशीतटे महायोगं विरजायां रिपुञ्जयम् ।
विशाखयूपे ह्यजितं पाले लोकभावनम् ॥ ८ ॥
द्वारकायां विदि क्लृप्तं मन्दरे मधुसूदनम् ।
लोकाकुले रिपुहरं शालग्रामे हरिं स्मरेत् ॥ ९ ॥
पुरुषं पूरुषवटे विमले च जगत्प्रभुं ।
अनन्तं सैन्धवारण्ये दण्डके शार्ङ्गधारिणम् ॥ १० ॥
उत्पलावर्त्तके शौरिं नर्म्मदायां श्रियः पतिं ।
दामोदरं रैवतके नन्दायां जलशायिनं ॥ ११ ॥
गोपीश्वरञ्च सिन्धौ माहेन्द्रे चाच्युतं विदुः ।
सह्याद्रौ देवदेवेशं वैकुण्ठं मागधे वने ॥ १२ ॥
सर्व्वपापहरं विन्ध्ये श्रीशैले तु पुरुषोत्तमम् ।
आत्मानं हृदये विदि जपतां भुक्तिमुक्तिदम् ॥ १३ ॥
वटे वटे वैश्रवणं चत्वरे चत्वरे शिवम् ।
पर्व्वते पर्व्वते रामं सर्व्वत्र मधुसूदनं ॥ १४ ॥
नरं भूमौ तथा व्योम्नि वह्निष्ठे गरुडध्वजम् ।
वासुदेवञ्च सर्व्वत्र संस्मरन् भुक्तिमुक्तिभाक् ॥ १५ ॥
सामान्येतानि विष्णोस्तु जप्त्वा सर्वमवाप्नुयात् ।
क्षेत्रेष्वेतेषु यत् श्राद्धं दानं जप्यञ्च तर्पणम् ॥ १६ ॥

तत्सर्वं कोटिगुणितं मृतो ब्रह्ममयो भवेत् ।
यः पठेत् शृणुयाद्वापि निर्मलः स्वर्गमाप्नुयात् ॥ १७ ॥

इत्याग्नेये महापुराणे पञ्चपञ्चाशद्विष्णुनामानि नाम
चतुरधिकत्रिशततमोऽध्यायः ॥

अथ पञ्चाधिकत्रिशततमोऽध्यायः ।

नारसिंहादिमन्त्राः ।

अग्निरुवाच । स्तम्भो विद्वेषणोच्चाट उत्सादो भ्रममारणे ।
व्याधिघेति स्मृतं क्षुद्रं तन्मोक्षो वक्ष्यते शृणु ॥ १ ॥
ॐ नमो भगवते उन्मत्तरुद्राय भ्रम २ भ्रामय २ अमुकं
विभ्रामय उद्भ्रामय २ रौद्रेण रूपेण ह्रूं फट् ठ २ ।
श्मशाने निर्गि जप्तेन चिलचं मधुना हुनेत् ।
चिताग्नौ धूर्त्तसमिद्भिर्भ्राम्यते मृतं रिपुः ॥ २ ॥
हैमगैरिकया कृष्णा प्रतिमा हैमसूचिभिः ।
जघ्ना विध्येच्च तत्कण्ठे हृदि वा म्रियते रिपुः ॥ ३ ॥
खरबालचिताभस्म ब्रह्मदण्डी च मर्कटी ।
गृहे वा मूर्ध्नि तच्चूर्णं भ्रमभृत्सादकृत् क्षिपेत् ॥ ४ ॥
भ्रम्बाकाग्नौ सदीप्ताग्निर्भं गुर्वक्षिय वर्म्म फट् ।
एवं सहस्रारे ह्रूं फट् आचक्राय स्वाहा हृदयं विचक्राय शिवः ।
शिखाचक्रायाथ कवचं त्रिचक्रायाथ नेत्रकम् ॥ ५ ॥

सञ्चक्रायास्त्रसुदिष्टं ज्वालाचक्राय पूर्ववत् ।
शार्ङ्गं सुदर्शनं चैव हृदयहृत् सर्वसाधनम् ॥ ६ ॥
मूर्धाग्निमुखहृन्नाभ्यपादे ह्यस्याच्चराद्यसेत् ।
चक्राब्जासनमग्न्याभं दंष्ट्रिणञ्च चतुर्भुजम् ॥ ७ ॥
शङ्खचक्रगदापद्मगलाकाङ्कुशपाणिनम् ।
चापिनं पिङ्गकेशाच्चमरव्यानविभिष्टपं ॥ ८ ॥
नाभिस्थेनाग्निना विद्वा नश्यन्ते व्याधयो ग्रहाः ।
पीतचक्रं गदा रक्ताः स्वराः श्याममवान्तरं ॥ ९ ॥
नेमिः श्वेता वह्निः कृष्णवर्णरेखा च पार्थिवी ।
मध्येतरेमरे वर्णानेवं चक्रद्वयं(१) लिखेत् ॥ १० ॥
आदावानीय कुम्भोदं गोचरे सन्निधाय च ।
दत्त्वा सुदर्शनं तत्र याम्ये चक्रे हुनेत् क्रमात् ॥ ११ ॥
आज्यापामार्गसमिधौ ह्यक्षतं तिलसर्षपौ ।
पायसं गव्यमाज्यञ्च सहस्राष्टकसंख्यया ॥ १२ ॥
हुतशेषं क्षिपेत् कुम्भे प्रतिद्रव्यं विधानवित् ।
प्रक्षालनेन क्षतं पिण्डं कुम्भे तस्मिन्विवेशयेत् ॥ १३ ॥
विष्णादि सर्वं तत्रैव न्यसेत् तत्रैव दक्षिणे ।
नमो विष्णुजनेभ्यः सर्वशान्तिकरेभ्यः प्रतिष्टङ्कन्तु शान्तये नमः ।
दद्यादनेन मन्त्रेण हुतशेषाज्यसा बलिं ॥ १४ ॥
फलके कल्पिते पात्रे पलाशं क्षीरशाखिनः ।
गव्यपूर्णे निवेश्यैव दिक्षेवं होमयेद्द्विजः ॥ १५ ॥
सदक्षिणमिदं होमत्रयं भूतादिनाशनम् ।

---

१ वर्णद्वयमिति ख० ।

गव्याक्तपत्रलिखितैर्निष्पर्णैः क्षुद्रमृत्तम् ॥ १६ ॥
दूर्वाभिरायुषे पद्मैः श्रिये पुत्रा उडुम्बरैः ।
गोसिद्धैरा सर्पिषा गोष्ठे मेधाये सर्वशाखिना ॥ १७ ॥

ओं ह्रौं नमो भगवते नारसिंहाय ज्वालामालिने दीप्तदंष्ट्राया-ग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्व्वज्वरविनाशाय दह२ पच२ रक्ष२ ह्रः फट् ।

मन्त्रोयं नारसिंहस्य सकलाघनिवारणः ।
जप्यादिनाहरेत् क्षुद्रयक्षमारीविषामयान् ।
चूर्णमष्टकवयमा जलाग्निस्तम्भकृद्भवेत् ॥ १८ ॥

इत्याग्नेये महापुराणे नारसिंहादिमन्त्रा नाम
षष्ठाधिकत्रिशततमोऽध्यायः ।

अथ षष्ठाधिकत्रिशततमोऽध्यायः ।

त्रैलोक्यमोहनमन्त्राः ।

अग्निरुवाच । वक्ष्ये मन्त्रं चतुर्वर्गसिद्धं त्रैलोक्यमोहनम् ।

ओं श्रीं क्रीं क्रूं ओं नमः पुरुषोत्तमः पुरुषोत्तमप्रतिरूप लक्ष्मीनिवास सकलजगत्क्षोभण सर्वस्त्रीहृदयदारण त्रिभुवन-मदोन्मादकर सुरमनुजसुन्दरीजनमनांसि तापय २ दीपय २ शोषय२ मारय२ स्तम्भय२ द्रावय२ आकर्षय२ परमसुभग सर्व-सौभाग्यकर कामप्रद अमुकं हन२ चक्रेण गदया खड्गेन सर्व-

वाणैर्भिंद२ पाशेन हृद२ अङ्कुशेन ताड़य२ तुरु२ किल्लिछसि-यावत्तावत् समीहितं मे सिद्धं भवति फुँ फट् नमः ।

ॐ पुरुषोत्तम त्रिभुवनप्रदीप्तादरकर फुँ फट् हृदयाय नमः कर्षय महाबल फुँ फट् शिखायै त्रिभुवनेश्वर सर्वजनमनांसि हन२ दारय २ मम वशमानय २ फुँ फट् नेत्राय त्रैलोक्यमोहन हृषीकेशाप्रतिरूप सर्वस्त्रीहृदयाकर्षण आगच्छ२ नमः ॥

सङ्गात्तिस्रोयकेन न्यासं मूलवदीरितं ॥ १ ॥
दृष्ट्वा सञ्जप्य पश्चाद्गत्सहस्रमभिषिच्य च ।
कुण्डेऽग्नौ देविके वह्नौ चरुं श्रुत्वा यतं हुनेत् ॥ २ ॥
पृथग्दधि घृतं क्षीरं चरुं माज्यं पयः शृतं ।
हादशाहुतिमूलेन सहस्रञ्चाचतांस्त्रिलान् ॥ ३ ॥
यवं मधुत्रयं पुष्पं फलं दधि समिच्छतं ।
हुत्वा पूर्णाहुतिं शिष्टं प्राशयेत्साधुतं चरुं ॥ ४ ॥
सम्भोज्य विप्रानाचार्यं तोषयेत्सिध्यते मनुः ।
स्नात्वा यथावदाचम्य वाग्यतो यागमन्दिरं ॥ ५ ॥
गत्वा पद्मासनं बद्ध्वा शोषयेदिधिना वपुः ।
रक्षोघ्नविघ्नछिदिस्तु न्यसेदादौ सुदर्शनम् ॥ ६ ॥
पद्मबीजं नाभिमध्यस्थं धूम्रं चण्डानिलात्मकम् ।
अग्नेयं कल्मषं देहात् विश्लेषयदनुस्मरेत् ॥ ७ ॥
रंबीजं हृदयाम्भस्थं स्मृत्वा ज्वालाभिरादहेत् ।
उर्ध्वास्यैरग्निभिस्तु मूर्द्धि संज्ञावयेद्वपुः ॥ ८ ॥
ध्यात्वामृतैर्वहियान्तः सुषुम्नामार्गगामिभिः ।
एवं शुद्धवपुः प्राणानायम्य मनुना त्रिधा ॥ ९ ॥

विन्यसेन्नाभ्यहृस्तान्तः शक्तिं मस्तकवक्त्रयोः ।
गुह्ये गले दिक्षु हृदि कुक्षौ देहे च सर्व्वतः ॥ १० ॥
आवाह्य ब्रह्मरन्ध्रेण हृत्पद्मे सूर्य्यमण्डलात् ।
तारेण सम्परात्मानं स्मरेत्तं सर्व्वलक्षणं ॥ ११ ॥

त्रैलोक्यमोहनाय विद्महे स्मराय
धीमहि तन्नो विष्णुः प्रचोदयात् ।

आत्मार्चनात् क्रतुद्रव्यं गोपयेच्छ्रुवपात्रकं ।
कृत्वात्मपूजां विधिना स्थण्डिले तं समर्च्चयेत् ॥ १२ ॥
कर्म्मादिकल्पिते पीठे पद्मस्थं गरुडोपरि ।
सर्व्वाङ्गसुन्दरं प्राप्तवयोलावण्ययौवनं ॥ १३ ॥
मदाघूर्णिततामाक्षमुदारं स्मरविह्वलं ।
दिव्यमाल्याम्बरालेपभूषितं सस्मितानने ॥ १४ ॥
विष्णुं नानाविधानेकपरिवारपरिच्छदम् ।
लोकानुग्रहणं सौम्यं सहस्रादित्यतेजसं ॥ १५ ॥
पद्मवाग्गधरं प्राप्तकामेशं हिचतुर्भुजम् ।
देवस्त्रीभिर्हृतं देवीमुखासक्तेक्षणं जपेत् ॥ १६ ॥
चक्रं शङ्खं धनुः खड्गं गदां मुषलमङ्कुशं ।
पाशञ्च बिभ्रतं चार्च्चेदावाहार्घ्यविसर्गतः ॥ १७ ॥
श्रियं वामोरुजङ्घाख्यां श्लिष्यन्तीं पाणिना पतिं ।
राजचामरकरां पीनां श्रीवत्सकौस्तुभान्वितां ॥ १८ ॥
मालिनं पीतवस्त्रञ्च चक्राद्याढ्यं हरिं यजेत् ।

ॐ सुदर्शन महाचक्रराज दुष्टभयङ्कर छिन्द २ छिन्द २
विदारय २ परमन्त्रान् ग्रस २ भक्षय २ भूतानि चामय २ ह्रूं

फट् ॐ जलचराय स्वाहा । खड्गतीक्ष्ण छिन्द २ खड्गाय नमः । शारङ्गाय मघराय हूं फट् । भूतग्रामाय विद्महे चतुर्विधाय धीमहि तन्नो ब्रह्म प्रचोदयात् । सम्वर्त्तक ग्रसन पोषय २ हूं फट् स्वाहा । पाश बन्ध २ आकर्षय २ हूं फट् । अङ्कुशेन कट हूं फट् ।

क्रमाद्भुजेषु मन्त्रैः स्वैरेभिरस्त्राणि पूजयेत् ॥ १८ ॥

ॐ पक्षिराजाय हूं फट् ।

तार्क्ष्यं यजेत् कर्णिकायामङ्गदेवान् यथाविधि ।
शक्तिरिन्द्रादियत्नेषु तार्क्ष्याद्या धृतचामराः ॥ २० ॥
शङ्खयोऽग्ने प्रयोज्यादौ सुरेशाद्याश्च दक्षिणा ।
पीते लक्ष्मीसरस्वत्यौ रतिप्रीतिजयाः सिताः ॥ २१ ॥
कीर्त्तिकान्त्यौ सिते श्यामे तुष्टिपुष्ट्यौ सरोदिते ।
लोकेशास्त्रं यजेद्देवं विष्णुमिष्टार्थसिद्धये ॥ २२ ॥
ध्यायेन्मन्त्रं जपित्वैनं जुहुयात्त्वभिषेचयेत् ।

ॐ श्रीं क्लीं क्लीं हूं त्रैलोक्यमोहनाय विष्णवे नमः ।

एतत्पूजादिना सर्व्वान् कामानाप्नोति पूर्व्ववत् ॥ २३ ॥
तोयैः सम्मोहनी पुष्पैर्नित्यन्तेन च तर्पयेत् ।
ब्रह्मा सशक्तिश्चोदण्डो बीजं त्रैलोक्यमोहनम् ॥ २४ ॥
जप्त्वा त्रिलक्षं हुत्वा च दशांशं विल्वैश्च साज्यकैः ।
तण्डुलैः फलगन्धाद्यैः(१) दूर्वाभिश्चायुतात्प्रयात् ॥ २५ ॥
तयाभिषेकहोमादिक्रियातुष्टो ऽभीष्टदः ।

---

१ फलपुष्पाद्यैरिति ङ० ।

ॐ नमो भगवते वराहाय भूर्भुवः स्वःपतये भूपतित्वं मे देहि हृदयाय स्वाहा ।

षड्वाङ्गं नित्यमयुतं जप्त्वायूराज्यमाप्नुयात् ॥ २६ ॥

इत्याग्नेये महापुराणे त्रैलोक्यमोहनमन्त्रो नाम षडधिक-त्रिशततमोऽध्यायः ।

अथ सप्ताधिकत्रिशततमोऽध्यायः ।

त्रैलोक्यमोहनीलक्ष्मादिपूजा ।

अग्निरुवाच । वक्ष्यः सर्वक्रियामाद्यो दण्डी श्रीः सर्वसिद्धिदा ।

महाश्रिये महासिद्धे महाविद्युत्प्रभे नमः ॥ १ ॥

श्रिये देवि विजये नमः । गौरि महाबले वज्र २ नमः । ह्रूं महाकाये पद्महस्ते ह्रूं फट् श्रियै नमः । श्रियै फट् श्रियै नमः । श्रियै फट् श्रीं नमः । श्रिये श्रीद नमः स्वाहा श्रीफट् ॥

अस्याङ्गानि नवोक्तानि तेष्वेकस्य समाश्रयेत् ।

त्रिलक्षमेकलक्षं वा जप्त्वाद्यालैश्च भूतिदः ॥ २ ॥

श्रीगेहे विष्णुगेहे वा श्रियं पूज्य धनं लभेत् ।

आज्यालैस्तण्डुलैर्लक्षं जुहुयात् खादिरानले ॥ ३ ॥

राजा वश्यो भवेद्धविः श्रीश्च स्यादुत्तरोत्तरं ।

सर्वपाश्रीभिषेकेण नश्यन्ते सकला ग्रहाः ॥ ४ ॥

विल्वलक्षहुता लक्ष्मीर्वित्तहृद्विश्व जायते ।

यन्त्रवेश्म चतुर्द्वारं हृदये चिन्तयेदथ ॥ ५ ॥

बलाकां वामनां श्यामां श्वेतपङ्कजधारिणीम्।
ऊर्ध्वबाहुद्वयं ध्यायेत्क्रीडन्तीं हरिं पूर्ववत् ॥ ६ ॥
उर्द्धीकृतेन हस्तेन रक्तपङ्कजधारिणीं।
श्वेताङ्गीं दक्षिणे हरिं चिन्तयेद्वनमालिनीम् ॥ ७ ॥
हरितां दोर्द्वयेनोर्ध्वमुद्वहन्तीं सिताम्बुजम्।
ध्यायेद्विभीषिकां नाम श्रीमूर्तीं हरिं पश्चिमे ॥ ८ ॥
शाङ्करीमुत्तरे हरिं तन्मध्ये ऽष्टदलपङ्कजम्।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ ९ ॥
ध्येयास्ते पद्मपत्रेषु शङ्खचक्रगदाधराः।
अञ्जनचीरकाश्मीरहेमाभास्ते सुवाससः ॥ १० ॥
आग्नेयादिषु पत्रेषु गुग्गुलुश्च कुरण्टकः।
दमकः सलिलश्चेति हस्तिनो रजतप्रभाः ॥ ११ ॥
हेमकुम्भधराश्चैते कर्णिकायां श्रियं स्मरेत्।
चतुर्भुजां सुवर्णाभां सपद्मोर्ध्वभुजद्वयां ॥ १२ ॥
दक्षिणाभयहस्ताभां वामहस्तवरप्रदां।
श्वेतगन्धांशुकामिकरीम्यमालास्रधारिणीं ॥ १३ ॥
ध्यात्वा सपरिवारान्तामभ्यर्च्य सकलं लभेत्।
द्रोणाजपुष्पश्रीवृक्षपर्णं मूर्द्धि न धारयेत् ॥ १४ ॥
लवणामलकं वर्ज्यं नागादित्यतिथौ क्रमात्।
पायसाशी जपेत् सूक्तं श्रियस्तेनाभिषेचयेत् ॥ १५ ॥
आवाहादिविसर्गान्तां मूर्द्धि ध्यात्वार्चयेत् श्रियम्।
विल्वाज्याब्जपायसेन पृथग् योगः श्रिये भवेत् ॥ १६ ॥
विषं महिषकालाग्निरुद्रज्योतिर्वकद्वयम्।

ॐ क्रौं महामहिषमर्द्दिनि ठ ठ मूलमन्त्रं महिषहिंसके नमः । महिषगतं भ्रामय २ ह्रूँ फट् ठ ठ महिषं क्षेपय २ ह्रूँ महिषं हन२ देवि ह्रूँ महिषनिसूदनि फट् ।

दुर्गाहृदयमित्युक्तं साङ्गं सर्वार्थसाधकम् ॥ १७ ॥

यजेद्यथोक्तं तां देवीं पीठस्यैवाङ्गमध्यगम् ।

ॐ क्रौं दुर्गे दुर्गे रक्षणि स्वाहा चेति दुर्गायै नमः । वरवर्ण्यै नमः । आर्य्यायै कनकप्रभायै कृत्तिकायै अभयप्रदायै कन्यकायै सुरूपायै ॥

पत्रस्थाः पूजयेदेता मूर्त्तीराद्यैः स्वरैः क्रमात् ॥ १८ ॥

चक्राय शङ्खाय गदायै खड्गाय धनुषे बाणाय ॥

अष्टम्यादौ रिमां दुर्गां लोकेयान्तां यजेदिति ।

दुर्गायोगः समाख्यातोस्वामिरक्षाजयादिकृत् ॥ १९ ॥

ससाध्येगानमन्त्रेण तिलहोमो वशीकरः ।

जयः पद्मैस्तु दुर्व्वाभिः शान्तिः कामः पलाशजैः ॥ २० ॥

पुष्टिः स्यात् काकपक्षेण मृतिर्हेषदिकं भवेत् ।

यद्वक्षुद्रभयापत्तिं सर्वमेव मनुर्हरेत् ॥ २१ ॥

ॐ दुर्गे दुर्गे रक्षणि स्वाहा ।

रक्षाकरीयमुदिता जयदुर्गाङ्गसंयुता ।

श्यामां त्रिलोचनां देवीं ध्यात्वात्मानं चतुर्भुजम् ॥ २२ ॥

शङ्खचक्राब्जशूलादित्रिशूलां रौद्ररूपिणीं ।

युद्धादौ मन्त्रयेदेतां यजेत् खड्गादिके जये ॥ २३ ॥

इत्याग्नेये महापुराणे त्रैलोक्यमोहनीलक्ष्मादिपूजा नाम सप्ताधिकत्रिशततमोऽध्यायः ।

अथाष्टाधिकत्रिशततमोऽध्यायः।

त्वरितापूजा।

अग्निरुवाच। त्वरिताङ्गान्समाख्यास्ये भुक्तिमुक्तिप्रदायकान्।

ॐ आधारशक्त्यै नमः। ॐ ह्रीं पुरु२ महासिंहाय नमः। ॐ पद्माय नमः। ॐ ह्रीं ह्रूँ खेचछिन्द्र। स्त्रीं ॐ ह्रूँ त्रैं ह्रूँ फट् त्वरितायै नमः। खे च हृदयाय नमः। चछे शिरसे नमः। छेन्द्र शिखायै नमः। चस्त्री कवचाय नमः। स्त्रीं ह्रूँ नेत्राय नमः। ह्रूँ खे अस्त्राय फट् नमः। ॐ त्वरितायै विद्महे तूर्णविद्यायै धीमहि तन्नो देवी प्रचोदयात्। ॐ प्रचण्डितायै नमः। ह्रूँकारायै नमः। ॐ खेच हृदयाय नमः। खेचर्य्यै नमः। ॐ चण्डायै नमः। छेदन्यै नमः चेपण्यै नमः। स्त्रियै ह्रूँकार्य्यै नमः। चेमङ्कर्य्यै जयायै किङ्कराय रक्ष। ॐ त्वरिताम्बया स्थिरो भव वषट्।

तीतला त्वरिता तूर्णेत्येवं विद्येयमीरिता॥ १॥
शिरोभ्रूमस्तके कण्ठे हृदि नाभौ च गुह्यके।
ऊर्ध्वोर्ध्व जानुजङ्घोरुहृये चरणयोः क्रमात्॥ २॥
न्यस्ताङ्गो न्यस्तमन्त्रस्तु समस्तं व्यापकं न्यसेत्।
पार्वती शबरी चेया वरदाभयहस्तिका॥ ३॥
मयूरबलया पिच्छमौलिः किसलयांशुका।
सिंहासनस्था मायूरवर्हच्छत्रसमन्विता॥ ४॥
त्रिनेत्रा श्यामला देवी वनमालाविभूषणा।

विप्राहिकर्णाभरणा चन्द्रकेयूरभूषणा ॥ ५ ॥
वैश्वनागकटीबन्धा हयलाहिलतनूपुरा ।
एवं रूपान्विका भूत्वा तन्मन्त्रं नियुतं जपेत् ॥ ६ ॥
ईशः किरातरूपोऽभूत् पुरा गौरी च तादृशी ।
जपेद्ध्यायेत् पूजयेत्तां सर्वसिद्धैर्विषादिहृत् ॥ ७ ॥
अष्टसिंहासने पूज्या दले पूर्वादिके क्रमात् ।
अङ्गगायत्री प्रणीता हृद्धारायां दलाग्रके ॥ ८ ॥
फट्कारी चायतो देव्याः श्रीबीजेनार्च्ययेदिमाः ।
लोकेशायुधवर्णास्ताः फट्कारी तु धनुर्धरा ॥ ९ ॥
जया च विजया हास्ये पूज्ये सौवर्णयष्टिके ।
किङ्करा वर्वरी मुण्डी लगुडी च तयोर्बहिः ॥ १० ॥
इष्टैवं सिद्धयेद्द्रव्यैः कुण्डे योन्याकृतौ हुनेत् ।
हेमलाभोऽर्जुनैर्बान्धैर्गोधूमैः पुष्टिसम्पदः ॥ ११ ॥
यवैर्दान्त्यैस्तिलैः सर्वसिद्धिरौतिविनाशनम् ।
अक्षैरन्नसता शस्यैः शाल्मलीभिश्च मारणम् ॥ १२ ॥
जम्बुभिर्धनधान्यास्रिस्तुष्टिर्नीलोत्पलैरपि ।
रक्तोत्पलैर्ग्रहापुष्टिः कुन्दपुष्पैर्ग्रहोदयः ॥ १३ ॥
मल्लिकाभिः पुरश्चोभः कुसुदैर्जनवल्लभः ।
अशोकैः पुत्रलाभः स्यात् पाटलाभिः शुभाङ्गना ॥ १४ ॥
आम्रैरायुस्तिलैर्लक्ष्मीर्विल्वैः श्रीयम्बकैर्धनम् ।
इष्टं मधुकपुष्पैश्च विल्वैः सर्वज्ञतां लभेत् ॥ १५ ॥
त्रिलक्षजप्यात्सर्वास्रिर्होमाद्यानात्तथेप्सया ।
मण्डलेऽभ्यर्च्य गायत्र्या आवृतीः पञ्चविंशतिम् ॥ १६ ॥

दद्याद्धृतत्रयं मूलात् पल्लवैर्दीक्षितो भवेत् ।
पञ्चगव्यं पुरा पीत्वा चरुकं भागयेत्ततः ॥ १७ ॥

इत्याग्नेये महापुराणे त्वरितापूजा नामाष्टाधिक-
त्रिशततमोऽध्यायः ।

अथ नवाधिकत्रिशततमोऽध्यायः ।

त्वरितामन्त्रादिः ।

अग्निरुवाच । अपरां त्वरिताविद्यां वक्ष्येऽहं भुक्तिमुक्तिदां ।
पुरे वज्राकुले(१) देवीं रजोभिर्लिखिते यजेत् ॥ १ ॥
पद्मगर्भे दिग्विदिक्षु चाष्टौ वज्राणि वीथिकां ।
हारयोभोपयोभाश्च लिखेच्छीघ्रं स्मरेच्वरः ॥ २ ॥
अष्टादशभुजां सिंहे वामजङ्घा प्रतिष्ठिता ।
दक्षिणा द्विगुणा तस्याः पादपीठे समर्पिता ॥ ३ ॥
नागभूषां वज्रकुण्डे खड्गं चक्रं गदां क्रमात् ।
शूलं शरं तथा शक्तिं वरदं दक्षिणैः करैः ॥ ४ ॥
धनुः पाशं शरं घण्टां तर्जनीं शङ्खमङ्कुशम् ।
अभयञ्च तथा वज्रं वामपार्श्वे धृतायुधम् ॥ ५ ॥
पूजनाच्छ्रुतनाशः स्याद्दृष्टं जयति लीलया ।
दीर्घायूराष्ट्रभूतिः स्याद्दिव्यादिव्यादिसिद्धिभाक् ॥ ६ ॥

---

१ वज्रार्मले इति अ० ।

तलेतिसप्तपाताला: कालाग्निभुवनान्तका: ।
श्रीं कारादिस्वरारंभ्य यावद्ब्रह्माण्डवाचकम् ॥ ७ ॥
श्रीं काराद्रामयेत्तोयन्तीतला त्वरिता तत: ।
प्रस्तावं सम्प्रवक्ष्यामि स्वरवर्गं लिखेद्भुवि ॥ ८ ॥
तालुर्वग: कवर्ग: स्यात्तृतीयो जिह्वतालुक: ।
चतुर्थस्तालुजिह्वाग्रो जिह्वादन्तस्तु पञ्चम: ॥ ९ ॥
षष्ठोऽष्टपुटसम्पन्नो मिश्रवर्गस्तु सप्तम: ।
जञमाण: स्याच्छवर्गस्तु उद्धरेच्च मनुं तत: ॥ १० ॥
षष्ठस्वरसमारूढं जञ्यणान्तं सविन्दुकम् ।
तालुवर्गद्वितीयन्तु स्वरैकादशयोजितम् ॥ ११ ॥
जिह्वातालुसमायोग: प्रथमं केवलं भवेत् ।
तदेव च द्वितीयन्तु अधस्ताद्विनियोजयेत् ॥ १२ ॥
एकादशस्वरैर्युक्तं प्रथमं तालुवर्गत: ।
जञमाणस्य(१) द्वितीयन्तु अधस्ताद् दृश्य योजयेत् ॥ १३ ॥
षोडशस्वरसंयुक्तमूञमाणस्य द्वितीयकम् ।
जिह्वादन्तसमायोगे प्रथमं योजयेदध: ॥ १४ ॥
मिश्रवर्गाद् द्वितीयन्तु अधस्तात् पुनरेव तु ।
चतुर्थस्वरसंभिन्नं तालुवर्गादिसंयुतम् ॥ १५ ॥
जञमणस्य द्वितीयन्तु अधस्ताद्विनियोजयेत् ।
स्वरैकादशभिन्नन्तु जञमणान्तं सविन्दुकम् ॥ १६ ॥
पञ्चस्वरसमारूढं ओष्ठसम्पुटयोगत: ।
द्वितीयमक्षरस्यान्यज्जिह्वाग्रे तालुयोगत: ॥ १७ ॥

१ जञमाणस्येत्यपि पाठो न साधु: ।

प्रथमं पञ्चमे योज्यं स्वरार्द्धेनोद्धृता इमे ।
ओंकाराद्या नमोन्ताय जपेत् स्वाहाग्निकार्य्यके ॥ १८ ॥

ओं क्ष्रौं क्ष्रूं क्ष्रः हृदयं हां हृयेति शिरः । क्ष्रौं ज्वल ज्वल-शिखा स्यात् कवचं हनुद्वयम् । क्ष्रीं त्र्यं त्र्यम्बकाय विद्यानेत्रं प्रकीर्त्तितम् क्ष्रौं हः खौं ह्रं फडस्त्राय गुह्याङ्गानि पुरा न्यसेत् ।

स्वरिताङ्गानि वक्ष्यामि विद्याङ्गानि शृणुष्व मे ।
आदिद्विहृदयं प्रोक्तं त्रिचतुःशिर इष्यते ॥ १९ ॥
पञ्चषष्ठः शिखा प्रोक्ता कवचं सप्तमाष्टमम् ।
तारकन्तु भवेन्नेत्रं नवार्द्धोच्चरलक्षणं ॥ २० ॥
तीक्ष्णेति समाख्याता वज्रतुण्डे ततो भवेत् ।
ख ख ह्रं दशवीजा स्याद्वज्रतुण्डेन्द्रदूतिका ॥ २१ ॥
खेचरि ज्वालिनीज्वाले खखेति ज्वालिनीदश ।
वर्च्चे प्रभविभीषणि खखेति च प्रवर्य्यपि ॥ २२ ॥
छे छेदनि करालिनि खखेति च करालयपि ।
वक्त्रःप्रवद्वप्रवनी ख ख(१) दूतोप्रवं स्यपि ॥ २३ ॥
स्तोबालकारे धुननि शास्त्री वसनवेगिका ।
चे पचे कपिले हम हस कपिला नाम दूतिका ॥ २४ ॥
क्ष्रूं तेजोवति रौद्रो च मातङ्गरौद्रिदूतिका ।
पुटे पुटे ख ख खड्गे फट् ब्रह्मकदूतिका ॥ २५ ॥
वैतालिनि दशार्णाः स्युस्त्यजान्यद्विपलालवत् ।
हृदादिकन्यासादौ स्यान् मध्ये नेत्रे न्यसेत्सुधीः ॥ २६ ॥
पादादारभ्य मूर्द्धान्तं शिर आरभ्य पादयोः ।

---

१ वक्त्र प्रवद्वप्रवनीयेति ख०, ङ० च ।

अङ्घ्रिजानूरुगुह्ये च नाभिहृत्कण्ठदेशतः ॥ २७ ॥
वज्रमण्डलमूर्ध्वं च अधोर्द्धं चादिबीजतः ।
सोमरूपं ततो गात्रं धारामृतसुवर्षिणम् ॥ २८ ॥
विशन्तं ब्रह्मरन्ध्रेण साधकस्तु विचिन्तयेत् ।
मूर्ध्नास्यकण्ठहृन्नाभौ गुह्योरुजानुपादयोः ॥ २९ ॥
आदिबीजं न्यसेन्मन्त्री तर्ज्जन्यादि पुनः पुनः ।
ऊर्द्धं सोममधः पद्मं शरीरं बीजविग्रहं ॥ ३० ॥
यो जानाति न मृत्युः स्यात्तस्य न व्याधयो ज्वरा ।
यजेज्जपेत्तां विन्यस्य ध्यायेद्देवीं गताष्टकम् ॥ ३१ ॥
मुद्रा वक्ष्ये प्रणीताद्याः प्रणीताः पञ्चधा स्मृताः ।
ग्रथितौ तु करौ कृत्वा मध्येऽङ्गुष्ठौ निपातयेत् ॥ ३२ ॥
तर्ज्जनीं मूर्द्धि संलग्नां विन्यसेत्तां शिरोपरि ।
प्रणीतेयं समाख्याता हृदये तां समानयेत् ॥ ३३ ॥
अर्पयन्तु कन्यसामध्ये सबीजान्तां विदुर्बुधाः ।
निर्योज्य तर्ज्जनीमध्येऽनेकलग्नां परस्पराम् ॥ ३४ ॥
ज्येष्ठाग्रं निक्षिपेन्मध्ये भेदनी सा प्रकीर्त्तिता ।
नाभिदेशे तु तां बद्ध्वा अङ्गुष्ठावुत्क्षिपेत्ततः ॥ ३५ ॥
करालो तु महामुद्रा हृदये योज्य मन्त्रिणः ।
पुनस्तु पूर्ववद् बद्धलग्नां ज्येष्ठां समुत्क्षिपेत् ॥ ३६ ॥
वज्रतुण्डा समाख्याता वज्रदेशे तु बन्धयेत् ।
उभाभ्याञ्चैव हस्ताभ्यां मणिबन्धन्तु बन्धयेत् ॥ ३७ ॥
त्रीणि त्रीणि प्रसार्य्येति(१) वज्रमुद्रा प्रकीर्त्तिता ।

१ प्रसार्य्यां चेति ट० ।

दण्डः खड्गश्चक्रगदा मुद्रा चाकारतः स्मृता ॥ ३८ ॥
अङ्गुष्ठेनाक्रमेत् चौणि त्रिशूलश्चीर्घतो भवेत् ।
एका तु मध्यमोर्ध्वा तु शक्तिरेव विधीयते ॥ ३९ ॥
शरश्च वरदश्चापं पाशं भारश्च घण्टया ।
शङ्खमङ्कुशमभयं पद्ममष्ट च विंशतिः ॥ ४० ॥
मोहिणी मोक्षणी चैव ज्वालिनी चाऽमृताभया ।
प्रणीताः पञ्चमुद्रासु पूजाहोमे च योजयेत् ॥ ४१ ॥

इत्याग्नेये महापुराणे त्वरितामन्त्रादिर्नाम नवाधिक-त्रिशततमोऽध्यायः ।

अथ दशाधिकत्रिशततमोऽध्यायः ।

त्वरितामूलमन्त्रादिः ।

अग्निरुवाच । दीक्षादि वक्ष्ये विन्यस्य सिंहवज्राकुलेऽब्जके ।
हे२ हुति वज्रदन्त पुर२ लुलु२ गर्ज्ज२ इह सिंहासनाय नमः ।
तिर्य्यगूर्ध्वगता रेखाश्चत्वारश्चतुरो भवेत् ॥ १ ॥
नवभागविभागेन कोष्ठकान् कारयेद्बुधः ।
आद्या दिग्गताः कोष्ठा विदिग्भासु विनाशयेत् ॥ २ ॥
वाह्ये वै कोष्ठकोणेषु वाह्यरेखाष्टकं स्मृतम् ।
वाह्यकोष्ठस्य वाह्ये तु मध्ये यावत् समानयेत् ॥ ३ ॥
वज्रस्य मध्यमं शृङ्गं वाह्यरेखा द्विधार्धतः ।
वाह्यरेखा भवेद्रक्ता द्विभङ्गा कारयेद्बुधः ॥ ४ ॥

१ व

मध्यकोष्ठं भवेत्पद्मं पीतकर्णिकमुज्ज्वलम् ।
कृष्णेन रजसा लिख्य कुलिशासिशिरोङ्कितम् ॥ ५ ॥
वाह्यतश्चतुरस्रन्तु वज्रसम्पुटलाञ्छितम् ।
द्वारे प्रदापयेन्मन्त्री चतुरो वज्रसम्पुटान् ॥ ६ ॥
पद्मनाम भवेद्दामवीथी चैव समा भवेत् ।
गर्भं रक्तं केशराणि मण्डले दीक्षिताः स्त्रियः ॥ ७ ॥
जयेच्च परराष्ट्राणि क्षिप्रं राज्यमवाप्नुयात् ।
मूर्त्तिं प्रणवसन्दीप्तां हूंकारेण नियोजयेत् ॥ ८ ॥
मूलविद्यां समुच्चार्य्य मरुद्गोमगतां द्विज ।
प्रथमेन पुनश्चैव कर्णिकायां प्रपूजयेत् ॥ ९ ॥
एवं प्रदक्षिणं पूज्य एकैकं बीजमादितः ।
दलमध्ये तु विद्याङ्गा आग्नेय्यां पद्म नैर्ऋतम्(१)॥ १० ॥
मध्ये नेत्रं दिशास्त्रञ्च गुह्यकाङ्गे तु रक्षणम् ।
हृतयः केशरस्थास्तु वामदक्षिणपार्श्वतः ॥ ११ ॥
पद्म पद्म प्रपूज्यास्तु स्वैः स्वैर्मन्त्रैः प्रपूजयेत् ।
लोकपालास्त्रसेदष्टौ वाह्यतो गर्भमण्डले ॥ १२ ॥
वर्णान्तमग्निमारूढं षष्ठस्वरविभेदितं(२) ।
पद्मदलेन चाक्रान्तं स्वैः स्वैर्नामभि योजयेत्(३) ॥ १३ ॥
शीघ्रं(४) सिद्धे कर्णिकायां यजेद् गन्धादिभिः स्त्रिये(५) ।

---

१ आग्नेयावन्नैर्ऋतमिति अ० ।
२ षष्ठस्वरविभूषितमिति ख०, ङ० च ।
३ नामभिर्योजयेदित्यर्थं पाठः पद्मीचीनो भवितुमर्हति ।
४ शीघ्रेति अ० । ५ स्त्रियमिति अ० ।

अष्टाभिर्वेष्टयेत् कुम्भैर्मन्त्राष्टशतमन्त्रितैः ॥ १४ ॥
मन्त्रमष्टसहस्रन्तु जप्याङ्गानां दशांशकम्।
होमं कुर्य्यादग्निकुण्डे वह्निमन्त्रेण चालयेत् ॥ १५ ॥
निक्षिपेद् हृदयेनाग्निं शक्तिं मध्येऽग्निगां स्मरेत्।
गर्भाधानं पुंसवनं जातकर्म्म च होमयेत्। १६ ॥
हृदयेन शतं ह्येकं गुह्याङ्गे जनयेच्छिखिम्।
पूर्णाहुत्या तु विद्यायाः शिवाग्निर्ज्वलितो भवेत् ॥ १७ ॥
होमयेन्मूलमन्त्रेण शतञ्चाङ्गं दशांशतः।
निवेदयेत्ततो देव्यास्ततः शिष्यं प्रवेशयेत् ॥ १८ ॥
अस्त्रेण ताड़नं कृत्वा गुह्याङ्गानि ततो न्यसेत्।
विद्याङ्गैश्चैव सन्नद्धं विद्याङ्गेषु नियोजयेत् ॥ १९ ॥
पुष्पं क्षिपाययेच्छिष्यमानयेदग्निकुण्डकम्।
यवैर्द्रान्यैस्तिलैराज्यैर्मूलविद्याशतं हुनेत् ॥ २० ॥
स्थावरत्वं पुरा होमं सरीसृपमतः परं।
पक्षिमृगपशुत्वञ्च मानुषं ब्राह्ममेव च ॥ २१ ॥
विष्णुत्वञ्चैव रुद्रत्वमन्ते पूर्णाहुतिर्भवेत्।
एकया चैव ह्याहुत्या शिष्यः स्याद्दीक्षितो भवेत् ॥ २२ ॥
अधिकारी भवेदेवं शृणु मोक्षमतः परम्।
सुमेरुस्थो यदा मन्त्री सदाशिवपदे स्थितः ॥ २३ ॥
परे च होमयेत् स्वस्थोऽकर्म्मकर्म्मगतान् दश।
पूर्णाहुत्या तु तद्योगी धर्म्माधर्म्मैर्न लिप्यते ॥ २४ ॥
मोक्षं याति परंस्थानं यद्गत्वा न निवर्त्तते।
यथा जले जलं क्षिप्तं जलं देही शिरस्तथा ॥ २५ ॥

कुम्भैः कुर्य्याच्चाभिषेकं जयराज्यादिसर्व्वभाक् ।
कुमारी ब्राह्मणी पूज्या गुर्व्वादेर्दक्षिणां ददेत् ॥ २६ ॥
यजेत् सहस्रमेकन्तु पूजां कृत्वा दिने दिने ।
तिलाज्यपुरश्चोमेन(१) देवी श्रीः कामदा भवेत् ॥ २७ ॥
ददाति विपुलान् भोगान् यदन्यच्च समीहते ।
जप्त्वा ह्यक्षरलक्षन्तु निधानाधिपतिर्भवेत् ॥ २८ ॥
द्विगुणेन भवेद्राज्यं त्रिगुणेन च यक्षिणी ।
चतुर्गुणेन ब्रह्मत्वं ततो विष्णुपदं भवेत् ॥ २९ ॥
षड्गुणेन महासिद्धिर्लक्षेणैकेन पापहा ।
दश जप्त्वा देहशुद्धिः तीर्थस्नानफलं शतात् ॥ ३० ॥
पटे वा प्रतिमायां वा शीघ्रां वै स्थण्डिले यजेत् ।
शतं सहस्रमयुतं जपे होमे प्रकीर्त्तितम् ॥ ३१ ॥
एवं विधानतो जप्त्वा लक्षमेकन्तु होमयेत् ।
महिषाजमेषमांसेन नरजेन पुरेण(२) वा ॥ ३२ ॥
तिलैर्यवैस्तथा लाजैर्व्रीहिगोधूमकाम्बकैः ।
श्रीफलैराज्यसंयुक्तैर्होमयित्वा व्रतञ्चरेत् ॥ ३३ ॥
अर्द्धरात्रेपि मन्त्रज्ञः खड्गचापशरादिमान् ।
एकयामा विचित्रेण रक्तपीतासितेन वा ॥ ३४ ॥
नीलेन वाथ वस्त्रेण देवीं तेनैव चार्च्चयेत् ।
व्रजेद्दक्षिणदिग्भागं द्वारे दद्याद्बलिं बुधः ॥ ३५ ॥

---

१ तिलाज्यप्लवहोमेनेति ख०, ङ० च ।

२ प्लवेनेति ख०, ङ० च ।

दूतीमन्त्रेण द्वारादौ एकवक्त्रे श्मशानके ।
एवञ्च सर्व्वकामाप्तिर्भुङ्क्ते सर्व्वां महीं नृपः ॥ ३६ ॥

इत्याग्नेये महापुराणे त्वरितामूलमन्त्रो नाम दशाधिक-त्रिशततमोऽध्यायः ।

अथैकादशाधिकत्रिशततमोऽध्यायः ।

त्वरिताविद्या ।

अग्निरुवाच । विद्याप्रस्तावमाख्यास्ये धर्म्मकामादिसिद्धिदम् ।
नवकोष्ठविभागेन विद्याभेदञ्च विन्दति ॥ १ ॥
अनुलोमविलोमेन समस्तव्यस्तयोगतः ।
कर्णावितर्णयोगेन अत ऊर्द्धं विभागगः ॥ २ ॥
त्रिचक्रेण च योगेन देव्या सन्नद्धविग्रहः ।
जानाति सिद्धिदाञ्मन्त्रान् प्रस्तावान्निर्गतान् बहून् ॥ ३ ॥
शास्त्रे शास्त्रे स्मृता मन्त्राः प्रयोगास्तत्र दुर्लभाः ।
गुरुः स्यात् प्रथमो वर्णः पूर्व्वेद्युर्न च वर्णते ॥ ४ ॥
प्रस्तावे तत्र चैकार्णा हार्णाख्यर्णादयो ऽभवन् ।
तिर्य्यगूर्द्धगता रेखाश्चतुरश्चतुरो भजेत् ॥ ५ ॥
नव कोष्ठा भवन्त्येवं मध्यदेशे तथा द्रमान् ।
प्रदक्षिणेन संस्थाप्य प्रस्तावं भेदयेत्ततः ॥ ६ ॥
प्रस्तावक्रमयोगेन प्रस्तावं यस्तु विन्दति ।
करमुष्टिस्थितास्तस्य साधकस्य हि सिद्धयः ॥ ७ ॥

त्रैलोक्यं पादमूले स्यात्रवखण्डां भुवं लभेत् ।
कपाले तु समालिख्य शिवतत्त्वं समन्ततः ॥ ८ ॥
श्मशानकर्पटे वाथ वाह्यं निष्क्रम्य मन्त्रवित् ।
तस्य मध्ये लिखेन्नाम कर्णिकोपरि संस्थितम् ॥ ९ ॥
तापयेत्खादिराङ्गारैर्भूर्जमाक्रम्य पादयोः ।
समाहादानयेत् सर्व्वं त्रैलोक्यं सचराचरम् ॥ १० ॥
वज्रसम्पुटगर्भे तु हादगारे तु लेखयेत् ।
मध्ये गर्भगतं नाम मदाग्निवेष्टितम् ॥ ११ ॥
कुड्ये (१) फलकके वाथ शिलापट्टे हरिद्रया ।
मुखस्तम्भं गतिस्तम्भं सैन्यस्तम्भन्तु जायते ॥ १२ ॥
विपरीतेन सलिख्य श्मशाने कर्परे बुधः ।
षट्कोणं दण्डमाक्रान्तं समन्ताच्छक्तियोजितम् ॥ १३ ॥
मारयेदरिरादेष श्मशाने निहतं रिपुं ।
छेदं करोति राष्ट्रस्य चक्रमध्येन्यसेद्रिपुं ॥ १४ ॥
चक्रधाराङ्कितां शक्तिं रिपुनाम्ना रिपुं हरेत् ।
तार्क्ष्येणैव तु वीजेन खड्गमध्ये तु लेखयेत् ॥ १५ ॥
विदर्भरिपुनामाथ श्मशानाङ्गारलेखितम् ।
समाहात्साधयेद्देहं ताडयेत् प्रेतभस्मना ॥ १६ ॥
भेदने छेदने चैव मारणेषु शिवो भवेत् ।
तारकं नेत्रमुद्दिष्टं शान्तिपुष्टौ नियोजयेत् ॥ १७ ॥
दहनादिप्रयोगार्थं शाकिनीश्चैव कर्षयेत् ।
मध्याह्नदिवाकर्णीं यावद्दक्तदण्डसमन्वितः(२) ॥ १८ ॥

---

१ कुण्ड इति क० । २ वक्रतुण्डसमन्वित इति ट० ।

कुष्ठाद्या व्याधयो ये तु नाशयेत्तान्न संशयः ।
मध्यादिउत्तरान्तन्तु करान्तीबन्धनाञ्जपेत् ॥ १९ ॥
रक्षयेदात्मनो विद्यां प्रतिवादी यदा भ्रिवः ।
वारुण्यादि ततो न्यस्य ज्वरकाग्रविनाशनम् ॥ २० ॥
सौम्यादि मध्यमान्तन्तु गुरुत्वं जायते वटे ।
पूर्व्वादि मध्यमान्तन्तु लघुत्वं कुरुते क्षणात् ॥ २१ ॥
भूर्ज्जे रोचनया लिख्य एतद्यन्त्राकुलं पुरम् ।
क्रमस्थैर्म्मन्त्रबीजैस्तु रक्षां देहेषु कारयेत् ॥ २२ ॥
वेष्टिता भावहेम्ना च(१) रक्षेयं मृत्युनाशिनी ।
विघ्नपापारिदमनी सौभाग्यायुःप्रदा धृता ॥ २३ ॥
द्यूते रेणे च जयदा शक्रसैन्ये न संशयः ।
बन्ध्यानां पुत्रदा ह्येषा चिन्तामणिरिवापरा ॥ २४ ॥
साधयेत् परराष्ट्राणि राज्यञ्च पृथिवीं जयेत् ।
फट् स्त्रीं क्ष्रौं ह्रूं लक्षजप्याद्यचादिर्वश्यगो भवेत् ॥ २५ ॥

इत्याग्नेये महापुराणे त्वरिताविद्या नामैकादशाधिक-
त्रिशततमोऽध्यायः ।

अथ द्वादशाधिकत्रिशततमोऽध्यायः ।

नानामन्त्राः ।

अग्निरुवाच । ओं विनायकार्च्चनं वक्ष्ये यजेदाधारशक्तिकम् ।
धर्म्माद्यष्टककन्दञ्च नालं पद्मञ्च कर्णिकाम् ॥ १ ॥

---

१ तारहेम्ना चेति च० ।

केयूरं त्रिगुणं पद्मं तीव्रञ्च ज्वलिनीं यजेत् ।
नन्दाञ्च सुयशाञ्चोग्रां तेजोवतीं विन्ध्यवासिनीं(१) ॥ २ ॥
गणमूर्त्तिं गणपतिं हृदयं स्याद्गणं जयः ।
एकदन्तोत्कटगिरःशिखायाचलकर्णिने ॥ ३ ॥
गजवक्त्राय कवचं ह्रूँ फडन्तं तथाष्टकं ।
महोदरो दण्डहस्तः पूर्व्वादौ मध्यतो यजेत् ॥ ४ ॥
जयो गणाधिपो गणनायकोऽथ गणेश्वरः ।
वक्रतुण्ड एकदन्तोत्कटलम्बोदरो गजः ॥ ५ ॥
वक्त्रो विकटाननोऽथ ह्रूँपूर्व्वो विघ्ननाशनः ।
धूम्रवर्णो महेन्द्राद्यो वाह्ये विघ्नेशपूजनम् ॥ ६ ॥
त्रिपुरापूजनं(२) वक्ष्ये अमिताङ्गो रुरुस्तथा ।
चण्डः क्रोधस्तथोन्मत्तः कपाली भीषणः क्रमात् ॥ ७ ॥
संहारो भैरवो ब्राह्मीमुख्या ह्रूंवास्तु भैरवाः ।
ब्रह्माणीषण्मुखा दीर्घा अग्न्यादौ वटुकाः क्रमात् ॥ ८ ॥
समयपूर्वो वटुको योगिनीपूजकस्तथा ।
सिद्धपूजश्च वटुकः कुलपूजश्चतुर्थकः ॥ ८ ॥
हेतुकः क्षेत्रपालश्च त्रिपुरान्तो द्वितीयकः ।
अग्निवेतालोऽग्निजिह्वः करालो काललोचनः ॥ १० ॥
एकपादश्च भीमाश्च ऐं ह्रीं प्रेतस्तथासनं ।
ऐं ह्रीं होंय त्रिपुरा पद्मासनसमास्थिता ॥ ११ ॥
बिभ्रत्यभयपुस्तञ्च वामे वरदमालिकाम् ।

---

१ विन्ध्यवासिनीमिति ङ० ।

२ त्रिपुरायजनमिति क०, ख०, ज०, ञ०, ट० च ।

मूलेन हृदयादि स्याज्जालपूर्णञ्च कामकम् ॥ १२ ॥
गोमध्ये नाम संलिख्य चाष्टपत्रे च मध्यतः ।
श्मशानादिपटे श्मशानाङ्गारेण विलेखयेत् ॥ १३ ॥
चिताङ्गारपिष्टकेन मूर्त्तिं ध्यात्वा तु तस्य च ।
चित्तोदरे नीलसूत्रैर्वेष्ट्य चोच्चाटनं भवेत् ॥ १४ ॥
ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते स्वाहा ।
युद्धे गच्छन् जपन्मन्त्रं पुमान् साम्राज्ययो भवेत् ।
ॐ यों ह्रीं क्लीं श्रियै नमः ।
उत्तरादौ च घृणिनो सूर्य्या पूज्या चतुर्दले ॥ १५ ॥
आदित्या प्रभावती च हेमाद्रिमधुराश्रियः ।
ॐ ह्रीं गौर्य्यै नमः ।
गौरीमन्त्रः सर्व्वकरः होमाद्यानाज्जपार्च्चनात् ॥ १६ ॥
रक्ता चतुर्भुजा पाशवरदा दक्षिणे करे ।
अङ्कुशाभययुक्तान्तां प्रार्थ्य सिद्धिमना पुमान् ॥ १७ ॥
जीवेद्वर्षशतं धीमान्न चौरारिभयं भवेत् ।
क्रुद्धः प्रमादी भवति युधि मन्त्राम्बुपानतः ॥ १८ ॥
अञ्जनं तिलकं वश्ये जिह्वाग्रे कविता भवेत् ।
तज्जपान्मैथुनं वश्ये तज्जपाद्योनिवीक्षणम् ॥ १९ ॥
स्वर्गादग्नौ तिलहोमात्सर्व्वञ्चैव तु सिध्यति ।
सप्ताभिमन्त्रितञ्चान्नं भुञ्जंस्तस्य श्रियः सदा ॥ २० ॥
अर्द्धनारीश्वररूपोऽयं लक्ष्म्यादिवैष्णवादिकः ।
अनङ्गरूपा शक्तिश्च द्वितीया मदनातुरा ॥ २१ ॥
पवनवेगा भुवनपाला वै सर्व्वसिद्धिदा ।

अनङ्गमदनानङ्गमेखलाम्लाञ्जपेच्छिवे ॥ २२ ॥
पद्ममध्यदलेषु क्ष्रौं स्वरान् कादींस्ततः स्त्रियाः ।
षट्कोणे वा घटे वाऽथ लिखित्वा स्याद्वशीकरं ॥ २३ ॥
ओं क्ष्रां क्ष्रूं नित्यक्लिन्ने मदद्रवे ओं श्रीं ।
मूलमन्त्रः षडङ्गोयं रक्तवर्णे त्रिकोणके ।
द्रावणी क्षोभणी चोभिणी गुरुशक्तिका ॥ २४ ॥
ईशानादौ च मध्ये तां नित्यां पाशाङ्कुशौ तथा ।
कपालकल्पकतरुं वीणा रक्ता च तद्वतौ ॥ २५ ॥
नित्याभद्रा मङ्गला च नववीरा च मङ्गला ।
दुर्भगा मनोन्मनी पूज्या द्रावा पूर्व्वादितः स्थिता ॥२६॥
ओं क्ष्रौं अनङ्गाय नमः ओं क्ष्रौं क्ष्रीं स्मराय नमः ।
मन्मथाय च माराय कामायैवञ्च पञ्चधा ।
कामाः पाशाङ्कुशौ चापबाणाः ध्येयाश्च विभ्रतः ॥ २७ ॥
रतिश्च विरतिः प्रीतिर्विप्रीतिश्च मतिर्धृतिः ।
विधृतिः पुष्टिरेभिश्च क्रमात् कामादिकैर्युताः ।
ओं क्ष्रूं नित्यक्लिन्ने मदद्रवे ओं श्रीं । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह क्ष ।
ओं क्ष्रूं नित्यक्लिन्ने मदद्रवे स्वाहा ।
आधारशक्तिं पद्मञ्च मिश्रे देवीं हृदादिषु ॥२८॥
ओं क्ष्रीं गौरि रुद्रदयिते योगेश्वरि क्ष्रूं फट् स्वाहा ।

इत्याग्नेये महापुराणे नानामन्त्रा नाम द्वादशाधिक-
त्रिशततमोऽध्यायः ।

अथ त्रयोदशाधिकत्रिशततमोऽध्यायः।

———000———

त्वरिताज्ञानम्।

अग्निरुवाच। ओं क्रीं ह्रूँ खे छे चः स्त्रौं ह्रूँ चे क्रीं फट्
त्वरितायैनमः।

त्वरितां पूजयेन्नास्य द्विभुजाश्चाष्टबाहुकां।
आधारशक्तिं पद्मञ्च सिंहे देवीं हृदादिकम्॥ १॥
पूर्व्वादौ गायत्रीं यजेन्मण्डले वै प्रणीतया।
हुंकारां खेचरीं चण्डां छेदनीं चेपणीं स्त्रियाः॥ २॥
हुंकारां चेमकारीञ्च फट्कारीं मध्यतो यजेत्।
जयाञ्च विजयां हारि किङ्करञ्च तदग्रतः॥ ३॥
लिलैर्होमैश्च सर्व्वाश्च नामव्याहृतिभिस्तथा।
अनन्ताय नमः स्वाहा कुलिकाय नमः स्वधा॥ ४॥
स्वाहा वासुकिराजाय शङ्खपालाय वौषट्।
तक्षकाय वषन्नित्यं महापद्माय वै नमः॥ ५॥
स्वाहा कर्कोटनागाय फट् पद्माय च वै नमः।
लिखेन्निग्रहचक्रन्तु एकाशीतिपदैर्वरः॥ ६॥
वस्त्रे पटे तरौ भूर्ज्जे शिलायां यष्टिकासु च।
मध्ये कोष्ठे साध्यनाम पूर्व्वादौ पट्टिकासु च॥ ७॥
ओं क्रौं ह्रूँ छन्द छन्द चतुरः कण्ठकान् कालरात्रिकां।
ऐशादावम्बुपादौ च यमराज्यश्च वायुतः।
कालीनारदमाली कालीनामाश्चमालिनौ॥ ८॥

मामोदेतत्तदोमोमा रक्षत स्वस्व भक्षवा ।
यमपाटटयामय मटमो टट मोटमा ॥ ९ ॥
वामो भूरिविभूमेया टट रौख्र खरी टट ।
यमराजाहाग्रतो वं तं तोयं मारणात्मकम् ॥ १० ॥
कज्जलं निम्बनिर्य्यासमज्जास्तृग्विषसंयुतम् ।
काकपक्षस्य लेखन्या श्मशाने वा चतुष्पथे ॥ ११ ॥
निधापयेत् कुम्भाधस्ताद्दक्षलोके वाथ निक्षिपेत् ।
विभीतद्रुमशाखाधो यन्त्रं सर्व्वारिमर्द्दनम् ॥ १२ ॥
लिखेच्चानुयहचक्रं शुक्लपत्रेऽथ भूर्ज्जके ।
लाक्षया कुङ्कुमेनाथ स्फटिकाचन्दनेन वा ॥ १३ ॥
भुवि भित्तौ पूर्व्व दले(१) नाम मध्यमकोष्ठके ।
खड्गे तु वारिमध्यस्थं ओं हंसो वापि पट्टिशम् ॥ १४ ॥
लक्ष्मीश्लोकं शिवादौ च राक्षसादिक्रमान्लिखेत् ।
श्रीःमाममोमा मा श्रीः सानौ याग्ने क्षेया नौसा ॥ १५ ॥
माया लीला लालो यामा याग्ने क्षेया नौमा माया ।
यत्र क्षेया वह्निः श्रीघ्रा दिक्षुरं कलसं वह्निः ॥ १६ ॥
पद्मस्थं पद्मचक्रञ्च भूर्ल्लुजित् स्वर्गगन्धृतिं ।
शान्तीनां परमा शान्तिः सौभाग्यादिप्रदायकम् ॥ १७ ॥
रुद्रे रुद्रसमाः कार्य्याः कोष्ठकास्तत्र ता लिखेत् ।
श्रीमाद्याङ्कं फडन्ता च आदिवर्णमथानुतः ॥ १८ ॥
विद्यावर्णक्रमेनैव संज्ञाञ्च वषडन्तिकां ।

---

१ पूर्व्वपदे इति अ० ।

अधस्थात् प्रत्यङ्गिरैषा सर्व्वकामार्थसाधिका ॥ १८ ॥
एकाशीतिपदे सर्व्वमादिवर्णक्रमेण तु ।
आदिमं यावदन्तं स्यादन्तश्च नाम वै ॥ २० ॥
एषा प्रत्यङ्गिरा चान्या सर्व्वकार्य्यादिसाधनी ।
निग्रहानुग्रहञ्चक्रं चतुःषष्टिपदैर्लिखेत् ॥ २१ ॥
अमृतं सा च विद्या च क्रीं सः ह्रूं नामाग्र मध्यतः ।
फट्कारान्तां पन्नगतां त्रिक्रौंकारेण वेष्टयेत् ॥ २२ ॥
कुम्भवद्वारिता सर्व्वगत्रुहृत् सर्व्वदायिका ।
विपन्नश्येत् कर्णजपादुत्तरादौ दण्डकैः ॥ २३ ॥

इत्याग्नेये महापुराणे त्वरिताज्ञानं नाम त्रयोदशाधिक-
त्रिशततमोऽध्यायः ।

अथ चतुर्दशाधिकत्रिशततमोऽध्यायः ।

—:०:—

स्तम्भनादिमन्त्राः ।

अग्निरुवाच । स्तम्भनं मोहनं वश्यं विद्वेषोच्चाटनं वदे ।
विषव्याधिमरीगञ्च मारणं शमनं पुनः ॥ १ ॥
भूर्ज्जं कूर्म्मं समालिख्य ताडनेन षडङ्गुलम् ।
मुखपादचतुष्केषु ततो मन्त्रं न्यसेद्द्विजः ॥ २ ॥
चतुष्पादेषु क्रोंकारं क्रोंकारं मुखमध्यतः ।
गर्भे विद्यां ततो लिख्य साधकं पृष्ठतो लिखेत् ॥ ३ ॥

मालामन्त्रेस्तु संवेष्ट्य इष्टकोपरि सञ्चयेत् ।
पिधाय कूर्म्मपृष्ठेन क्रालेनाभिसम्पठेत् ॥ ४ ॥
महाकूर्म्मं पूजयित्वा पादप्रोक्षन्तु निक्षिपेत् ।
ताडयेद्वामपादेन स्मृत्वा शत्रुञ्च समधा ॥ ५ ॥
ततः सञ्जायते शत्रोस्तम्भनं मुखरागतः ।
कृत्वा तु भैरवं रूपं मालामन्त्रं समालिखेत् ॥ ६ ॥
ॐ शत्रुमुखस्तम्भनी कामरूपा आलोटकरी
ह्रीं फें फेत्कारिणी मम शत्रूणां देवदत्तानां मुखं स्तम्भय२
मम सर्व्वविद्वेषिणां मुखस्तम्भनं कुरु२ ॐ ह्रूं फें फेत्कारिणि
स्वाहा ।

फट् हृदयञ्च समालिख्य तज्जपान्तं महाबलं ।
वामेनैव नगं शूलं संलिखेद्दक्षिणे करे ॥ ७ ॥
लिखेन्मन्त्रमघोरस्य संग्रामे स्तम्भयेदरीन् ।
ॐ नमो भगवत्यै भगमालिनि विस्फुर२ स्पन्द२ निक्लिन्ने
द्रव२ ह्रूं सः क्रीं कारान्तरे स्वाहा ॥

एतेन रोचनाद्येस्तु तिलकान्मोहयेज्जगत् ॥ ८ ॥
ॐ फें ह्रूं फट् फेत्कारिणि क्रीं ज्वल२
त्रैलोक्यं मोहय२ गुह्यकालिके स्वाहा ।
अनेन तिलकं कृत्वा राजादीनां वशीकरं ।
गर्द्दभस्य रजो गृह्य कुसुमं सूतकस्य च ॥ ९ ॥
नारीरजः क्षिपेद्राज्ञो शय्यादौ देवकल्पवेत् ।
गोखुरञ्च तथा मृङ्गमद्यस्य च खुरं तथा ॥ १० ॥
शिरः सर्पस्य संचिप्तं गृहेषूच्चाटनं भवेत् ।

करवीरशिफा पीता ससिद्धार्था च मारणे ॥ ११ ॥
व्यालकुक्कुन्दरीरक्तं करवीरं तदर्थकृत् ।
सरटं षट्पदञ्चापि तथा कर्कटवृश्चिकम् ॥ १२ ॥
चूर्णीकृत्य क्षिपेत्तैले तदभ्यङ्गश्च कुष्ठकृत् ।
ॐ नवग्रहाय सर्व्वशत्रून् मम साधय२ मारय२
आं सों मं बुं चुं ॐ ग्रं वां कें ॐ स्वाहा ।
अनेनार्कशतैरर्च्च्य श्मशाने तु निधापयेत् ॥ १३ ॥
भूर्ज्जे वा प्रतिमायां वा मारणाय रिपोर्ग्रहाः ।
ॐ कुञ्जरी ब्रह्माणी । ॐ मञ्जरी माहेश्वरी ।
ॐ वेताली कौमारी ॐ काली वैष्णवी ।
ॐ अघोरा वाराही । ॐ वेताली इन्द्राणी उर्व्वशी । ॐ
जयानी यक्षिणी । नवमातरो हे मम शत्रुं गृह्णत२ ।
भूर्ज्जे नाम रिपोर्लिख्य श्मशाने पूजिते म्रियेत् ॥ १४ ॥

इत्याग्नेये महापुराणे स्तम्भनादिमन्त्रा नाम चतुर्दशाधिक-
त्रिशततमोऽध्यायः ।

अथ पञ्चदशाधिकत्रिशततमोऽध्यायः ।

नानामन्त्राः ।

अग्निरुवाच । आदौ ह्रींकारसंयुक्ता खेचरे पदभूषिता ।
वर्गान्तीतविसर्गेण स्त्री ह्रींक्षेपफडन्तिका ॥ १ ॥
सर्व्वकर्म्मकरी विद्या विषसर्पादिमर्द्दनी ।

ॐ खेचछेतिप्रयोगश्च कालदष्टस्य जीवने ॥ २ ॥
ॐ ह्रूं केचः प्रयोगोऽयं विषशस्त्रप्रमर्दनः ।
स्त्रीं ह्रूं फडितियोगोयं पापरोगादिकं जयेत् ॥ ३ ॥
खेछेति च प्रयोगोऽयं विघ्नदुष्टादि वारयेत्(१) ।
ह्रूं स्त्रीं ओमितियोगोऽयं योषिदादिवशीकरः ॥ ४ ॥
खे स्त्रीं खे च प्रयोगोऽयं वशाय विजयाय च ।
ऐं ह्रीं श्रीं स्फें कें चौं भगवति अम्बिके कुब्जिके स्फें श्रीं भं तं वशनमो अघोराय मुखे व्रां व्रीं किलि किलि विच्चा स्फ्रों हे स्फ्रूं श्रों फ्रों ऐं श्रीमिति कुब्जिकाविद्या सर्व्वकरा स्मृता ॥
भूयः स्कन्दाय यानाह मन्त्रानीशश्च तान् वदे ॥ ५ ॥

इत्याग्नेये महापुराणे नानामन्त्रा नाम पञ्चदशाधिक-त्रिशततमोऽध्यायः ।

अथ षोड़शाधिकत्रिशततमोऽध्यायः ।

सकलादिमन्त्रोद्धारः ।

ईश्वर उवाच । सकलं निष्कलं शून्यं कलाक्यं स्वमलङ्कृतम् ।
त्रपणं त्रयमन्तस्थं कण्ठोष्ठं चाष्टमं शिवम् ॥ १ ॥
प्रासादस्य(२) पराख्यस्य स्मृतं रूपं(३) गुहाष्टधा ।

---

१ रिपुदुष्टादि वारयेदिति क०, ट० च ।
२ प्रसादस्येति ख० ।
३ स्मृतिरूपमिति ख० ।

सदाशिवस्य शब्दस्य रूपस्याखिलभिद्यये ॥ २ ॥
अमृतयांशुभांश्येन्दुयेश्वरयोग ऋहकः ।
एकपादेन ओजाख्य औषधयांशुमान् वशी ॥ ३ ॥
अकारादेः चकारस्य ककारादेः क्रमादिभे ।
कामदेवः शिखण्डी च गणेशः कालशङ्करौ ॥ ४ ॥
एकनेत्रो हिनेत्रस्य त्रिशिखो दीर्घबाहुकः(१) ।
एकपादर्द्वचन्द्रश्च बलपो योगिनीप्रियः ॥ ५ ॥
शक्तीश्वरो महायन्त्रिस्तर्पकः स्थाणुदन्तुरौ ।
निधीशो नन्दी पद्मश्च तथान्यः शाकिनीप्रियः ॥ ६ ॥
मखविध्वी भीषणश्च क्रतान्तः प्राणसंज्ञकः ।
तेजस्वी शक्र उदधिः श्रीकण्ठः सिंह एव च ॥ ७ ॥
शशाङ्को विश्वरूपश्च त्वश्च स्यात्वरसिंहकः ।
सुश्रीमात्रासमाक्रान्तं विश्वरूपन्तु कारयेत् ॥ ८ ॥
अंशुमत्संयुतं कृत्वा शशिबीजं विनायुतम् ।
ईशानमोजसाक्रान्तं प्रथमन्तु समुद्धरेत् ॥ ९ ॥
तृतीयं पुरुषं विद्धि दक्षिणं पञ्चमं तथा ।
सप्तमं वामदेवन्तु सद्योजातन्ततःपरं ॥ १० ॥
रसयुक्तन्तु नवमं ब्रह्मपञ्चकमीरितम् ।
ओंकाराद्याश्चतुर्थ्यन्ता नमोन्ता: सर्व्वमन्त्रकाः ॥ ११ ॥
सद्योदेवा द्वितीयन्तु हृदयञ्चाङ्गसंयुतम् ।
चतुर्थन्तु शिरो विद्धि ईश्वरन्नामनामतः ॥ १२ ॥
ऋहकन्तु शिखा ज्ञेया विश्वरूपसमन्विता ।

---

१ त्रिशिखो दीर्घबाहुक इति ख०, ङ० च ।

तन्मन्त्रमष्टमं ख्यातं नेत्रन्तु दशमं मतम् ॥ १३ ॥
अस्त्रं शशी समाख्यातं शिवसंज्ञं शिखिध्वजः।
नमः स्वाहा तथा वौषट् हुँ च फट्क्रमेण तु ॥ १४ ॥
जातिफट्कं हृदादीनां प्रासादं मन्त्रमाचरेत्(१)।
ईशानादुद्गसंख्यातं प्रोद्धरेच्चांशुरञ्जितम् ॥ १५ ॥
औषधाक्रान्तशिरसमूहक्रम्योपरिस्थितं।
अर्द्धचन्द्रोर्द्धनादाढ्य विन्दुद्वितयमध्यगं ॥ १६ ॥
तदन्ते विश्वरूपन्तु कुटिलन्तु त्रिधा ततः।
एवं प्रासादमन्त्रोयं सर्व्वकर्म्मकरो मनुः ॥ १७ ॥
शिखाबीजं समुद्धृत्य फट्कारान्तन्तु चैव फट्।
अर्द्धचन्द्रासनं ज्ञेयं कामदेवं समर्पकम् ॥ १८ ॥
महापाशुपतास्त्रन्तु सर्व्वदुष्टप्रमर्दनम्।
प्रासादः सकलः प्रोक्तो निष्कलः प्रोच्यते ऽधुना ॥ १९ ॥
औषधं विश्वरूपन्तु रुद्राख्यं सूर्य्यमण्डलम्।
चन्द्रार्द्धं नादसंयोगं(२) विसंज्ञं कुटिलन्ततः ॥ २० ॥
निष्कलो भुक्तिमुक्तौ स्यात्प्रासादोऽयं सदाशिवः।
अंशुमान् विश्वरूपस्तु आवृतं शून्यरञ्जितम् ॥ २१ ॥
ब्रह्माङ्गरहितः शून्यस्तस्य मूर्त्तिरमस्तकः।
विघ्ननाशाय भवति पूजितो बालबालिशैः ॥ २२ ॥
अंशुमान् विश्वरूपाख्यमूहक्रम्योपरि स्थितम्।
कलाख्यं सकलस्यैव पूजाङ्गादि च सर्व्वतः ॥ २३ ॥
नरसिंहं कृतान्तस्थं तेजस्विप्राणमूर्द्धगम्।

---

१ मन्त्रमादरेदिति अ०।
२ चन्द्रार्द्धनादसंयुक्तमिति ख०।

अंशुमानूहकाक्रान्तमधोर्द्धं खसलङ्कृतम् ॥ २४ ॥
चन्द्रार्द्धनादनादान्तं ब्रह्मविष्णुविभूषितम् ।
उदधिं नरसिंहञ्च सूर्य्यमालाविभेदितम् ॥ २५ ॥
यदा कृतं तदा तस्य ब्रह्माख्यङ्गानि पूर्ववत् ।
ओजाख्यमंशुमद्युक्तं प्रथमं वर्णमुद्धरेत् ॥ २६ ॥
अंशुमच्चांशुनाक्रान्तं द्वितीयं वर्णनायकम् ।
अंशुमानीश्वरन्तद्वत् तृतीयं मुक्तिदायकम् ॥ २७ ॥
ऊहकञ्चांशुनाक्रान्तं वरुणप्राणतैजसम् ।
पञ्चमन्तु समाख्यातं कृतान्तन्तु ततः परम् ॥ २८ ॥
अंशुमानुदकप्राणः समं वर्णमुदीरितम् ।
पद्मिन्दुमसमाक्रान्तं नन्दोग्रमेकपादधृक् ॥ २९ ॥
प्रथमञ्चान्ततो योज्यं क्षपणं दशबीजकम् ।
अर्द्धं तृतीयञ्चैव पञ्चमं समं तथा ॥ ३० ॥
सद्योजातन्तु नवमं द्वितीयाद्यादिकम् ।
दशार्णप्रणवं यत्तु फडन्तञ्चास्त्रमुद्धरेत् ॥ ३१ ॥
नमस्कारयुतान्यत्र ब्रह्माङ्गानि तु नान्यथा ।
द्वितीयादष्टमं यावदष्टौ विद्येश्वरा मताः ॥ ३२ ॥
अनन्तस्य सूक्ष्मस्य तृतीयस्य शिवोत्तमः ।
एकमूर्त्तिकरूपस्तु त्रिमूर्त्तिरपरस्तथा ॥ ३३ ॥
श्रीकण्ठस्य शिखण्डी च अष्टौ विद्येश्वराः स्मृताः ।
शिखण्डिनोऽप्यनन्तान्तं मन्त्रान्तं मूर्त्तिरीरिता ॥ ३४ ॥

इत्याग्नेये महापुराणे सकलादिमन्त्रोद्धारो नाम षोड्गाधिक-
त्रिशततमोऽध्यायः ।

अथ सप्तदशाधिकत्रिशततमोऽध्यायः ।

—ooo—

गणपूजा ।

ईश्वर उवाच । विश्वरूपं समुद्धृत्य तेजस्युपरि संस्थितम् ।
नरसिंहं ततोऽधस्तात् क्षतान्तं तदधो न्यसेत् ॥ १ ॥
प्रणवं तदधःकृत्वा जहकं तदधः पुनः ।
अंशुमान् विश्वमूर्त्तिस्थं कण्ठोष्ठप्रणवादिकम् ॥ २ ॥
नमोऽन्तः स्याच्चतुर्वर्णो विश्वरूपश्च कारणम् ।
सूर्य्यमाचाहतं ब्रह्मण्यङ्गानीह तु पूर्ववत्(१) ॥ ३ ॥
उद्धरेत् प्रणवं पूर्व्वं प्रस्फुरद्वयमुच्चरेत् ।
घोरघोरतरं पश्चात् तत्र रूपमतः स्मरेत् ॥ ४ ॥
चटयुग्मं द्विधा कृत्वा ततः प्रवरमुच्चरेत् ।
दहेति च द्विधा कार्य्यं वमेति च द्विधा मतम्(२) ॥ ५ ॥
घातयेति द्विधाकृत्य हूंफड़न्तं समुच्चरेत् ।
अघोराख्यन्तु नेत्रं स्याद् गायत्री चोच्यतेऽधुना ॥ ६ ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि
तन्नः शिवः प्रचोदयात् गायत्री सर्वसाधनी ॥
यात्रायां विजयादौ च यजेत् पूर्वाङ्गणं त्रिये ।
तुर्य्यांशे तु पुरा क्षेत्रे समन्तादर्कभाजिते ॥ ७ ॥
चतुष्पदं त्रिकोणे तु त्रिदलं कैमलं लिखेत् ।

---

१ सर्व्वत्र इति ख० ।

२ द्विधाकृतमिति ख० ।

तत्पृष्ठे पद्मिकाविधोभागि त्रिदलमश्वयुक् ॥ ८ ॥
वसुदेवसुतैः साष्टैस्त्रिदलैः पादपट्टिका ।
तदूर्ध्वे वेदिका देया भागमात्रप्रमाणतः ॥ ९ ॥
द्वारं पद्मभितं कोष्ठादुपद्वारं विवर्णितम् ।
द्वारोपद्वाररचितं मण्डलं विघ्नसूदनम् ॥ १० ॥
आरक्तं कमलं मध्ये वाह्यपद्मानि तद्बहिः ।
सिता तु वीथिका कार्य्या द्वाराणि तु यथेच्छया ॥ ११ ॥
कर्णिका पीतवर्णा स्यात् केशराणि तथा पुनः ।
मण्डलं विघ्नमर्दाख्यं मध्ये गणपतिं यजेत् ॥ १२ ॥
नामाद्यं सवराकं स्यादेवाच्चक्रमसमन्वितम् ।
गिरौ हृतं तत्पुरुषेण ओमाद्यञ्च नमोऽन्तकम् ॥ १३ ॥
गजाख्यं गजशीर्षञ्च गाङ्गेयं गणनायकम् ।
विरावर्त्तङ्गगनगङ्गीपतिं पूर्वपङ्क्तिगम् ॥ १४ ॥
विचित्रांशं महाकायं लम्बोष्ठं लम्बकर्णकम् ।
लम्बोदरं महाभागं विकृतं पार्वतीप्रियम् ॥ १५ ॥
भयावहञ्च भद्रञ्च भगणं भयसूदनम् ।
द्वादशैते दशपङ्क्तौ देवचासञ्च पश्चिमे ॥ १६ ॥
महानादञ्चाम्बरञ्च विघ्नराजं गणाधिपम् ।
लम्बटस्थानभशण्डो महाशुण्डञ्च भीमकम् ॥ १७ ॥
मन्मथं मधुमृदञ्च सुन्दरं भावपुष्टकम् ।
सौम्ये ब्रह्मेश्वरं ब्राह्मं मनोवृत्तिञ्च संयमम् ॥ १८ ॥
लयं दूत्यप्रियं लौल्यं विकर्णं वत्सलं तथा ।
क्षतात्मं कालदण्डञ्च यजेत् कुम्भञ्च पूर्ववत् ॥ १९ ॥

अयुतञ्च जपेन्मन्त्रं होमयेत्तु दशांशतः ।
शेषाणान्तु दशाहुत्या जपाद्धोमन्तु कारयेत् ॥ २० ॥
पूर्णां दत्वाऽभिषेकन्तु कुर्य्यात्सर्वन्तु सिध्यति ।
भूगोऽश्वगजवस्त्राद्यैर्गुरुपूजाञ्चरेत्वरः ॥ २१ ॥
इत्याग्नेये महापुराणे गणपूजा नाम सप्तदशाधिक-
त्रिशततमोऽध्यायः ।

अथाष्टादशाधिकत्रिशततमोऽध्यायः ।

वागीश्वरीपूजा ।

ईश्वर उवाच । वागीश्वरीपूजनञ्च प्रवदामि समण्डलम् ।
ऊहकं कालसंयुक्तं मनुं वर्णसमायुतम्(१) ॥ १ ॥
निषाद ईश्वरं कार्य्यं मनुना चन्द्रसूर्यवत् ।
अक्षरञ्च हि देयं स्यात् ध्यायेत् कुन्देन्दुसन्निभां ॥ २ ॥
पद्माग्रवर्णमालान्तु मुक्तास्रग्दामभूषिताम् ।
वरदाभयाक्षसूत्रपुस्तकाढ्यां त्रिलोचनां ॥ ३ ॥
लक्षं जपेन्मस्तकान्तं स्तुत्वान्तं वर्णमालिकां ।
अकारादिक्षकारान्तां विवर्न्तीं मानवत् स्मरेत् ॥ ४ ॥
कुर्य्याद् गुरुश्च दीक्षार्थं मन्त्रयाहे तु मण्डलम् ।
सूर्य्याग्निमिन्दुभक्तन्तु भागाभ्यां कमलं स्थितं(२) ॥ ५ ॥

---

१ चन्द्रसमायुतमिति अ० ।
२ स्थतमिति क० ।

वीथिका पदिका कार्य्या पद्मान्यष्टौ चतुष्पदे ।
वीथिका पदिका बाह्ये द्वाराणि द्विपदानि तु ॥ ६ ॥
उपद्वाराणि तद्वच्च कोणबाह्यं द्विपट्टिकम्[१] ।
सितानि नव पद्मानि कर्णिका कनकप्रभा ॥ ७ ॥
केशराणि विचित्राणि कोणान्तर्लेन पूरयेत् ।
व्योमरेखान्तरं कृष्णं द्वाराणीन्द्रेभमानतः ॥ ८ ॥
मध्ये सरस्वतीं पद्मे वागीशीं पूर्व्वपद्मके ।
कृष्णरेखा चित्रवागीशीं गायत्रीं विश्वरूपया ॥ ९ ॥
गान्धारी मतिर्धृतिश्च पूर्व्वाद्या क्लीं स्ववीजकाः ।
ध्येया सरस्वतीवच्च कपिलाद्येन होमकः ।
संस्कृतप्राकृतकविः काव्यशास्त्रादिविद्भवेत् ॥ १० ॥

इत्याग्नेये महापुराणे वागीश्वरीपूजा नामाष्टादशाधिक-त्रिशततमोऽध्यायः ।

अथैकोनविंशत्यधिकत्रिशततमोऽध्यायः ।

मण्डलानि ।

ईश्वर उवाच । सर्व्वतो भद्रकान्यष्टमण्डलानि वदे गुह ।
अक्षिमात्रसाधयेत् प्राचीमिष्टायां विषुवे सुधीः ॥ १ ॥
चिह्नात्स्वाङ्गुलेनाथ हृत्सूत्रेण वा पुनः ।
पूर्व्वापरायतं सूत्रमास्फाल्य मध्यतोऽङ्कयेत् ॥ २ ॥

---

१ द्विपर्यन्तमिति ख० ।

कोटिद्वयन्तु तन्मध्यादङ्कयेद्दक्षिणोत्तरम् ।
मध्ये हयं प्रकर्त्तव्य स्फालयेद्दक्षिणोत्तरम् ॥ ३ ॥
गतत्रेचार्द्धमानेन कोणसम्पातमादिशेत् ।
एवं सूत्रचतुष्कस्य स्फालनाच्चतुरस्रकम् ॥ ४ ॥
जायते तत्र कर्त्तव्यं भद्रखेदकरं शुभम् ।
वसुभक्तेन्दुहिपदे क्षेत्रे वीथी च भागिका ॥ ५ ॥
हारं हिपदिकं पद्ममानाहै सकपोलकम् ।
कोणबन्धविचित्रन्तु द्विपदं तत्र वर्त्तयेत् ॥ ६ ॥
शुक्लं पद्मं कर्णिका तु पीता चित्रन्तु केशरम् ।
रक्ता वीथी तत्र कल्पा हारं लोकेशरूपकं ॥ ७ ॥
रक्तकोणं विधौ नित्ये नैमित्तिकेऽलकं मृणु ।
असंसक्तन्तु संसक्तं द्विधाऽलं भुक्तिमुक्तिकृत् ॥ ८ ॥
असंसक्तं मुमुक्षूणां संसक्तं तत्त्रिधा पृथक् ।
बालो युवा च वृद्धश्च नामतः फलसिद्धिदाः ॥ ९ ॥
पद्मक्षेत्रे तु सूत्राणि दिग्विदिक्षु विनिक्षिपेत् ।
हस्तानि पञ्चकल्पानि पद्मक्षेत्रसमानि तु ॥ १० ॥
प्रथमे कर्णिका तत्र पुष्करैर्द्वयभियुता ।
केशराणि चतुर्विंशद्वितीयेऽथ तृतीयके ॥ ११ ॥
दलसन्धिर्गजकुम्भनिभान्तर्यद्दलाग्रकम् ।
पञ्चमे व्योमरूपन्तु संसक्तं कुमलं भृतं ॥ १२ ॥
असंसक्ते दलाग्रे तु दिग्भागैर्विस्तराङ्कजेत् ।
भागद्वयपरित्यागाद्दलं शैर्वर्त्तयेद्दलम् ॥ १३ ॥
सन्धिविस्तरसूत्रेण तन्मूलादङ्कयेद्दलम् ।

सव्यासव्यक्रमेणैव हृद्मेतद्वेत्तथा ॥ १४ ॥
अथ वा मन्थिमध्यात्तु भ्रामयेद्दक्षिचन्द्रवत् ।
सन्धिहयाग्रसूत्रं वा बालपद्मन्तथा भवेत् ॥ १५ ॥
सन्धिसूत्रार्द्धमानेन पृष्ठतः परिवर्त्तयेत् ।
तीक्ष्णाग्रन्तु सुवातेन कमलं भुक्तिमुक्तिदम् ॥ १६ ॥
मुक्तब्रह्मे च वश्यादौ बालं पद्मं समानकं ।
नवनाभं नवहस्तं भागैर्मध्यात्मकेश तत् ॥ १७ ॥
मध्येऽजं पट्टिकावीजं हारेणाजस्य मानतः ।
कण्ठोपकण्ठमुक्तानि तदाग्रे वीथिका मता ॥ १८ ॥
पद्मभागान्विता(१) सा तु समन्ताद्दगभागिका ।
दिग्विदिक्षष्ट पद्मानि हारपद्मं सवीथिकम् ॥ १९ ॥
तदाग्रे पञ्च पदिका वीथिका यत्र भूषिता ।
पद्मवद्धारकण्ठन्तु पदिकञ्चौष्ठकण्ठकं ॥ २० ॥
कर्णालं पदिकं कार्य्यं दिक्षु हारत्रयं स्फुटम् ।
कोणबन्धं त्रिपट्टन्तु हिपट्टं वज्रवद्भवेत् ॥ २१ ॥
मध्यन्तु कमलं शुक्लं पीतं रक्तञ्च नीलकम् ।
पीतशुक्लञ्च धूम्रञ्च रक्तं पीतञ्च मुक्तिदम् ॥ २२ ॥
पूर्व्वादौ कमलान्यष्ट शिवविष्णुादिकं जपेत् ।
प्रासादमध्यतोऽभ्यर्च्च शक्रादीनस्त्रकादिषु ॥ २३ ॥
अस्त्राणि वाह्यतोऽभ्यान्तु विष्णादीनस्त्रमेधभाक् ।
पवित्रारोहणादौ च महामण्डलमालिखेत् ॥ २४ ॥
अष्टहस्तं पुरा क्षेत्रं रसपत्रैर्विवर्त्तयेत् ।

---

१ पद्मभागमिलिति ख०, ङ० च ।

द्विपदं कमलं मध्ये वीथिका पदिका ततः ॥ २५ ॥
दिग्विदिक्षु ततोऽष्टौ च नीलाब्जानि विवर्त्तयेत् ।
मध्यपद्मप्रमाणेन त्रिंशत्पद्मानि तानि तु ॥ २६ ॥
दलसन्धिविहीनानि नीलेन्दीवरकानि च ।
तत्पृष्ठे पदिका वीथी स्वस्तिकानि तदूर्द्धतः ॥ २७ ॥
द्विपदानि तथा चाष्टौ क्रतिभागकृतानि तु ।
वर्त्तयेत् स्वस्तिकांस्तत्र वीथिका पूर्ववद्दहि. ॥ २८ ॥
द्वाराणि कमलं यद्वदुपकण्ठयुतानि(१) तु ।
रक्तं कीर्णं पीतवीथी नीलं पद्मञ्च मण्डले ॥ २९ ॥
स्वस्तिकादि विचित्रञ्च सर्व्वकामप्रदं गृह ।
पञ्चाब्जं पञ्चहस्तं स्यात् समन्ताद्गभाजितम् ॥ ३० ॥
द्विपदं कमलं वीथी पदिका दिक्षु पङ्कजम् ।
चतुष्कं पृष्ठतो वीथी पदिका द्विपदान्यथा ॥ ३१ ॥
कण्ठोपकण्ठयुक्तानि द्वारान्यब्जन्तु मध्यतः ।
पञ्चाब्जमण्डले ह्यस्मिन् सितं पीतञ्च पूर्व्वकम् ॥ ३२ ॥
वैदूर्य्याभं दक्षिणाब्जं कुन्दाभं वारुणं कजम् ।
उत्तराब्जन्तु शङ्खाभमन्यत् सर्व्वं विचित्रकम् ॥ ३३ ॥
सर्व्वकामप्रदं वक्ष्ये दशहस्तन्तु मण्डलम् ।
विकारभक्तन्तुर्य्यांश द्वारन्तु द्विपदं भवेत् ॥ ३४ ॥
मध्ये पद्मं पूर्व्ववच्च विघ्नध्वंसं वदाम्यथ ।
चतुर्हस्तं पुरं कृत्वा तुरङ्गैश्च कुरङ्गयम् ॥ ३५ ॥
वीथिका हस्तमात्रन्तु स्वस्तिकैर्बहुभिर्वृता ।

१ महदुपकण्ठयुतानीति ख०, ग० घ ।

हस्तमात्राणि द्वाराणि दिक्षु तुर्यसमन्वितम् ॥ ३६ ॥
पद्मानि पञ्च शुक्लानि मध्ये पूज्यश्च निष्कलः ।
हृदयादीनि पूर्वादौ विदिक्स्थान्यपि वै यजेत् ॥ ३७ ॥
प्राग्वच्च पञ्च ब्रह्माणि ब्रह्माधारमतो वदे ।
शतभागे तिथिभागे पद्मं लिङ्गाष्टकं दिगि ॥ ३८ ॥
मेखलाभागसंयुक्तं कण्ठं द्विपदिकं भवेत् ।
आचार्य्यो बुद्धिमाश्रित्य कल्पयेच्च लतादिकम् ॥ ३९ ॥
चतुःषट्पञ्चमाष्टादि खाब्धिखाद्यादि मण्डलम् ।
खाब्ध्योन्दुसूर्य्यगं सर्व्वं खाब्धि चैवेन्दुवर्णनात् ॥ ४० ॥
चत्वारिंशदधिकानि चतुर्हस्तशतानि हि ।
मण्डलानि हरेः शम्भोर्देव्याः सूर्य्यस्य सन्ति च ॥ ४१ ।
दशसप्तविभक्ते तु लतालिङ्गोद्भवं शृणु ।
दिक्षु पञ्चत्रयञ्चैकं त्रयं पञ्च च लोमयेत्(१) ॥ ४२ ॥
जङ्घागे द्विपदे लिङ्गमन्दिरं पार्श्वकोष्ठयोः ।
मध्येन द्विपदं पद्ममथ चैकञ्च पङ्कजं । ४३ ॥
लिङ्गस्य पार्श्वयोर्भद्रे पदहारमलोपनात् ।
तत्पार्श्वशोभाः षड्लोप्य लताः शेषास्तथा हरेः । ४४ ॥
जङ्घं द्विपदिकं लोप्य हरेर्भद्राष्टकं स्मृतम् ।
रश्मिमानसमायुक्तवेदलोपाच्च शोभिकम् ॥ ४५ ॥
पञ्चविंशतिकं पद्मं ततः पीठमपीठकम् ।
त्रयं त्रयं रचयित्वा उपशोभास्तथाष्ट च ॥ ४६ ॥
देव्यादिव्यापकं भद्रं तुङ्गमध्ये परं लघु ।

---

१ लोपयेदिति अ० । लेपयेदिति ङ० ।

मध्ये नवपदं पद्मं कोणे भद्रचतुष्टयम् ॥ ४७ ॥
त्रयोदशपदं शेषं बुद्धाधारन्तु मण्डलं ।
शतपत्रं षड्धिकं बुद्धाधारं हरादिषु ॥ ४८ ॥

इत्याग्नेये महापुराणे मण्डलानि नामैकोनविंशत्यधिकं-
त्रिशततमोऽध्यायः ।

अथ विंशत्यधिकत्रिशततमोऽध्यायः ।

अघोरास्त्रादिशान्तिकल्पः ।

ईश्वर उवाच । अस्त्रयागः पुरा कार्य्यः सर्वकर्म्मसु सिद्धिदः ।
मध्ये पूज्यं शिवास्त्रं वज्रादीन् पूर्वतः क्रमात् ॥ १ ॥
पञ्चचक्रं दशकरं रणादौ पूजितं जये ।
ग्रहपूजा रविर्मध्ये पूर्व्वाद्याः सोमकादयः ॥ २ ॥
सर्व्वं एकादशस्यास्तु ग्रहाः स्युः ग्रहपूजनात् ।
अस्त्रशान्तिं प्रवक्ष्यामि सर्वोत्पातविनाशिनीं ॥ ३ ॥
ग्रहरोगादिशमनीं मारोग्यबलविमर्द्दनीं ।
विनायकोपतप्तिघ्नमघोरास्त्रं जपेन्नरः ॥ ४ ॥
लक्षं ग्रहादिनाशः स्यादुत्पाते तिलहोमनम् ।
दिव्ये लक्षं तदर्द्धेन व्योमजोत्पातनाशनं ॥ ५ ॥
घृतेन लक्षपातेन उत्पाते भूमिजे हितम् ।
घृतगुग्गुलुहोमे च सर्व्वोत्पातादिमर्द्दनम् ॥ ६ ॥

दूर्वाचताज्यहोमेन व्याधयोऽथ घृतेन च।
सहस्रेण तु दुःस्वप्ना विनश्यन्ति न संशयः। ७॥
अयुताद् ग्रहदीपघ्नो जवाघृतविमिश्रितात्।
विनायकार्त्तिशमनमयुतेन घृतस्य च॥ ८॥
भूतवेतालशान्तिस्तु गुग्गुलोरयुतेन च।
महाह्वस्य भङ्गे तु व्यालकङ्के(१) गृहे स्थिते॥ ९॥
आरण्यानां प्रवेशे च दूर्वाज्याक्षतहावनात्।
उल्कापाते भूमिकम्पे तिलाज्येनाक्षताच्छिवम्॥ १०॥
रक्तस्रावे तु वृक्षाणामयुताद् गुग्गुलोः शिवं।
अकाले फलपुष्पाणां राष्ट्रभङ्गे च मारणे॥ ११॥
द्विपदादेर्यदा मारी लक्षार्द्धाच्च तिलाज्यतः।
हस्तिमारीप्रशान्त्यर्थं करिणोदन्तवर्द्धने॥ १२॥
हस्तिन्यां मदवृष्टौ च अयुताच्छान्तिरिष्यते।
अकाले गर्भपाते तु जातं यच्च विनश्यति॥ १३॥
विक्षता यत्र जायन्ते यात्राकालेऽयुतं हुनेत्।
तिलाज्यलक्षहोमन्तु उत्तमामिद्विसाधने॥ १४॥
मध्यमायां तदर्द्धेन तत्पादादधमासु च।
यथा जपस्तथा होमः संग्रामे विजयो भवेत्।
अघोरास्त्रं जपेन्नास्य ध्यात्वा पञ्चास्यमूर्जितम्॥ १५॥

इत्यादिमहापुराणे अघोरास्त्रादिशान्तिकथनो नाम
विंशत्यधिकत्रिशततमोऽध्यायः।

---

१ व्यालकाके इति ख०।

अथैकविंशत्यधिकत्रिशततमोऽध्यायः ।

———000———

पाशुपतशान्तिः ।

ईश्वर उवाच । वक्ष्ये पाशुपतास्त्रेण शान्तिजापादि पूर्व्वतः ।
पादतः पूर्व्वनाशो हि फडन्तं चापदादिमुत् ॥ १ ॥

ॐ नमो भगवते महापाशुपताय अतुलबलवीर्य्यपराक्रमाय त्रिपञ्चनयनाय नानारूपाय नानाप्रहरणोद्यताय सर्व्वाङ्गरक्ताय भिन्नाञ्जनचयप्रख्याय श्मशानवेतालप्रियाय सर्व्वविघ्ननिकृन्तनरताय सर्व्वसिद्धिप्रदाय भक्तानुकम्पिने असंख्यवक्त्रभुजपादाय तस्मिन्सिद्धाय वेतालविनाशिने शाकिनीचोभजनकाय व्याधिनिग्रहकारिणे पापभञ्जनाय सूर्य्यसोमाग्निनेत्राय विष्णुकवचाय खड्गवज्रहस्ताय यमदण्डवरुणपाशाय रुद्रशूलाय ज्वलज्जिह्वाय सर्व्वरोगविद्रावणाय ग्रहनिग्रहकारिणे दुष्टनागक्षयकारिणे ॐ क्षांपिङ्गलाय फट् । ह्रूँकारास्त्राय फट् । वज्रहस्ताय फट् । शक्तये फट् । दण्डाय फट् । यमाय फट् । खड्गाय फट् । वारुणाय फट् । पाशाय फट् । ध्वजाय फट् । अङ्कुशाय फट् । गदायै फट् । कुबेराय फट् । त्रिशूलाय फट् । मुद्गराय फट् । चक्राय फट् । पद्माय फट् । नागास्त्राय फट् । ईशानाय फट् । खेटकास्त्राय फट् । मुण्डास्त्राय फट् । कङ्कालास्त्राय फट् । पिच्छिकास्त्राय फट् । क्षुरिकास्त्राय फट् । ब्रह्मास्त्राय फट् । शक्त्यस्त्राय फट् । गणास्त्राय फट् । पिलिपिच्छास्त्राय फट् । गन्धर्वास्त्राय फट् । पूर्व्वास्त्राय फट् । दक्षिणास्त्राय फट् । वामास्त्राय फट् । पश्चिमास्त्राय फट् । मन्त्रास्त्राय फट् । शाकिन्यस्त्राय

फट् । योगिन्यस्त्राय फट् । दण्डास्त्राय फट् । महादण्डास्त्राय फट् । नानास्त्राय फट् । शिवास्त्राय फट् । ईशानास्त्राय फट् । पुरुषास्त्राय फट् । अघोरास्त्राय फट् । सद्योजातास्त्राय फट् । हृदयास्त्राय फट् । महास्त्राय फट् । गरुड़ास्त्राय फट् । राक्षसास्त्राय फट् । दानवास्त्राय फट् । चौं नरसिंहास्त्राय फट् । त्वष्टृस्त्राय फट् । सर्व्वास्त्राय फट् । नः फट् । वः फट् । पः फट् । फः फट् । मः फट् । श्रीं फट् । फें: फट् । भूः फट् । भुवः फट् । स्वः फट् । महः फट् । जनः फट् । तपः फट् । सर्व्वलोक फट् । सर्व्वपाताल फट् । सर्वतत्त्व फट् । सर्वप्राण फट् । सर्वनाड़ी फट् । सर्वकारण फट् । सर्वदेव फट् । क्रौं फट् । श्रौं फट् । ह्रूँ फट् । स्रुं फट् । स्त्रां फट् । लां फट् । वैराग्याय फट् । मायास्त्राय फट् । कामास्त्राय फट् । चेचपालास्त्राय फट् । ह्रूँकारास्त्राय फट् । भास्करास्त्राय फट् । चन्द्रास्त्राय फट् । विघ्नेश्वरास्त्राय फट् । खूं खौं फट् । क्रौं क्रौं फट् । भ्रामय २ फट् । छादय २ फट् । उन्मूलय २ फट् । त्रासय २ फट् । सञ्जीवय २ फट् । विद्रावय २ फट् । सर्व्वदुरितं नाशय २ फट् ॥

सप्तदावर्त्तनादेव सर्वविघ्नान् विनाशयेत् ।
शतावर्त्तेन चोत्पातान्नृणादौ विजयो भवेत् ॥ २ ॥
घृतगुग्गुलुहोमाच्च असाध्यानपि(१) साधयेत् ।
पठनात्सर्वशान्तिः स्याच्छ्रीपाशुपतस्य च ॥ ३ ॥

इत्याग्नेये महापुराणे पाशुपतशान्तिर्नामैकविंशत्यधिकत्रिशततमोऽध्यायः ।

---

१ असाध्यसाधनानि च० ।

अथ द्वाविंशत्यधिकत्रिशततमोऽध्यायः ।

———ooo@ooo———

षड्क्षान्यघोरास्त्राणि ।

ईश्वर उवाच । ओं क्रूं हंसहृति मन्त्रेण मृत्युरोगादि शास्यति ।
लक्षाहुतिभिर्दूर्वाभिः शान्तिं पुष्टिं प्रसाधयेत् ॥ १ ॥
अथ वा प्रणवेनैव मायया वा षडानन ।
दिव्यान्तरीक्षभौमानां शान्तिरुत्पातदृष्टके ॥ २ ॥

ओं नमो भगवति गङ्गे कालि२ महाकालि२ मांसशोणित-भोजने रक्तदृष्टिमुखि वशमानय मानुषान् स्वाहा ॥

ओं लक्षं जप्ता दशांशेन हुत्वा स्यात् सर्वकर्मजित् ।
वशं नयति शक्रादीन्मानुषेष्वेषु का कथा ॥ ३ ॥
अन्तर्द्धानकरी विद्या मोहनी जृम्भनी तथा ।
वशयति शत्रूणां शत्रुबुद्धिप्रमोहिनी ॥ ४ ॥
कामधेनुरियं विद्या सप्तधा परिकीर्त्तिता ।
मन्त्रराजं प्रवक्ष्यामि शत्रुचौरादिमोहनम् ॥ ५ ॥
महाभयेषु सर्वेषु स्मर्त्तव्यं हरपूजितं ।
लक्षं जप्ता तिलैर्होमः सिद्धेदुद्धारकं स्मृतं ॥ ६ ॥

ओं हले मूले एहि ब्रह्मसत्येन विष्णुसत्येन रुद्रसत्येन रक्ष मां वाचेश्वराय स्वाहा ॥

दुर्गात्तारयते यस्मात्तेन दुर्गा शिवा मता ।
ओं चक्रकपालिनि इन्तान् खिटि२ खिटि२ गुह्ये फट् ह्रीं ।
अनेन मन्त्रराजेन चाक्षमिला तु तच्छतान् ॥ ७ ॥

त्रिंशद्धारानि जप्तानि तच्चौरेषु प्रदापयेत् ।
दन्तैर्यूणानि शुक्लानि पतितानि हि शुद्धये ॥ ८ ॥

ओं ज्वलल्लोचन कपिलजटाभारभास्वर विद्रावण चैलोक्य-डामर२ दर२ भ्रम२ आकृष्ट२ तोटय२ मोटय२ दह२ पच२ एवं सिद्धिरुद्रो ज्ञापयति यदि ग्रहोपगतः स्वर्गलोकं देवलोकं वा आरामविहारावलं तथापि तमावर्त्तयिष्यामि बलिं गृह्ण २ ददामि ते स्वाहेति ।

क्षेत्रपालबलिं दत्वा ग्रहो न्यासाद्वदं व्रजेत् ।
ग्रहवो नाशमायान्ति रणे वैरगणत्रयः ॥ ९ ॥
हंसबीजन्तु विन्यस्य विषन्तु(१) त्रिविधं हरेत् ।
अगुरुचन्दनं कुष्ठं कुङ्कुमं नागकेशरम् ॥ १० ॥
नखं वै देवदारुञ्च समं कृत्वाथ धूपकः ।
मान्त्रिकेन समायुक्तो देहवस्त्रादिधूपनात् ॥ ११ ॥
विवादे मोहने स्त्रीणां भञ्जने कलहे शुभः ।
कन्याया वरणे भाग्ये मायामन्त्रेण मन्त्रितः ॥ १२ ॥
ह्रीँ रोचनानागपुष्पाणि कुङ्कुमञ्च मनःशिला ।
ललाटे तिलकं कृत्वा यं पश्येत्स वशी भवेत् ॥ १३ ॥
शतावर्य्यास्तु चूर्णन्तु दुग्धपीतञ्च पुत्रकृत् ।
नागकेशरचूर्णन्तु घृतपक्वन्तु पुत्रकृत् ॥ १४ ॥
पालाशबीजपानेन लभेत पुत्रकन्यथा ।

ओं उत्तिष्ठ चामुण्डे जम्भय २ मोहय २ अमुकं वशमानय २ स्वाहा ।

---

१ विघ्नन्तिति क०, ङ० च ।

षड्विंशा सिद्धविद्या सा नदीतीरसदा स्त्रियम् ॥१५॥
कृत्वोन्मत्तरसेनैव नामालिख्यार्कपत्रके ।
मूत्रोत्सर्गस्थतः कृत्वा जपेत्तामानयेत्स्त्रियम् ॥ १६ ॥

ओं हुंसः वषट् ।

महामृत्युञ्जयो मन्त्रो जप्याद्धोमाच्च पुष्टिकृत् ।

ओं हंसः क्रूं ह्रूं स क्रः सौः ।

मृतसञ्जीवनी विद्या अष्टार्णा जयरुद्रणे ॥ १७ ॥
मन्त्रा ईशानमुख्याय धर्म्मकामादिदायकाः ।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ॥ १८ ॥
ब्रह्मणाधिपतिर्ब्रह्म शिवो मेऽस्तु सदाशिवः ।

ओं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।

ओं अघोरेभ्योऽथ घोरेभ्यो घोरघोरेभ्यस्तु सर्वतः ॥ १९ ॥

सर्व्वेभ्यो नमस्ते रुद्ररूपेभ्यः । ओं वामदेवाय नमो ज्येष्ठाय नमः रुद्राय नमः । कालाय नमः कलविकरणाय नमो बल-विकरणाय नमो बलप्रमथनाय नमः । सर्व्वभूतदमनाय नमो मनोन्मानाय नमः ।

ओं सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवे भवेऽनादिभवे भजस्व मां भवोद्भव ॥ २० ॥
पञ्चब्रह्माङ्गषट्कञ्च(१) वक्ष्येऽहं भुक्तिमुक्तिदं ।

ओं नमः परमात्मने पराय ज्ञानदाय परमेश्वराय योगाय योगसम्भवाय सर्व्वकराय कुरु२ सत्य२ भव२ भवोद्भव वामदेव सर्व्वकार्य्यकर पापप्रशमन सदाशिव प्रसन्न नमोऽस्तु ते स्वाहा ॥

(१) पञ्चब्रह्माङ्गषट्कारमिति ग० ।

हृदयं सर्व्वार्थदन्तु सप्तत्यक्षरसंयुतं ।

ओं शिवः शिवाय नमः शिवः । ओं हृदये ज्वालिनि स्वाहा शिखा । ओं शिवात्मक महातेजः सर्व्वज्ञ प्रभुरावर्त्तय महाघोर कवच पिङ्गल नमः । महाकवच शिवाज्ञया हृदयं बन्ध २ घूर्णय २ चूर्णय २ सूक्ष्मवज्रधर वज्रपाश धनुर्व्वज्राशनिवज्रशरीर मम शरीरमनुप्रविश्य सर्व्वदुष्टान् स्तम्भय२ हुँ ।

अक्षराणान्तु कवचं शतं पञ्चाक्षराधिकम् ॥ २१ ॥

ओं ओजसे नेत्रं ओं प्रस्फुर२ तनुरूप२ चट२ प्रचट२ कट२ वम२ घातय२ हुं फट् अघोरास्त्रम् ॥

इत्याग्नेये महापुराणे षडङ्गान्यघोरस्त्राणि नाम द्वाविंशत्यधिक-त्रिशततमोऽध्यायः ।

अथ त्रयोविंशत्यधिकत्रिशततमोऽध्यायः ।

—:○:—

रुद्रशान्तिः ।

ईश्वर उवाच । शिवशान्तिं प्रवक्ष्यामि कल्पाघोरप्रपूर्व्वकम् ।
सप्तकोटाधिपो घोरो ब्रह्महत्याद्यघार्दनः(१) ॥ १ ॥
उत्तमाधमसिद्धीनामालयोऽखिलरोगनुत् ।
दिव्यान्तरीक्षभौमानामुत्पातानां विमर्द्दनः ॥ २ ॥
विषग्रहपिशाचानां शमनः सर्व्वकामदः ।
प्रायश्चित्तमघौघार्त्तौ दौर्भाग्यार्त्तिविनाशनम् ॥ ३ ॥
एकवीरन्तु विन्यस्य ध्येयः पञ्चमुखः सदा ।

---

१ ब्रह्महत्यादिमर्द्दन इति ख० ।

शान्तिके पौष्टिके शुक्लो रक्तो वश्येऽथ पीतकः ॥ ४ ॥
स्तम्भने धूम्र उच्चाटमारणे कृष्णवर्णकः ।
कर्षणः कपिलो मोहे द्वात्रिंशद्वर्णमर्चयेत् ॥ ५ ॥
त्रिंशल्लक्षं जपेन्मन्त्रं होमं कुर्याद्दशांशतः ।
गुग्गुलामृतयुक्तेन सिद्धोऽसिद्धोऽथ सर्व्वकृत् ॥ ६ ॥
अघोराच्चापरो मन्त्रो विद्यते भुक्तिमुक्तिकृत् ।
अब्रह्मचारी ब्रह्मचारी अस्नातः स्नातको भवेत् ॥ ७ ॥
अघोरास्त्रमघोरन्तु द्वाविमौ मन्त्रराजकौ ।
जपहोमार्चनाद्युद्दे शत्रुसैन्यं विमर्द्दयेत् ॥ ८ ॥
रुद्रशान्तिं प्रवक्ष्यामि शिवां सर्व्वार्थसाधनीं ।
पुत्रार्थं ग्रहनाशार्थं विषव्याधिविनष्टये ॥ ९ ॥
दुर्भिक्षमारीशान्त्यर्थं दुःस्वप्नहरणाय च ।
बलादिराज्यप्राप्त्यर्थं रिपूणां नाशनाय च ॥ १० ॥
अकालफलिते वृक्षे सर्व्वग्रहविमर्द्दने ।
पूजने तु नमस्कारः स्वाहान्तो हवने तथा ॥ ११ ॥
आप्यायने वषट्कारं पुष्टौ वौषट्नियोजयेत् ।
चकारहृदयस्थाने(१) जातियोगन्तु कारयेत् ॥ १२ ॥

ओं रुद्राय च ते ओं वृषभाय नमः अविमुक्ताय असम्भवाय पुरुषाय च पूज्याय ईशानाय पौरुषाय पञ्च चोत्तरे विश्वरूपाय करालाय विकृतरूपाय अविकृतरूपाय ।

निऋतौ(२) चापरे काले अप्सु माया च नैर्ऋते ।

---

१ हकारहृदयस्थाने इति अ० । उकारहृदयस्थाने इति ङ० ।

२ निधनाविति अ०, ङ० च ।

एकपिङ्गलाय श्वेतपिङ्गलाय कृष्णपिङ्गलाय नमः। मधुपिङ्गलाय नमः मधुपिङ्गलाय नियतौ अनन्ताय आर्द्राय शुष्काय पयोगणाय। कालतत्त्वे। करालाय विकरालाय। ह्रौं मायातत्त्वे। सहस्रशीर्षाय सहस्रवक्त्राय सहस्रकरचरणाय सहस्रलिङ्गाय। विद्यातत्त्वे। सहस्राच्चाहिन्यसेद् दक्षिणे दले। एकजटाय द्विजटाय त्रिजटाय स्वाहा। काराय स्वधाकाराय वषट्काराय षड्रुद्राय। ईशतत्त्वे तु वह्निपत्रे स्थिता गुह्य। भूतपतये पशुपतये उमापतये कालाधिपतये। सदाशिवाध्यस्थतत्त्वे षट् पूज्याः पूर्वदले स्थिताः। उमायै कुरूपधारिणि ओं कुरु २ कहिणि २ रुद्रोमि देवानां देवदेवविग्राख हन २ दह २ पच २ मथ २ तुरु २ मरु २ सुरु २(१) रुद्रगात्तिमनुस्मर कृष्णपिङ्गल अकालपिप्पलाधिपतिविघ्नेश्वराय नमः। शिवतत्त्वे कर्णिकायां पूज्यौ ह्रूमामहेश्वरौ। ओं व्योमव्यापिने व्योमरूपाय सर्वव्यापिने शिवाय अनन्ताय अनाथाय अनाश्रिताय शिवाय। शिवतत्त्वे नव पदानि व्योमव्याप्यभिधास्यहि। शाश्वताय योगपीठसंस्थिताय नित्यं योगिने ध्यानाहाराय नमः। ओं नमः शिवाय सर्वप्रभवे शिवाय ईशानमूर्द्धाय तत्पुरुषादिपञ्चवक्त्राय नवपदं पूर्वदले सदाख्ये पूजयेद्गुह। अघोरहृदयाय वामदेवगुह्याय सद्योजातमूर्त्तये। ओं नमो नमः। गुह्यातिगुह्याय गोप्त्रे अनिधनाय सर्व्वयोगाधिकृताय ज्योतीरूपाय अग्निपत्रे शोभतत्त्वे विद्यातत्त्वे हे याम्यगे परमेश्वराय चेतनाचेतन व्योमन व्यापिन. प्रथम तेजस्तेजः मायातत्त्वे नैर्ऋते कालतत्त्वे

१ रुद्रा रुद्रि म०।

ऽथ वारुणे । ओं भूः भूः नाना वां वां अनिधान निधनोद्भव शिव सर्वपरमात्मन् महादेव रुद्रावेश्वर महातेज योगाधिपते सुख २ प्रमथ२ ओं सर्व२ ओं भव२ ओं भवोद्भव । सर्वभूतसुखप्रद वायुपथेऽथ निवतो पुरुषे चोत्तरेन च । सर्वसान्निध्यकर ब्रह्म-विष्णुरुद्रपर अनर्चित अस्तुतस्तु च साक्षिन२ तुरु२ पतङ्ग पिङ्ग२ ज्ञान२ ग्रन्थ२ सूक्ष्म२ शिव२ सर्वप्रद२ ओं नमः शिवाय ओं नमो नमः शिवाय ओं नमो नमः ।

ईशाने प्राकृते तत्त्वे पूजयेज्जुहुयाज्जपेत् ।
ग्रहरोगादिमायाक्षिंयमनी सर्वसिद्धिकृत् ॥ १३ ॥

इत्याग्नेये महापुराणे रुद्रशान्तिर्नाम त्रयोविंशत्यधिक-त्रिशततमोऽध्यायः ।

अथ चतुर्विंशत्यधिकत्रिशततमोऽध्यायः ।

अंगकादिः ।

ईश्वर उवाच । रुद्राक्षकटकं धार्य्यं विषमं सुसमं दृढम् ।
एकचिपञ्चवदनं यथालाभन्तु धारयेत् ॥ १ ॥
द्विचतुःषण्मुखं गम्भमन्त्रणं तीव्रकण्ठकं ।
दक्षबाहौ शिखादौ च धार्य्येच्चतुरानन ॥ २ ॥
अब्रह्मचारी ब्रह्मचारी अज्ञातः ज्ञातको भवेत् ।
हेमौ वा मुद्रिका धार्य्या(१) शिवमन्त्रेण चार्चय तु ॥ ३ ॥

---

१ कार्य्येति च० ।

शिवः शिखा तथा ज्योतिः सविचक्षेतिगोचराः ।
गोचरन्तु कुलं क्षेयं तेन लक्ष्यस्तु दीक्षितः ॥ ४ ॥
प्राजापत्यो महीपालः कपोतो ग्रन्थिकः शिवे ।
कुटिलाश्चैव वेताला पद्महंसाः शिखाकुले ॥ ५ ॥
धृतराष्ट्रा वकाः काका गोपाला ज्योतिसंज्ञके ।
कुटिका साठराश्चैव गुटिका दक्षिणोऽपरे ॥ ६ ॥
सावित्री गोचरे चैवमेकैकस्तु चतुर्विधः ।
सिद्धाद्यंगकमाख्यास्ये येन मन्त्रः सुसिद्धिदः ॥ ७ ॥
भूमौ तु मालका लेख्याः कूटषण्डाववर्जिताः ।
मन्त्राक्षराणि विश्लिष्य अनुस्वारं नयेत् पृथक् ॥ ८ ॥
साधकस्य तु या संज्ञा तस्या विश्लेषणं चरेत् ।
मन्त्रस्यादौ तथा चान्ते साधकार्णानि योजयेत् ॥ ९ ॥
सिद्धः साध्यः सुसिद्धोऽरिः संज्ञातो गणयेत् क्रमात् ।
मन्त्रस्यादौ तथा चान्ते सिद्धिदः स्याच्छतांगतः ॥ १० ॥
सिद्धादियान्तसिद्धिश्च तत्क्षणादेव सिध्यति ।
सुसिद्धादिः सुसिद्धान्तः सिद्धवत् परिकल्पयेत् ॥ ११ ॥
अरिमादौ तथान्ते च दूरतः परिवर्जयेत् ।
सिद्धः सुसिद्धश्चैकार्थे अरिः साध्यस्तथैव च ॥ १२ ॥
आदौ सिद्धः स्थितो मन्त्रे तदन्ते तद्वदेव हि ।
मध्ये रिपुसहस्राणि न दोषाय भवन्ति हि ॥ १३ ॥
मायाप्रसादप्रणवैर्नांगकः ख्यातमन्त्रके ।
ब्रह्मांगको ब्रह्मविद्या विष्णुर्को(१) वैष्णवः स्मृतः ॥ १४ ॥

---

१ विष्वंग इति अ० ।

रुद्रांशको भवेद्वीर इन्द्रांशश्चेश्वरप्रियः ।
नागांशो नागस्तव्याप्तो यक्षांशो भूषणप्रियः ॥ १५ ॥
गन्धर्वांशोऽतिगीतादि भौमांशो राक्षसांशकः ।
दैत्यांशः स्याद् युद्धकार्य्यो मानी विद्याधरांशकः ॥ १६ ॥
पिशाचांशो मलाक्रान्तो मन्त्रं दद्यान्निरीक्ष्य च ।
मन्त्र एकात् फड़न्तः स्यात् विद्यापल्लवतावधि ॥ १७ ॥
बाला विंशाक्षरान्ता च रुद्रा हाविंशगायुधा ।
तत ऊर्ध्वन्तु ये मन्त्रा ह्रहा यावच्छतत्रयं ॥ १८ ॥
अकारादिहकारान्ताः क्रमात् पञ्चौ सितासितौ ।
अनुस्वारविसर्गेण विना चैव स्वरा दश ॥ १९ ॥
क्रूरा: शुक्ला दीर्घाः श्यामास्त्रितयः प्रतिपञ्चस्वराः ।
उदिते शान्तिकादीनि भ्रमिते वश्यकादिकम् ॥ २० ॥
भ्रामिते सत्त्वयो हेषोच्चाटने स्तम्भनेऽस्तकम् ।
द्रावाहे शान्तिकाद्यं पिङ्गले कर्षणादिकम्(१)॥ २१ ॥
मारणोच्चाटनादीनि विपुवे पञ्चधा पृथक् ।
अधरस्थ गृहे पृथ्वी ऊर्द्ध तेजोऽन्तरा द्रवः ॥ २२ ॥
रन्ध्रपार्श्वे बहिर्वायुः सर्वं व्याप्य महेश्वरः ।
स्तम्भनं पार्थिवे शान्तिर्जले वश्यादि तेजसे ।
वायौ स्याद् भ्रमणं शून्ये पुष्पं कालं समभ्यसेत् ॥ २३ ॥

इत्याग्नेये महापुराणे अंगकादिर्नाम चतुर्विंशत्यधिक-
त्रिशततमोऽध्यायः ।

---

१ कर्षकादिकमिति ख०, ङ० च ।

अथ पञ्चविंशत्यधिकत्रिशततमोऽध्यायः ।

—०·०—

गौर्य्यादिपूजा ।

ईश्वर उवाच । सौभाग्यादेरुमापूजां वक्ष्येऽहं भुक्तिमुक्तिदां ।
मन्त्रध्यानं मण्डलञ्च मुद्रां होमादिसाधनम् ॥ १ ॥
चिच्चभानुं शिवं कालं महाशक्तिसमन्वितम् ।
कृत्वा परतोहृत्य सदेवः सविकारणम् ॥ २ ॥
द्वितीयं हारकाक्रान्तं गौरीप्रीतिपदान्वितं ।
चतुर्थ्यन्तं प्रकर्त्तव्यं गौर्या वै मूलवाचकं ॥ ३ ॥
ॐ क्लीं सः शों गौर्य्यै नमः ।
तत्त्वार्णैश्चितयेनैव जातियुक्तं षडङ्गुलम् ।
आसनं प्रणवेणैव मूर्त्तिं वै हृदयेन तु ॥ ४ ॥
उदकञ्च तथा कालं शिवबीजं समुद्धरेत् ।
प्राणं दीर्घस्वराक्रान्तं षडङ्गं जातिसंयुतम् ॥ ५ ॥
आसनं प्रणवेनात्र मूर्त्तिन्यासं हृदाचरेत् ।
यामलं कथितं वत्स एकवीरं वदाम्यथ ॥ ६ ॥
व्यापकं सृष्टिसंयुक्तं वह्निमायाक्रमानुभिः ।
शिवशक्तिमयं बीजं हृदयादिविवर्जितं ॥ ७ ॥
गौरीं यजेत्तेमरुप्यां काष्ठजां शैलजादिकां ।
पञ्चपिण्डां तथाऽध्यक्षां कोणे मध्ये तु पञ्चमं(१) ॥ ८ ॥
ललिता सुभगा गौरी शोभनी चाम्बिकः क्रमात् ।

---

१ पञ्चमी इति ग० ।

वामा ज्येष्ठा क्रिया ज्ञाना दक्षे पूर्व्वादितो यजेत् ॥ ९ ॥
सपीठे वामभागे तु शिवस्याव्यक्तरूपकम् ।
व्यक्ता द्विनेत्रा चतुरा शुद्धा वा शङ्खरान्विता ॥ १० ॥
पीठपद्मद्वयं तारा द्विभुजा वा चतुर्भजा ।
सिंहस्था वा हंसस्था(१) वा अष्टाष्टादशसत्करा ॥ ११ ॥
स्रगक्षसूत्रकलिका गलकोत्पलपिण्डिका ।
शरं धनुर्व्वा सव्येन पाणिनान्यतमं वहत् ॥ १२ ॥
वामेन पुस्तताम्बूलदण्डाभयकमण्डलुम् ।
गणेशदर्पणेष्वासान्द्यादेकैकशः क्रमात् ॥ १३ ॥
व्यक्ताव्यक्ताऽथवा कार्य्या पद्ममुद्रा मृतासने ।
तिङ्मुद्रा शिवस्योक्ता सुदा चावाहनी द्वयोः ॥ १४ ॥
अग्निमुद्रा तु योन्याख्या चतुरस्रन्तु मण्डलं ।
चतुरस्रं त्रिपत्राढ्यं मध्यकोष्ठचतुष्टये ॥ १५ ॥
आग्नेयं चार्द्धचन्द्रन्तु द्विपदं द्विगुणं क्रमात् ।
द्विगुणं द्वारकण्ठन्तु द्विगुणादुपकण्ठतः ॥ १६ ॥
द्वारत्रयं त्रयं दिक्षु अथ वा भद्रके यजेत् ।
स्थण्डिले वाथ संस्थाप्य पञ्चगव्यामृतादिना ॥ १७ ॥
रक्तपुष्पाणि देयानि पूजयित्वा शुदङ्मुखः ।
प्रतं हुत्वामृताज्यञ्च पूर्णादः सर्व्वसिद्धिभाक् ॥ १८ ॥
बलिन्दत्वा कुमारीञ्च तिस्रो वा वाष्ट भोजयेत्(२) ।
नैवेद्यं शिवभक्ते तु दद्यान्न स्वयमाचरेत् ॥ १९ ॥

---

१ सिंहस्थावाहसिंहस्थेति ङ०, ञ०, ट०, ठ० च ।

२ त्रिस्रो वाष्ट च भोजयेदिति ङ०, ञ० च ।

कन्यार्थी लभते कन्यां अपुत्रः पुत्रमाप्नुयात् ।
दुर्भगा चैव सौभाग्यं राजा राज्यं जयं रणे ॥ २० ॥
अष्टलक्षैश्च वाक्सिद्धिर्देवाद्या वशमाप्नुयुः ।
न निवेद्य न चास्नीयाद्धामहस्तेन चार्चयेत् ॥ २१ ॥
अष्टम्याञ्च चतुर्दश्यां लौतीयायां विशेषतः ।
मृत्युञ्जयार्चनं वक्ष्ये पूजयेत् कलसोदरे ॥ २२ ॥
ध्रुवमानञ्च प्रणवो मूर्त्तिरोजस ईदृशं ।
मूलञ्च वौषडन्तेन कुम्भमुद्रां प्रदर्शयेत् ॥ २३ ॥
होमयेत् क्षीरदुर्वाज्यममृताञ्च पुनर्नवाम् ।
पायसञ्च पुरोडाशमयुतन्तु जपेन्मनुं ॥ २४ ॥
चतुर्मुखं चतुर्बाहुं हाभ्याञ्च कलसन्दधत् ।
वरदाभयकं हाभ्यां स्यायाद्वै कुम्भमुद्रया ॥ २५ ॥
आरोग्यैश्वर्यदीर्घायुरौषधं मन्त्रितं शुभम् ।
अपमृत्युहरो ध्यातः पूजितोऽद्भुत एव सः ॥ २६ ॥

इत्याग्नेये महापुराणे गौर्य्यादिपूजा नाम पञ्चविंशत्यधिक-त्रिशततमोऽध्यायः ।

अथ षड्विंशत्यधिकत्रिशततमोऽध्यायः ।

—000—

देवालयमाहात्म्यम् ।

ईश्वरउवाच । व्रतेश्वरांश्च सत्यादीनिष्ट्वा व्रतसमर्पणम् ।
अरिष्टशमने शस्तमरिष्टं सुव्रतायकम् ॥ १ ॥

हेमरत्नमयं भूत्वे महाग्रन्थिश्च मारणे।
आप्यायने शङ्खसूत्रं मौक्तिकं पुत्रवर्द्धनम् ॥ २ ॥
स्फाटिकं भूतिदं कौम्यं मुक्तिदं (१) रुद्रनेत्रजं।
धात्रीफलप्रमाणेन रुद्राक्षं चोत्तमन्ततः ॥ ३ ॥
समेरुं मेरुहीनं वा सूत्रं जप्यन्तु मानसम्।
अनामाङ्गुष्ठमाक्रम्य जपं भाषन्तु कारयेत् ॥ ४ ॥
तर्ज्जन्यङ्गुष्ठमाक्रम्य न मेरुं लङ्घयेज्जपे।
प्रमादात् पतिते सूत्रे जपितव्यन्तु शतत्रयम् ॥ ५ ॥
सर्ववाद्यमयी घण्टा तस्या वादनमर्थकृत्।
गोशकृन्मूत्रवल्मीकमृत्तिकाभस्मवारिभिः ॥ ६ ॥
वेश्मायतनलिङ्गादेः कार्य्यमेवं विशोधनम्।
स्कन्दो नमः शिवायेति मन्त्रः सर्व्वार्थसाधकः ॥ ७ ॥
गीतः पञ्चाक्षरो वेदे लोके गीतः षडक्षरः।
ओमित्यन्ते स्थितः शम्भुर्म्मुद्रार्थं वटबीजवत् ॥ ८ ॥
क्रमान्नमः शिवायेति ईशानाद्यानि वै विदुः।
षडक्षरस्य सूक्ष्मस्य भाष्यविद्याकदम्बकं ॥ ९ ॥
यदौं नमः शिवायेति एतावत् परमं पदम्।
अनेन पूजयेल्लिङ्गं लिङ्गे यस्मात् स्थितः शिवः ॥ १० ॥
अनुग्रहाय लोकानां धर्म्मकामार्थमुक्तिदः।
यो न पूजयते लिङ्गञ्च स धर्म्मादिभाजनं ॥ ११ ॥
लिङ्गाच्चैनाकृतिमुक्तिर्यावज्जीवमतो यजेत्।
वरं प्राणपरित्यागो भुञ्जीतापूज्य नैव तं ॥ १२ ॥

---

१ भक्तिदमिति च०।

रुद्रस्य पूजनाद्रुद्रो विष्णोः स्याद्विष्णुपूजनात् ।
सूर्यः स्यात् सूर्यपूजातः शक्त्यादिः शक्तिपूजनात् ॥ १३ ॥
सर्वयज्ञतपोदाने तीर्थे वेदेषु यत् फलं ।
तत् फलं कोटिगुणितं स्याच्च लिङ्गं लभेन्नरः ॥ १४ ॥
त्रिसन्ध्यं योऽर्चयेल्लिङ्गं कृत्वा विल्वेन पार्थिवम् ।
शतैकादशिकं यावत् कुलमुद्धृत्य नाकभाक् ॥ १५ ॥
भक्त्या वित्तानुसारेण कुर्य्यात् प्रासादसञ्चयम् ।
अल्पे महति वा तुल्यफलमाढ्यदरिद्रयोः ॥ १६ ॥
भागद्वयञ्च धर्मार्थं कल्पयेज्जीवनाय च ।
धनस्य भागमेकन्तु (१)अनित्यं जीवितं यतः ॥ १७ ॥
त्रिसप्तकुलमुद्धृत्य देवागारकृदर्थभाक् ।
मृत्काष्टेष्टकशैलाद्यैः क्रमात् कोटिगुणं फलम् ॥ १८ ॥
अष्टेष्टकसुरागारकारी स्वर्गमवाप्नुयात् ।
पांशुना क्रीडमानोपि देवागारकृदर्थभाक् ॥ १९ ॥

इत्याग्नेये महापुराणे देवालयमाहात्म्यादिर्नाम षड्विंशत्यधिक-शततमोऽध्यायः ।

अथ सप्तविंशत्यधिकशततमोऽध्यायः ।

—ooo—

छन्दःसारः ।

अग्निरुवाच । छन्दो वक्ष्ये मूलजैस्तैः पिङ्गलोक्तं यथाक्रमम् ।
सर्व्वादिमध्यान्तगणौ स्त्रौ द्वौ जौ स्तौ त्रिकौ गयाः ॥१॥

---

१ धनस्याप्यार्धमेकमिति ख० ।

क्ष्वी गुरुर्व्वा पादान्ते पूर्व्वो योगाद् विसर्गतः ।
अनुस्वाराद्यञ्जनात् स्यात् जिह्वामूलीयतस्तथा ॥ २ ॥
उपाध्मानीयतो दीर्घो गुरुर्ल्लौ नौ गणाविह ।
वसवोष्टौ च चत्वारो वेदादित्यादिलोपतः ॥ ३ ॥
इत्याग्नेये महापुराणे छन्दःसारो नाम सप्तविंशत्यधिक-
त्रिशततमोऽध्यायः ।

अथाष्टाविंशत्यधिकत्रिशततमोऽध्यायः ।

छन्दःसारः ।

अग्निरुवाच । छन्दोधिकारे गायत्री त्रैवी चैकाक्षरी भवेत् ।
पञ्चदशाक्षरी सा स्यात् प्राजापत्याष्टवर्णिका ॥ १ ॥
यजुषां षड्वर्णा गायत्री साम्नां स्यादष्टाक्षरा ।
ऋचामष्टादशार्णा स्यात्साम्नां वर्द्धत च द्वयं ॥ २ ॥
ऋचां तृतीयञ्च वर्द्धत प्राजापत्याचतुष्टयं ।
वर्द्धदेकैककं शेषे आतुर्य्यादेकमुत्सृजेत् ॥ ३ ॥
उष्णिगनुष्टुब् बृहती पङ्क्तिस्त्रिष्टुब्जगत्यपि ।
तानि त्रैयाणि क्रमशो गायत्री ब्रह्म एव ताः ॥ ४ ॥
तिसृभिस्तिस्रः समाख्याः स्युरेकैका आर्ष्य एव च ।
ऋग्यजुषां संज्ञाः स्युयतुःषष्टिपदे लिखेत् ॥ ५ ॥
इत्याग्नेये महापुराणे छन्दःसारो नामाष्टाविंशत्यधिक-
त्रिशततमोऽध्यायः ।

अथोनत्रिंशदधिकत्रिशततमोऽध्यायः।

छन्दःसारः।

अग्निरुवाच। पादश्चापादपूरणे गायत्र्यो वसवः स्मृताः।
जगत्या आदित्याः पादो विराजो दिश ईरिताः॥ १॥
त्रिष्टुतो रुद्राः पादः स्याच्छन्द एकादिपादकं।
आद्यं चतुर्भिश्चतुर्भिस्त्रिपात् समाक्षरैः क्वचित्॥ २॥
सा गायत्री पदे नोक्ता तत्प्रतिष्ठादि षट् त्रिपात्।
वर्धमाना षड़ष्टाष्टा त्रिपात् षड़्वसुभूधरैः॥ ३॥
गायत्री त्रिपदा नोक्ता नागी नवनवर्त्तुभिः।
वाराही रसहिरसा छन्दश्चाथ तृतीयकम्॥ ४॥
द्विपाद् द्वादशवस्वन्तैः त्रिपात्तु त्रैष्टुभैः स्मृतम्।
उष्णिक् छन्दोऽष्टवसुकैः पादैर्वेदे प्रकीर्त्तितः॥ ५॥
ककुबुष्णिगष्टसूर्य्यवस्वर्णा त्रिभिरेव सः।
पुनरुष्णिक् सूर्य्यवसुवस्वर्णैश्च त्रिपाद्भवेत्॥ ६॥
परोष्णिक् परतस्त्वाद्यचतुर्थ्यादात् त्रिभिर्भवेत्।
साष्टाक्षरैरनुष्टुप् स्यात् चतुर्थाच्च त्रिपात् क्वचित्॥ ७॥
अष्टार्कसूर्य्यवर्णैः स्यात् मध्येऽन्ते च क्वचिद्भवेत्।
बृहतीजगत्यक्षयो गायत्र्याः पूर्ब्बको यदि॥ ८॥
तृतीयः पथ्या भवति द्वितीयान्त्यं कुसारिणी।
स्कन्धो ग्रीवा क्रौष्टुके स्याद् यत्रे स्याद्यो बृहत्यपि॥ ९॥

उपरिष्टाद्बृहत्यन्ते पुरस्ताद्बृहती पुनः ।
क्वचिन्नवकाश्चत्वारो दिग्विदिक्षष्टवर्णिकाः ॥ १० ॥
महाबृहती जागतैः स्यात् त्रिभिः सतो बृहत्यपि ।
भण्डिलः पङ्क्तिच्छन्दः स्यात् सूर्यार्काष्टाष्टवर्णकैः ॥ ११ ॥
पूर्वौ वेदयुजौ सतः पङ्क्तिश्च विपरीतकौ ।
प्रस्तारपङ्क्तिः पुरतः पवादास्तारपङ्क्तिका ॥ १२ ॥
अक्षरपङ्क्तिः पञ्चकाश्चत्वारश्चाल्पगौ हयं ।
पदपङ्क्तिः पञ्च भवेच्चतुष्कं षट्कचयम् ॥ १३ ॥
षट्कपञ्चभिर्गायत्रैः षड्भिः जगती भवेत् ।
एकेन त्रिष्टुब्ज्योतिष्मती तथैव जगतीरिता ॥ १४ ॥
पुरस्ताज्ज्योतिः प्रथमे मध्ये ज्योतिश्च मध्यतः ।
उपरिष्टाज्ज्योतिरन्त्यादेकस्मिन् पञ्चके तथा ॥ १५ ॥
भवेच्छन्दः शङ्कुमती षट्के छन्दः ककुभ्मती ।
त्रिपादग्निर्गुमध्या स्यात् सा पिपीलिकमध्यमा(१) ॥१६॥
विपरीता यवमध्या त्रिवृदेकेन वर्जिता ।
भूमिजैकेनाधिकेन हीना च विराड्भवेत् ॥ १७ ॥
स्वराट्स्याद्वाभ्यामधिकं सन्दिग्धो दैवतादितः ।
आदिपादाविषयः स्याच्छन्दसां देवता क्रमात् ॥ १८ ॥
अग्निः सूर्यः शशी जीवो वरुणश्चन्द्र एव च ।
विश्वेदेवाश्च षड्जाद्याः स्वराः षड्जो हयः क्रमात् ॥ १९ ॥
गान्धारो मध्यमश्चैव पञ्चमो धैवतस्तथा ।
निषादवर्णाः श्वेतश्च सारङ्गश्च पिसङ्गकः ॥ २० ॥

---

१ पिपीलिकमध्येति च० ।

कृष्णो नीलो लोहितश्च गौरो गायत्रिमुख्यके ।
गौरोष्णनाभाः कृतयो ज्योतिश्छन्दो हि श्यामलं ॥ २१ ॥
अग्निर्वैश्यः काश्यपश्च गौतमाङ्गिरसौ क्रमात् ।
भार्गवः कौशिकश्चैव वासिष्ठो गोत्रमीरितं ॥ २२ ॥

इत्याग्नेये महापुराणे छन्दःसारो नामोनत्रिंशदधिक-त्रिशततमोऽध्यायः ।

अथ त्रिंशदधिकत्रिशततमोऽध्यायः ।

छन्दोजातिनिरूपणम् ।

अग्निरुवाच । चतुःशतमृतुकृतिः स्यादृतुकृतेर्यतुरस्त्यजेत् ।
अभिसंख्या प्रत्यृतिस्तानि छन्दांसि वै पृथक् ॥ १ ॥
ऋतिश्चातिधृतिश्चोक्तो(१) अत्यष्टिश्चाष्टिरित्यतः ।
अतिशक्वरी शक्वरीति अतिजगती जगत्यपि ॥ २ ॥
छन्दोऽत्र लौकिकं स्याच्च आर्षमाच्छैष्टुभात् स्मृतम् ।
त्रिष्टुप्पङ्क्तिश्चहती अनुष्टुबुष्णिगीरितम् ॥ ३ ॥
गायत्री स्यात् सुप्रतिष्ठा प्रतिष्ठा मध्यया सह ।
अत्युक्तात्युक्त आदिश्च एकैकाक्षरवर्जितम् ॥ ४ ॥
चतुर्भागो भवेत् पादो गणच्छन्दः प्रदर्श्यते ।
तावन्तः समुद्रा गणा ह्यादिमध्यान्तसर्वगाः ॥ ५ ॥

---

१ ऋतिश्चातिधृतिश्चोक्तो इति अ०, ट० च ।

चतुर्णः पञ्च च गणा आर्य्यालक्षणमुच्यते ।
स्वरार्द्धेचार्य्यार्द्धं स्यादार्य्यायां विषमेन जः ॥ ६ ॥
षष्ठो जो नलपूर्वा स्यादद्वितीयादिपदं नले ।
सप्तमेऽन्ते प्रथमा च द्वितीये पञ्चमे नले ॥ ७ ॥
अर्द्धं पदं प्रथमादि षष्ठ एको लघुर्भवेत् ।
त्रिषु गणेषु पादः स्यादार्य्या पञ्चार्द्धके स्मृता ॥ ८ ॥
विपुलान्त्याथ चपला गुरुमध्यगतौ च जौ ।
द्वितीयचतुर्थौ पूर्वे च चपला मुखपूर्विका ॥ ९ ॥
द्वितीये जघनपूर्व्वा चपलार्य्या प्रकीर्त्तिता ।
उभयोर्महाचपला गीतवाद्यार्द्धतुल्यका ॥ १० ॥
अन्त्येनार्द्धेनोपगीतिरुद्गीतियोत्क्रमात् स्मृता ।
अर्द्धे रक्तगणा आर्य्या गीतच्छन्दोऽथ मात्रया ॥ ११ ॥
वैतालीयं द्विस्वरा स्यादयुग्मादे समे नलः ।
वसवोऽन्ते वनगाय गोपुच्छन्दगकं भवेत् ॥ १२ ॥
भगणान्ता पाटलिका शेषे परे च पूर्ववत्(१)।
साकं षड्भ्वा मिश्रायुक् प्राच्यवृत्तिः प्रदर्श्यते ॥ १३ ॥
पञ्चमेन पूर्वसाकं तृतीयेन सहस्रयुक् ।
उदीच्यवृत्तिर्वार्च्यां स्याद् युगपच्च प्रवर्त्तकं ॥ १४ ॥
अयुक्चारुहासिनी स्यादयुगपच्चान्तिका भवेत् ॥ १५ ॥
सप्ताश्विर्वसवश्चैव मात्रासमकमीरितम् ।
भवेन्नलवमौ लय द्वादशौ वा नवासिका ॥ १६ ॥
विश्लोकः पञ्चमाष्टौ मो चित्रा लवमकयुलः ।

---

१ पुच्छलमिति च० ।

पथ्यावोमलयोमः(१) स्याज्जौ गौ मयूरसारिणी ।
सत्तामभसगा वृत्तं भजताद्युपरिस्थिता ॥ ४ ॥
रुक्मवती भससगाविन्द्रावज्रा तजौ जगौ ।
जतौ जगौ गूपपूर्व्वावाद्यन्तान्युपजातयः ॥ ५ ॥
दोधकं भगभागौ स्यात् शालिनी मतभागगौ ।
यतिः समुद्रा ऋषयः वातोर्म्मी मभतागगौ ॥ ६ ॥
चतुःस्वरा स्याद्भ्रमरी विलासिता मभौनलौ ।
समुद्रा अथ ऋषयो वनौ लोगौ रथोद्धता ॥ ७ ॥
सामताधनभागोगोद्धताननसमाश्रमः ।
श्येनी वजवनागः स्याद्रम्या नपरगागगः ॥ ८ ॥
जगती वंशस्था वृत्तं जतौ जावथ तौ जवौ ।
इन्द्रवंशा तोटकं सैर्यतुर्भिः प्रतिपादितः ॥ ९ ॥
भवेद्वृतविलम्बिता नभौ भवावथो नलौ ।
स्यौ श्रीपुठो वसुवेदा जलौगतिजलौ जमौ ॥ १० ॥
जसौ वसर्व्ववश्वाथ ततं ननमराः स्मृतं ।
कुसुमविचित्रा न्यौ यौ नौ नौ रौ स्याच्चलाम्बिका(२)॥११॥
भुजङ्गप्रयातं यैः स्याच्चतुर्भिः स्रग्विनीभवैः ।
प्रमिताक्षरा गजौ सौ कान्तोत्पीड़ा मतौ समौ(३) ॥१२॥
वैश्वदेवौ(४) ममयायाः पञ्चाक्षरा नवमालिनी ।

---

१ मलयाम इति ख० ।
२ चरचालिका इति ख० । चञ्चलाम्बिका इति ङ० ।
३ ममाविति ख० ।
४ विश्वदेवौति ख० ।

नजौ भयौ प्रतिपादं गणा यदि जगत्यपि ॥ १३ ॥
प्रहर्षणी मवजवा गोपतिर्वङ्किदिक्षु च ।
रुचिरा जभसजगा च्छित्त्वा वेदैर्यदैः स्मृता ॥ १४ ॥
मत्तमयूरं मतया सगौ वेदग्रहे यतिः ।
गौरीनलनसागः स्यादसम्बाधा नतौ नगेा ॥ १५ ॥
गोग इन्द्रियनवकौ ननौ वसनगाः खराः ।
खराश्वापराजिता स्यान्नभाननगाः खराः ॥ १६ ॥
हिःप्रहरणकलिता(१) वसन्ततिलका नभौ ।
जौ गौ सिंहोन्नता सा स्यान्मुनेरुदर्षणी च सा ॥ १७ ॥
चन्द्रावर्त्ता ननौ सोमावर्त्तर्तुनवकः स्मृतः ।
मणिगुणनिकरा सौ मालिनौ नौ मयौ यः ॥ १८ ॥
यतिर्वसुखरा भौ वौ नतलमित्रसग्रहाः(२) ।
ऋषभगजविलासितं त्रेया शिखरिणी जगौ ॥ १९ ॥
रसभालभृगुरुद्राः पृथ्वीजसजसा जनौ ।
गोवसुग्रहविच्छित्त्वा पिङ्गलेनेरिता पुरा ॥ २० ॥
वंशपत्रपतितं स्याद् भवना भौ नगौ सदिक् ।
हरिणी नसमारः सौ नगौ रसचतुःखराः ॥ २१ ॥
मन्दाक्रान्ता नभनतं तगौगछिरसखराः ।
कुसुमितलता वेल्लिता मतना यययाः शराः ॥ २२ ॥
रथाः खराः प्रतिरथससजाः सततायगः ।
शार्दूलविक्रीडितं स्यादादित्यसुनयो यतिः ॥ २३ ॥

---

१ हिःप्रहरणकलितेति ख० ।
२ ननमागमसपदा इति ग० ।

क्षतिः सुवदना मोरो भनया भनगाः सुराः ।
यतिर्मुनिरसाश्वाथ वृत्ति वृत्तं क्रमात् स्मृतम् ॥ २४ ॥
स्रग्धरा मरतानोमोयपौ त्रिःसप्तका यतिः ।
समुद्रकं भरजानोवनगा दशभास्कराः ॥ २५ ॥
अश्वललितं नजभा जभजा भनमोग्रतः ।
मत्ताक्रीड़ा ममनना नौनग्नौ गोष्टमातिथिः ॥ २६ ॥
तन्वी भनतसाभोभौ लयौ वाणसुरार्कका ।
क्रौञ्चपदा भमतता नौ नौ वाणशराष्टतः ॥ २७ ॥
भुजङ्गविजृम्भितं ममतना ननवासनौ ।
गष्टेग्रमुनिभिश्छेदौ ह्युपहारास्यमीष्टग्रम् ॥ २८ ॥
मननानतानः सौ गगौ यहरसौ रसात्(१) ।
नौ समरोदण्डदः स्याच्चण्डवृष्टिप्रपातकं(२) ॥ २९ ॥
रेफहया गणवा स्युर्व्यालजीमूतमुख्यकाः ।
शेषे वै प्रचिता ज्ञेया गाथाप्रस्तार उच्यते ॥ ३० ॥

इत्याग्नेये महापुराणे समवृत्तनिरूपणं नाम चतुस्त्रिंशदधिक-
त्रिशततमोऽध्यायः ।

अथ चतुस्त्रिंशदधिकत्रिशततमोऽध्यायः ।

प्रस्तारनिरूपणम् ।

अग्निरुवाच । छन्दोऽत्र सिद्धं गाथा स्यात् पादे सर्व्वगुरौ तथा ।
प्रस्तार आद्यगाथोनः परतुल्योऽथ पूर्व्वगः ॥ १ ॥

१ यदयसौ वसादिनि ग० ।
२ चण्डवृष्टिप्रपातक इति ङ० ।

नष्टमध्ये समेऽङ्केन: समेऽर्धं विषमे गुरुः ।
प्रतिलोमगुणं नाद्यं द्विरुद्दिष्टग एकभृत् ॥ २ ॥
सङ्ख्याद्विरर्धं रूपे तु शून्यं शून्ये द्विरीरितं ।
तावदर्धं तदुत्थितं द्विहीनश्च तदन्ततः ॥ ३ ॥
परे पूर्णं परे पूर्णं मेरुप्रस्तारतो भवेत् ।
नगसंख्या वृत्तसंख्या चाध्वाङ्कुलमधोर्धतः ।
सङ्ख्यैव द्विगुणैकोना छन्दःसारोऽयमीरितः॥ ४ ॥

इत्याग्नेये महापुराणे प्रस्तारनिरूपणं नाम चतुस्त्रिंशदधिक-त्रिशततमोऽध्यायः ।

अथ पञ्चत्रिंशदधिकत्रिशततमोऽध्यायः ।

गिच्चानिरूपणम् ।

अग्निरुवाच । वक्ष्ये गिच्चान्त्रिषष्टिः स्युर्वर्णा वा चतुराधिकाः ।
स्वरा विंशतिरेकश्च स्वर्गानां पञ्चविंशतिः ॥ १ ॥
यादयश्च स्मृता ह्यष्टौ चत्वारश्च समाः स्मृताः ।
अनुस्वारो विसर्गश्च पौरुषौ चापि परान्वितौ ॥ २ ॥
दुष्पृष्टेति विज्ञेया ककारः प्लुत एव च ।
रङ्गश्च खे अरं प्रोक्तं(१) हकारः पञ्चमैर्युतः ॥ ३ ॥
अन्तस्थाभिः समायुक्त ओरस्थः कण्ठ एव सः ।
आत्मबुद्ध्या समस्यार्थं मनोयुक्तो विवक्षया ॥ ४ ॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।

---

१ वर्गमुखे अरं प्रोक्तमिति ङ० ।

मारुतस्तूरसि चरन् मन्द्रं(१) जनयति स्वरं ॥ ५ ॥
प्रातःसवनयोगस्तु छन्दो गायत्रमाश्रितम् ।
कण्ठे माध्यन्दिनयुतं मध्यमन्द्रेषु भानुगम् ॥ ६ ॥
तारस्तार्तीयसवनं(२)शीर्षण्यं जागतानुगम् ।
सोदीर्णो मूर्ध्न्यभिहितो वक्त्रमापद्य मारुतः ॥ ७ ॥
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ।
स्वरतः कालतः स्थानात् प्रयत्नार्थप्रदानतः ॥ ८ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥ ९ ॥
स्वभावश्च विवृत्तिश्च श्वसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोऽग्रणः ॥ १० ॥
पद्यो भावप्रसन्धानमुकारादि परम्यदं ।
स्वरान्तं तादृग्रं विद्याद्यदन्यद्व्यञ्जनमूष्मणः ॥ ११ ॥
अतीर्थादागतं(३) दग्धमपवर्णञ्च भक्षितं ।
एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥ १२ ॥
अतीर्थादागतं द्रव्यं साम्नायं सुव्यवस्थितं ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्मराजति ॥ १३ ॥
न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ।
गद्गदो बहुजिह्मश्च न वर्णान् वक्तुमर्हति ॥ १४ ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीड़िताः ।

---

१ मान्द्रमिति च० ।

२ भावन्नार्तीयसवनमिति च० ।

३ अनतीर्थादागतमिति ङ० । अनतीर्थादागतमिति च० ।

सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ १५ ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमावधि ॥ १६ ॥
कण्ठ्या वह्याविचुयशास्तालव्या औष्ठजा वपु ।
स्युर्मूर्धन्या ऋटुरसाः(१)दन्त्याः लृश्चोलसाः स्मृताः ॥ १७ ॥
जिह्वामूले तु ह्रः प्रोक्तो दन्त्यौष्ठो वः स्मृतो बुधैः ।
एदैतौ कण्ठतालव्यौ ओ औ कण्ठ्यौष्ठजौ स्मृतौ ॥ १८ ॥
अर्धमात्रा तु कण्ठस्य एकारैकारयोर्भवेत् ।
अयोगवाह्या विज्ञेया आश्रयस्थानभागिनः ॥ १९ ॥
अचोऽस्पृष्टाषणस्त्वोषश्चोमाः स्पृष्टा हलः स्मृताः ।
यैषाः स्पृष्टा हलः प्रोक्ता निबोधाथ प्रधानतः ॥ २० ॥
अमोऽनुनासिकानक्षो नादिमौ हसषः स्मृताः ।
ईषत्स्पादीषणयमः श्वासिनश्च थकादयः ।
ईषच्छ्वासं स्वरं विद्याद्दीर्घमेतत् प्रचक्षते ॥ २१ ॥

इत्याग्नेये महापुराणे शिक्षानिरूपणं नाम पञ्चदशाधिक-त्रिशततमोऽध्यायः ।

---

१ ऋटवर्गा इति च० ।

अथ षट्त्रिंशदधिकत्रिशततमोऽध्यायः ।

काव्यादिलक्षणं ।

अग्निरुवाच । काव्यस्य नाटकादेश्च अलङ्कारान् वदाम्यऽथ ।
ध्वनिर्व्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतं ॥ १ ॥
शास्त्रेतिहासवाक्यानां चयं यत्र समाप्यते ।
शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ॥ २ ॥
अभिधायाः प्रधानत्वात् काव्यं ताभ्यां विभिद्यते ।
नरत्वं दुर्ल्लभं लोके विद्या तत्र च दुर्ल्लभा ॥ ३ ॥
कवित्वं दुर्ल्लभं तत्र शक्तिस्तत्र च दुर्ल्लभा ।
व्युत्पत्तिर्दुर्ल्लभा तत्र विवेकस्तत्र दुर्ल्लभः ॥ ४ ॥
सर्व्वं शास्त्रमविद्वद्भिर्म्मृग्यमाणन्न सिध्यति ।
आदिवर्णा हितीयाश्च महाप्राणास्तुरीयकः ॥ ५ ॥
वर्गेषु वर्णछन्दं स्यात् पदं सुप्तिङ्प्रभेदतः ।
सङ्घे पादाक्यमिष्टार्थव्यवच्छिन्ना पदावली ॥ ६ ॥
काव्यं स्फुटदलङ्कारं गुणवद्दोषवर्ज्जितम् ।
योनिर्व्वेदश्च लोकश्च सिद्धमत्राद्योनिजं ॥ ७ ॥
देवादीनां संस्कृतं स्यात् प्राकृतं त्रिविधं नृणां ।
गद्यं पद्यञ्च मिश्रञ्च काव्यादि त्रिविधं स्मृतम् ॥ ८ ॥
अपदः पदसन्तानो गद्यमत्रापि गद्यते ।
चूर्णकोत्कलिकागन्धिवृत्तभेदात् त्रिरूपकम् ॥ ९ ॥
अल्पाढ्यविग्रहं नातिमृदुसन्दर्भनिर्भरं ।

चूर्णकं नामतो दीर्घसमासात् कलिका भवेत् ॥ १० ॥
भवेन्मध्यमसन्दर्भन्नातिकुत्सितविग्रहम् ।
वृत्तच्छायाक्षरं वृत्तं गन्धिनैतत् किलोत्कटम् ॥ ११ ॥
आख्यायिका कथा खण्डकथा परिकथा तथा ।
कथानिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा ॥ १२ ॥
कर्तृवंशप्रशंसा स्याद्यत्र गद्येन विस्तरात् ।
कन्याहरणसंग्रामविप्रलम्भविपत्तयः ॥ १३ ॥
भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः ।
उच्छ्वासैश्च परिच्छेदो यत्र या चूर्णकोत्तरा ॥ १४ ॥
वक्त्रं वापरवक्त्रं वा यत्र साख्यायिका स्मृता ।
श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसति ॥ १५ ॥
मुख्यस्यार्थावताराय भवेद्यत्र कथान्तरम् ।
परिच्छेदो न यत्र स्याद्वेदालम्भकैः क्वचित् ॥ १६ ॥
सा कथा नाम तद्भर्मे निबध्नीयाच्चतुष्पदीं ।
भवेत् खण्डकथा यासौ यासौ परिकथा तयोः ॥ १७ ॥
अमात्यं सार्थकं वापि द्विजं वा नायकं विदुः ।
स्यातयोः करणं विद्धि विप्रलम्भचतुर्विधः ॥ १८ ॥
समाप्यते तयोर्वाच्या सा कथामनुधावति ।
कथाख्यायिकयोर्भिन्नभावात् परिकथा स्मृता ॥ १९ ॥
भयानकं सुखपरं गर्भे च करुणो रसः ।
अङ्गतोऽन्ये सुकृमार्थो नोदात्ता सा कथानिका ॥ २० ॥
पद्यं चतुष्पदी तच्च वृत्तं जातिरितिद्विधा ।
वृत्तमक्षरसंख्येयमुक्तं तत् छन्दितिश्चेषजम् ॥ २१ ॥

माचाभिर्गणना यत्र सा जातिरिति काश्यपः(१) ।
सममर्धसमं वृत्तं विषमं पैङ्गलं त्रिधा ॥ २२ ॥
सा विद्या नौस्तितीर्षूणां गभीरं काव्यसागरं ।
महाकाव्यं कलापश्च पर्य्यायबन्धो विशेषकम् ॥ २३ ॥
कुलकं मुक्तकं कोष इति पद्यकदम्बकम् ।
सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत् ॥ २४ ॥
तादात्म्यमजहत्तत्र(२) तत्समं नाति दुष्यति ।
इतिहासकथोद्भूतमितरद्वा सदाश्रयं ॥ २५ ॥
मन्त्रदूतप्रयाणाजिनियतं नातिविस्तरम् ।
शक्त्यर्थातिजगत्यातिशक्त्यर्थी त्रिष्टुभा(३) तथा ॥ २६ ॥
पुष्पिताग्रादिभिर्वृत्तैरभिजनैश्चारुभिः समैः ।
सुक्ता(४) तु भिन्नवृत्तान्ता नातिसंक्षिप्तसर्गकम् ॥ २७ ॥
अतिशक्वरिकाष्टिभ्यामेकसङ्कीर्णकैः परः ।
मात्रयाप्यपरः सर्गः प्रागस्त्येषु च पश्चिमः ॥ २८ ॥
कल्पोऽतिनिन्दितस्तस्मिन्विशेषानादरः सतां ।
नगरार्णवशैलर्तुचन्द्रार्काश्रमपादपैः ॥ २९ ॥
उद्यानसलिलक्रीड़ामधुपानरतोत्सवैः ।
दूतीवचनविन्यासैरसतीचरिताद्भुतैः ॥ ३० ॥
तमसा मरुताप्यन्यैर्विभावैरतिनिर्भरैः ।

---

१ कश्यप त ज०, अ०, ड० च ।
२ तादर्थ्यमजहत्तत्रेति ज० ।
३ चतुष्टुभेति अ० ।
४ मुक्तेति अ० ।

सर्व्ववृत्तिप्रवृत्तञ्च सर्व्वभावप्रभावितम् ॥ ३१ ॥
सर्व्वरीतिरसैः पुष्टं(१) पुष्टकृष्णविभूषणैः ।
अत एव महाकाव्यं तत्कर्त्ता च महाकविः ॥ ३२ ॥
वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।
पृथक्प्रयत्ननिर्व्वर्त्त्यं वाग्वल्क्यिन्नि रसाश्रयः ॥ ३३ ॥
चतुर्व्वर्गफलं विश्वग्व्याख्यातं नायकाख्यया ।
समानवृत्तिनिर्व्यूटः कौशिकीवृत्तिकोमलः ॥ ३४ ॥
कलापोऽत्र प्रवासः प्रागनुरागात्मको रसः ।
सविशेषकञ्च प्राग्यादि संस्कृतेनेतरेण च ॥ ३५ ॥
श्लोकैरनेकैः कुलकं स्यात् सन्दानितकानि तत् ।
मुक्तकं श्लोक एवैकयमत्कारक्षमः सतां ॥ ३६ ॥
सूक्तिभिः कविसिंहानां सुन्दरीभिः समन्वितः ।
कोषो ब्रह्मापरिच्छिन्नः स विदग्धाय रोचते ॥ ३७ ॥
आभासोपमगत्तिश्च सर्गे यद्विप्रवृत्तता ।
मिश्रं वपुरिति ख्यातं प्रकीर्णमिति च द्विधा ।
अव्यश्चैवाभिनेयश्च प्रकीर्णं सकलोक्तिभिः ॥ ३८ ॥

इत्याग्नेये महापुराणे अलङ्कारे काव्यादिलक्षणं नाम षट्त्रिंशदधिकत्रिशततमोऽध्यायः ।

---

१ जुष्टमिति अ०, ङ० च ।

अथ सप्तचिंशदधिकत्रिशततमोऽध्यायः।

———000———

नाटकनिरूपणम्।

अग्निरुवाच। नाटकं सप्रकरणं डिम ईहामृगोऽपि वा।
श्रेयः समवकारश्च भवेत् प्रहसनन्तथा ॥ १ ॥
व्यायोगभाणवीथ्यङ्कत्रोटकान्यथ नाटिका।
सट्टकं शिल्पकः कर्णा एको दुर्म्मल्लिका तथा ॥ २ ॥
प्रस्थानं भाणिका भाणी गोष्ठी हल्लीशकानि च।
काव्यं श्रीगदितं नाटारासकं रासकं तथा ॥ ३ ॥
उल्लाप्यकं प्रेङ्खणञ्च सप्तविंशतिरेव तत्।
सामान्यञ्च विशेषश्च लक्षणस्य द्वयी गतिः ॥ ४ ॥
सामान्यं सर्व्वविषयं शेषः क्वापि प्रवर्त्तते।
पूर्व्वरङ्गे निवृत्ते हौ देशकालावुभावपि ॥ ५ ॥
रसभावविभावानुभावा अभिनयास्तथा।
अङ्गः स्थितिश्च सामान्यं सर्व्वत्रैवोपसर्पणात् ॥ ६ ॥
विशेषोऽवसरे वाच्यः सामान्यं पूर्व्वमुच्यते।
त्रिवर्गसाधनन्नाटमित्याहुः कारणञ्च यत् ॥ ७ ॥
इतिकर्त्तव्यता तस्य पूर्व्वरङ्गो यथाविधि।
नान्दीमुखानि द्वात्रिंशदङ्गानि पूर्व्वरङ्गके ॥ ८ ॥
देवतानां नमस्कारो गुरूणामपि च स्तुतिः।
गोब्राह्मणनृपादीनामाशीर्वादादि गीयते ॥ ९ ॥
नाट्यान्ते सूत्रधारोऽसौ रूपकेषु निबध्यते।
गुरुपूर्व्वक्रमं वंशप्रशंसा पौरुषं कवेः ॥ १० ॥

सम्बन्धार्थौ च काव्यस्य पञ्चैतानेष निर्दिशेत् ।
नटो विदूषको वापि पारिपार्श्विक एव वा ॥ ११ ॥
सङ्गिताः सूत्रधारेण संलापं यत्र कुर्वते ।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ॥ १२ ॥
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि सा ।
प्रहसनकं कथोद्घातः प्रयोगातिशयस्तथा ॥ १३ ॥
आमुखस्य त्रयो भेदा बीजांशेषूपजायते ।
कालं प्रहसनमाश्रित्य सूत्रधृग्यत्र वर्णयेत् ॥ १४ ॥
तदाश्रयस्य पात्रस्य प्रवेशस्तत् प्रहसनकं ।
सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा ॥ १५ ॥
गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स उच्यते ।
प्रयोगेषु प्रयोगन्तु सूत्रधृग्यत्र वर्णयेत् ॥ १६ ॥
ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः ।
शरीरं नाटकादीनामितिवृत्तं प्रचक्षते ॥ १७ ॥
सिद्धसुत्प्रेक्षितश्चेति तस्य भेदावुभौ स्मृतौ ।
सिद्धमागमदृष्टञ्च सृष्टसुत्प्रेक्षितं कवेः ॥ १८ ॥
बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात् ॥ १९ ॥
प्रारम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च ।
नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥ २० ॥
मुखं प्रतिमुखं गर्भो विमर्षश्च तथैव च ।
तथा निर्वहणञ्चेति क्रमात् पञ्चैव सन्धयः ॥ २१ ॥
अल्पमात्रं समुद्दिष्टं बहुधा यत् प्रसर्पति ।

फलावसानं यच्चैव बीजं तदभिधीयते ॥ २२ ॥
यच्च बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
काव्ये शरीरानुगतं तन्मुखं परिकीर्त्तितं ॥ २३ ॥
दृष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः ।
रागप्राप्तिः प्रयोगस्य गुह्यानाञ्चैव गूहनम् ॥ २४ ॥
आश्चर्य्यवदभिख्यातं प्रकाशानां प्रकाशनम् ।
अङ्गहीनं नरो यद्वन्न श्रेष्ठं काव्यमेव च ॥ २५ ॥
देशकालौ विना किञ्चिन्नेतिवृत्तं प्रवर्त्तते ।
अतस्तयोरुपादाननियमात् पदमुच्यते ॥ २६ ॥
देशेषु भारतं वर्षं काले कृतयुगत्रयं ।
नर्त्तं ताभ्यां प्राणभृतां सुखदुःखोदयः क्वचित् ।
सर्गे सर्गादिवार्त्ता च प्रसज्जन्तो न दुष्यति ॥ २७ ॥

इत्याग्नेये महापुराणे अलङ्कारे नाटकनिरूपणं नाम सप्तत्रिंशदधिकत्रिशततमोऽध्यायः ।

अथाष्टत्रिंशदधिकत्रिशततमोऽध्यायः ।

शृङ्गारादिरसनिरूपणम् ।

अग्निरुवाच । अक्षरं परमं ब्रह्म सनातनमजं विभुं ।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ॥ १ ॥
आनन्दः सहजस्तस्य व्यज्यते स कदाचन ।
व्यक्तिः सा तस्य चैतन्यचमत्काररसाश्रया ॥ २ ॥

आद्यस्य विकारो यः सोऽहङ्कार इति स्मृतः ।
ततोऽभिमानस्त्वेदं समाप्तं भुवनत्रयं ॥ ३ ॥
अभिमानात्मृतिः सा च परिपोषमुपेयुषी ।
व्यभिचार्यादिसामान्यात् शृङ्गार इति गीयते ॥ ४ ॥
तद्भेदाः कामभितरे हास्याद्या अप्यनेकशः ।
स्वस्वस्थादिविशेषोत्थपरिपोषस्वलक्षणाः ॥ ५ ॥
सत्त्वादिगुणसन्तानाज्जायन्ते परमात्मनः ।
रागात्मवति शृङ्गारो रौद्रस्तैक्ष्ण्यात् प्रजायते ॥ ६ ॥
वीरोऽवष्टम्भजः सङ्कोचभूर्व्यीभत्स इष्यते ।
शृङ्गाराज्जायते हासो रौद्रात्तु करुणो रसः ॥ ७ ॥
वीराच्चाद्भुतनिष्पत्तिः स्याद्बीभत्साद्भयानकः ।
शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ॥ ८ ॥
बीभत्साद्भुतसंज्ञाख्याः स्वभावाच्चतुरो रसाः ।
लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा ॥ ९ ॥
अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथा वै रोचते विश्वं तथेदं परिवर्त्तते ॥ १० ॥
शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स चेत् कविर्वीतरागो नीरसं व्यक्तमेव तत् ॥ ११ ॥
न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति ॥ १२ ॥
स्थायिनोऽष्टौ रतिमुखाः स्मृत्याद्या व्यभिचारिणः ।
मनोऽनुकूलेऽनुभवः सुखस्य रतिरिष्यते ॥ १३ ॥
हर्षादिभिश्च मनसो विकाशो हास उच्यते ।

चित्तादिदर्शनाच्चेतोवैक्लव्यं स्रुवते भयम् ॥ १४ ॥
जुगुप्सा च पदार्थानां निन्द्या दौर्भाग्यवाहिनां ।
विस्मयोऽतिशयेनार्थदर्शनाच्चित्तविस्तृतिः ॥ १५ ॥
अष्टौ स्तम्भादयः सत्त्वाद्रजसस्तमसः परम् ।
स्तम्भश्चेष्टाप्रतीघातो भयरागाद्युपाहितः(१) ॥ १६ ॥
अमरागाद्युपेतान्तःक्षोभजन्म वपुर्ज्वलं ।
स्वेदो हर्षादिभिर्हेतोच्छ्वासोऽन्तःपुलकोद्गमः ॥ १७ ॥
हर्षादिजन्मवाक्मङ्गः स्वरभेदो भयादिभिः ।
मनोवैक्लव्यमिच्छन्ति शोकमिष्टक्षयादिभिः ॥ १८ ॥
क्रोधस्तैक्ष्ण्यप्रबोधश्च प्रतिकूलानुकारिणि ।
पुरुषार्थसमारम्भार्थी यः स उत्साह उच्यते ॥ १९ ॥
चित्तक्षोभभवोत्तम्भो वेपथुः परिकीर्त्तितः ।
वैवर्ण्यं च विषादादिजन्मा कान्तिविपर्ययः ॥ २० ॥
दुःखानन्दादिजन्यत्वजलमस्रु च विश्रुतम् ।
इन्द्रियाणामस्तमयः प्रलयो लङ्घनादिभिः ॥ २१ ॥
वैराग्यादिर्भवेत्खेदो निर्वेद इति कथ्यते ।
मनःपीड़ादिजन्मा च सदा ग्लानिः शरीरगा ॥ २२ ॥
अङ्गानिष्टागमोत्प्रेक्षा स्यादसूया च मत्सरः ।
मदिराद्युपयोगोत्थं मनःसंमोहनं मदः ॥ २३ ॥
क्रियातिशयजन्मान्तःशरीरोत्थक्लमः श्रमः ।
शृङ्गारादिक्रियारूढे चित्तस्यालस्यमुच्यते ॥ २४ ॥

---

१ भयरागाद्युपस्थित इति च० ।

दैन्यं सत्त्वादपभ्रंशश्चिन्तार्थपरिभावनं ।
धृतिकर्त्तव्यतोपायादर्शनं मोह उच्यते ॥ २५ ॥
स्मृतिः स्यादनुभूतस्य वस्तुनः प्रतिविम्बनं ।
मतिरर्थपरिच्छेदस्तत्त्वज्ञानोपनायितः ॥ २६ ॥
व्रीडानुरागादिभवः सङ्कोचः कोपि चेतसः ।
भवेच्चपलताऽस्थैर्य्यं हर्षश्चित्तप्रसन्नता ॥ २७ ॥
आवेगश्च प्रतीकारः शयो वैधुर्य्यमात्मनः ।
कर्त्तव्ये प्रतिभाभ्रंशो जड़तेत्यभिधीयते ॥ २८ ॥
इष्टप्राप्तेरुपचितः सम्यदाभ्युदयो धृतिः ।
गर्व्वः परेष्ववज्ञानमात्मन्युत्कर्षभावना ॥ २९ ॥
भवेद्विषादो दैवादेर्विघातोऽभीष्टवस्तुनि ।
औत्सुक्यमीप्सितप्राप्तेर्वाञ्छया तरला स्थितिः ३० ॥
चित्तेन्द्रियाणां स्तैमित्यमपस्मारोऽचला स्थितिः ।
युद्धे बाधादिभीत्यासो वीप्सा चित्तचमत्कृतिः ॥ ३१ ॥
क्रोधस्याप्रशमोऽमर्षः प्रबोधश्चेतनोदयः ।
अवहित्थं भवेदङ्गैरिङ्गिताकारगोचरा ॥ ३२ ॥
रोषतो गुरुवाग्दण्डपारुष्यं विदुरुग्रतां ।
ऊहो वितर्कः स्याद्वाधिर्मनोवपुरवग्रहः ॥ ३३ ॥
अनिष्टप्रलापादिरुन्मादो मदनादिभिः ।
तत्त्वज्ञानादिना चेतःकषायो परमः शमः ॥ ३४ ॥
कविभिर्योजनीया वै भावाः काव्यादिके रसाः ।
विभाव्यन्ते हि रत्यादिर्येन विभाव्यते ॥ ३५ ॥
विभावो नाम स द्वेधालम्बनोद्दीपनात्मकः ।

अथोनचत्वारिंशदधिकत्रिशततमोऽध्यायः।

रीतिनिरूपणं।

अग्निरुवाच। वाग्विद्यासम्मतिज्ञाने रीतिः सापि चतुर्विधा।
पाञ्चाली गौड़देशीया वैदर्भी लाटजा तथा ॥ १ ॥
उपचारयुता मृद्वी पाञ्चाली ह्रस्वविग्रहा।
अनवस्थितसन्दर्भा गौडीया दीर्घविग्रहा ॥ २ ॥
उपचारैर्न बहुभिरुपचारैर्विवर्जिता।
नातिकोमलसन्दर्भा वैदर्भी मुक्तविग्रहा ॥ ३ ॥
लाटीया स्फुटसन्दर्भा नातिविस्फुरविग्रहा।
परित्यक्तापि भूयोभिरुपचारैरुदाहृता ॥ ४ ॥
क्रियास्वविषमा वृत्तिर्भारत्यारभटी तथा।
कौशिकी सात्वती चेति सा चतुर्धा प्रतिष्ठिता ॥ ५ ॥
वाक्प्रधाना नरप्राया स्त्रीयुक्ता प्राकृतोक्तिता।
भरतेन प्रणीतत्वाद् भारती रीतिरुच्यते ॥ ६ ॥
चत्वार्यङ्गानि भारत्या वीथी प्रहसनन्तथा।
प्रस्तावना नाटकादेर्व्वीथ्यङ्गान्याथ त्रयोदश ॥ ७ ॥
उद्घातकं तथैव स्यात्कथितं व्याहितीयकम्।
असत्प्रलापो वाक्त्ये गौ(?) नालिका विपणन्तथा ॥ ८ ॥
व्याहारश्चिमतश्चैव(२) छलावस्कन्दिते तथा।

---

१ वाग्य रीति क०. अ०, ट० च।

२ व्याहारश्चिमतश्चेति क० ।

गच्छोऽथ वृद्धवर्षैव त्रयोदश्यमवाचितम् ॥ ८ ॥
तापसादेः प्रहसनं परिहासपरं वचः
मायेन्द्रजालयुद्धादिवटुलारभटी स्मृता ।
सङ्क्षिप्तकारपातौ च(१) वस्तूत्थापनमेव च ॥ १० ॥

इत्याग्नेये महापुराणे अलङ्कारे रीतिनिरूपणं नामो-
नचत्वारिंशदधिकद्विशततमोऽध्यायः ।

अथ चत्वारिंशदधिकद्विशततमोऽध्यायः ।

नृत्यादावङ्गकर्मनिरूपणं ।

अग्निरुवाच । चेष्टाविशेषमप्यङ्गप्रत्यङ्गे कर्म चानयोः ।
शरीरारम्भमिच्छन्ति प्रायः पूर्वोऽवलाश्रयः ॥ १ ॥
लीला विलासो विच्छित्तिर्विभ्रमं किलकिञ्चितं ।
मोट्टायितं कुट्टमितं विब्बोको ललितन्तथा ॥ २ ॥
विकृतं क्रीड़ितं केलिरिति हादशधैव सः ।
लीलेष्टजनचेष्टानुकरणं संहृतत्रये ॥ ३ ॥
विशेषान् दर्शयन् किञ्चिद्विलासः सन्निरिष्यते ।
हसितक्रन्दितादीनां मधुरः किलकिञ्चितं ॥४॥
विकारः कोपि विब्बोको ललितं सौकुमार्यतः ।
शिरः पाणिकरः पार्श्वभ्रुटिरङ्घ्रिरिति क्रमात् ॥ ५ ॥
अङ्गानि भ्रूलतादीनि प्रत्यङ्गान्यभिजानते ।

---

१ सङ्क्षिप्तकारपातौ चेति अ० ।

अङ्गप्रत्यङ्गयोः कर्म प्रयत्नजनितं विना ॥ ६ ॥
न प्रयोगः क्वचिन्मुख्यस्तिरश्चीनश्च तत् क्वचित् ।
आकम्पितं कम्पितश्च(१) धूतं विधूतमेव च ॥ ७ ॥
परिवाहितमाधूतमवधूतमथाचितं ।
निकुञ्चितं परावृत्तमुत्क्षिप्तश्चाप्यधोगतम् ॥ ८ ॥
ललितस्येति विज्ञेयं त्रयोदशविधं शिरः ।
भ्रूकर्म समधा ज्ञेयं पातनं भ्रूकुटीमुखं ॥ ९ ॥
दृष्टिस्त्रिधा रसस्थायिसञ्चारिप्रतिबन्धना ।
षट्त्रिंशद्भेदविधुरा रसजा तच्च चाष्टधा ॥ १० ॥
नवधा तारकाकर्म भ्रमणस्खलनादिकं ।
षोढा च नासिका ज्ञेया निश्वासो नवधा मतः ॥ ११ ॥
षोढौष्ठकर्म्मकं पापं समधा चिबुकक्रिया ।
कम्पादिमुखं षोढा ग्रीवा नवविधा स्मृता ॥ १२ ॥
असंयुतः संयुतश्च भूम्ना हस्तः प्रमुच्यते ।
पताकस्त्रिपताकश्च तथा वै कर्त्तरीमुखः ॥ १३ ॥
अर्द्धचन्द्रोत्करालश्च शुकतुण्डस्तथैव च ।
मुष्टिश्च शिखरश्चैव कपित्थः खेटकामुखः ॥ १४ ॥
सूच्यास्यः पद्मकोषो हि शिराः सन्मृगशीर्षकाः ।
कांमूलकालपद्मौ(२)* च चतुरश्चमरौ तथा ॥ १५ ॥
हंसास्यहंसपक्षौ च सन्दंशमुकुलौ तथा ।

---

१ आकम्पितं कम्पितश्चेति च० ।

२ काङ्कूलकालपद्मावित्यपि च० ।

* कांमूलकालपद्मौ काङ्कूलकालपद्मौ इत्यपाठद्वयं न समीचीनम् ।

उर्णनाभस्ताम्रचूडश्चतुर्विंशतिरित्यमी ॥ १६ ॥
असंयुतकराः प्रोक्ताः संयुतास्तु त्रयोदश।
अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा ॥ १७ ॥
कटको वर्द्धमानश्चाप्यसङ्गो निषधस्तथा।
दोलः पुष्पपुटश्चैव तथा मकर एव च ॥ १८ ॥
गजदन्तो वहिस्तम्भो वर्द्धमानोऽपरे कराः।
उरः पञ्चविधं स्यात्तु आभुग्ननर्त्तनादिकम् ॥ १९ ॥
उदरन्दुरतिस्थानं खण्डं पूर्णमिति त्रिधा।
पार्श्वयोः पञ्चकर्माणि जङ्घाकर्म्म च पञ्चधा।
अनेकधा पादकर्म्म नृत्यादौ नाटके स्मृतम्। २० ॥

इत्याग्नेये महापुराणे अलङ्कारे नृत्यादावङ्गकर्म्मनिरूपणं नाम चत्वारिंशदधिकत्रिशततमोऽध्यायः।

अथैकचत्वारिंशदधिकत्रिशततमोऽध्यायः।

अभिनयादिनिरूपणं।

अग्निरुवाच। आभिमुख्यनयन्नर्थान्विज्ञेयोऽभिनयो बुधैः।
चतुर्धा सम्भवः सत्त्वाङ्गाहरणाश्रयः ॥ १ ॥
स्तम्भादिः सात्त्विको वागारम्भो वाचिक आङ्गिकः।
शरीरारम्भ आहार्य्यो बुद्ध्यारम्भप्रकल्पनः ॥ २ ॥
रसादिविनियोगोऽथ कथ्यते ऽभिमानतः।
तमन्तरेण सर्व्वेषामपार्थैव स्वतन्त्रता ॥ ३ ॥
सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधः स्मृतः।

प्रच्छन्नस्य प्रकाशस्य तावपि द्विविधौ पुनः ॥ ४ ॥
विप्रलम्भाभिधानो यः शृङ्गारः स चतुर्विधः ।
पूर्वानुरागमानाख्यः प्रवासकरुणात्मकः । ५ ॥
एतेभ्योऽन्यतरं जायमानमभोगलक्षणम् ।
विवर्त्तते चतुर्ष्वेव न च प्रागतिवर्त्तते ॥ ६ ॥
स्त्रीपुंसयोस्तदुदयस्तस्य निर्विर्त्तिका रतिः ।
निखिलाः सात्त्विकास्तत्र वैवर्ण्यप्रलयौ विना । ७ ॥
धर्म्मार्थकाममोक्षैश्च शृङ्गार उपचीयते ।
आलम्बनविशेषैश्च तद्विशेषैरितरैः । ८ ॥
शृङ्गारं द्विविधं विद्याद्वाङ्नेपथ्यक्रियात्मकम ।
हासस्य तु त्रिधोऽलक्ष्यदन्तः स्मित इतीरितः ॥ ९ ॥
किञ्चिल्लक्षितदन्ताग्रं हसितं फुल्ललोचनम् ।
विहसितं सस्वनं स्याज्जिह्मोपहसितन्तु तत् ॥ १० ॥
सशब्दं पापहसितमशब्दमतिहासितं ।
यस्यासौ करुणो नाम स रसस्त्रिविधो भवेत् ॥ ११ ॥
धर्म्मोपघातजश्चित्तविलापजनितस्तथा ।
शोकः शोकाद्भवेत् स्थायी कः स्थायी पूर्व्वजो मतः ॥१२॥
अङ्गनेपथ्यवाक्यैश्च रौद्रोऽपि त्रिविधो रसः ।
तस्य निर्वर्त्तकः क्रोधः स्वेदो रोमाञ्चवपथुः ॥ १३ ॥
दानवीरो धर्मवीरो युद्धवीर इति त्रयम् ।
वीरस्तस्य च निष्पत्तिहेतुकृत्माह इष्यते ॥ १४ ॥
आरम्भेषु भवेद्यत्र वीरमेवानुवर्त्तते ।

भयानको नाम रसस्तस्य विवर्त्तकं भयं ॥ १५ ॥
उद्वेजनः क्षोभणश्च बीभत्सो द्विविधः स्मृतः ।
उद्वेजनः स्यात् मृत्याद्यैः क्षोभणो रुधिरादिभिः ॥ १६ ॥
जुगुप्सारम्भिका तस्य सात्त्विकांशो निवर्त्तते ।
काव्यशोभाकरान् धर्म्मानलङ्कारान् प्रचक्षते ॥ १७ ॥
अलङ्करिष्णवस्ते च शब्दमर्थमुभौ विधा ।
ये व्युत्पत्त्यादिना शब्दमलङ्कर्त्तुमिह क्षमाः ॥ १८ ॥
शब्दालङ्कारमाचक्षते काव्यमीमांसका विदः ।
छाया मुद्रा तथोक्तिश्च युक्तिर्गुम्फनया सह ॥ १९ ॥
वाक्कोवाक्यमनुप्रासचित्रं दुष्करमेव च ।
ज्ञेया नवालङ्कृतयः शब्दानामित्यसङ्करात् ॥ २० ॥
तत्राद्योक्तिरनुक्तिश्छाया सापि चतुर्व्विधा ।
लोकच्छेकाभंकोक्तीनामेकोक्तिरनुकारतः ॥ २१ ॥
आभाषकोक्तिर्लोकोक्तिः सर्व्वसामान्य एव ताः ।
यामुधावति लोकोक्तिश्छायामिच्छन्ति तां बुधाः ॥ २२ ॥
छेका विदग्धा वैदग्ध्यं कलासु कुशला मतिः ।
तामुल्लिखन्ती छेकोक्तिश्छाया कविभिरिष्यते ॥ २३ ॥
अव्युत्पन्नोक्तिरखिलैरभंकोक्तिरुपलक्ष्यते ।
तेनाभंकोक्तिश्छाया तत्प्रोक्तिमनुकुर्व्वती ॥ २४ ॥
विदुषाचरमश्लीलं वचो मत्तस्य तादृशः ।
या सा भवति मत्तोक्तिश्छायोक्ताप्यतिशोभते ॥ २५ ॥
अभिप्रायविशेषेण कविप्रौढिं विदुष्वती ।

सुत्प्रदायिनीति सा मुद्रा सैव शय्यापि नो मते ॥ २६ ॥
उक्तिः सा कथ्यते यस्यामर्थकोऽप्युपपत्तिमान् ।
लोकयात्रार्थविधिना धिनोति हृदयं सतां ॥ २७ ॥
उभौ विधिनिषेधौ च नियमानियमावपि ।
विकल्पपरिसङ्ख्ये च तदीयाः षड्विधोक्तयः ॥ २८ ॥
अयुक्तयोरिव मिथो वाच्यवाचकयोर्द्वयोः ।
योजनायै कल्प्यमाना युक्तिरुक्ता मनीषिभिः ॥ २९ ॥
पदञ्चैव पदार्थश्च वाक्यं वाक्यार्थमेव च ।
विषयोऽस्याः प्रकरणं प्रपञ्चयेति षड्विधः ॥ ३० ॥
गुम्फना रचनाचर्य्या शब्दार्थक्रमगोचरा ।
शब्दानुकारादर्थानुपूर्व्वार्थेयं क्रमाभिधा ॥ ३१ ॥
उक्तिप्रत्युक्तिमद्वाक्यं वाक्योवाक्यं द्विधैव तत् ।
ऋजुवक्रोक्तिभेदेन तत्राद्यं सहजं वचः ॥ ३२ ॥
सा पूर्व्वप्रश्निका प्रश्नपूर्विकेति द्विधा भवेत् ।
वक्रोक्तिस्तु भवेद्भङ्ग्या काकुस्तेन कृता द्विधा ॥ ३३ ॥

इत्याग्नेये महापुराणे अलङ्कारे अभिनयादिनिरूपणं नामैक-
चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अथ द्विचत्वारिंशदधिकत्रिशततमोऽध्यायः।

———000@000———

शब्दालङ्काराः।

अग्निरुवाच। स्यादावृत्तिरनुप्रासो वर्णानां पदवाक्ययोः।
एकवर्णोऽनेकवर्णावृत्तेर्वर्णगुणो द्विधा ॥ १ ॥
एकवर्णगतावृत्तेर्ज्ञायन्ते पञ्च वृत्तयः।
मधुरा ललिता प्रौढा भद्रा परुषया सह ॥ २ ॥
मधुरायाश्च वर्गान्त्यादधो वर्ग्या रणौ खनौ (१)।
झस्वरेणान्तरितौ संयुक्तत्वं नकारयोः ॥ ३ ॥
न कार्य्या वर्ग्यवर्णानामावृत्तिः पञ्चमाधिका।
महाप्राणोष्मसंयोगप्रविमुक्तलघूत्तरौ(२) ॥ ४ ॥
ललिता बलभूयिष्ठा(३) प्रौढा या पणवर्गजा।
अर्द्धं रेफेण युज्यन्ते नटवर्गीनपञ्चमाः ॥ ५ ॥
भद्रायां परिनिष्ठाः स्युः परुषा साऽभिधीयते।
भवन्ति यस्यामूष्माणः संयुक्तास्तत्तदक्षरैः ॥ ६ ॥
अकारवर्ज्यमावृत्तिः स्वराणामतिभूयसी।
अनुस्वारविसर्गौ च पारुष्याय निरन्तरौ ॥ ७ ॥
अघसा रेफसंयुक्तायाकारस्यापि भूयसा।

---

१ रणौ खनाविति अ०।

२ महाप्राणोष्मसंयोगादविमुक्तलघूत्तराविति ड०।

३ ललिता बलभूयिष्ठेति च०। ललिता बलभूयिष्ठेति ड०

अन्तस्थाभिश्चमाभ्याञ्च हः पारुष्याय संयुतः ॥ ८ ॥
अन्यथापि गुरुर्वर्णः संयुक्ते परिपन्थिनि ।
पारुष्यादिमांस्तत्र पूजिता न तु पञ्चमी ॥ ९ ॥
क्षेपे शब्दानुकारे च परुषापि प्रयुज्यते ।
कर्णाटी कौन्तली कौन्ती कौङ्कणी वामनासिका(१)॥१०॥
द्राविणी माधवी पञ्चवर्णान्तस्थोष्मभिः क्रमात् ।
अनेकवर्णावृत्तिर्या भिन्नार्थप्रतिपादिका ॥ ११ ॥
यमकं साव्यपेतञ्च व्यपेतञ्चेति तद्विधा ।
आनन्तर्याद्व्यपेतं व्यपेतं व्यवधानतः ॥ १२ ॥
द्वैविध्येनानयोः स्थानपादभेदाच्चतुर्विधम् ।
आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः ॥ १३ ॥
सप्तधा सप्तपूर्वेण (२) चेत् पादेनोत्तरोत्तरः ।
एकद्वित्रिपदारम्भस्तुल्यः षोढा तदापरं ॥ १४ ॥
तृतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् ।
पादान्तयमकञ्चैव काञ्चीयमकमेव च ॥ १५ ॥
संसर्गयमकञ्चैव(३) विक्रान्तयमकन्तथा ।
पादादियमकञ्चैव तथाम्रेडितमेव च ॥ १६ ॥
चतुर्व्यवसितञ्चैव मालायमकमेव च ।
दशधा यमकं श्रेष्ठं तद्भेदा बहवोऽपरे ॥ १७ ॥
स्वतन्त्रस्यान्यतन्त्रस्य पदस्यावर्त्तना द्विधा ।

---

१ वानवासिकेति ख०, ट० च । वनवासिकेति अ० ।
२ पूर्णपूर्वेणेति अ०, ब०, ट० च ।
३ सन्दंशयमकञ्चेति ख० ।

भिन्नार्थोजनपदस्यावृत्तिं मनुजा विदुः ॥ १८ ॥
द्वयोरावृत्तपदयोः समस्ता स्यात्समासतः ।
असमासान्तयोर्व्यस्ता पादे त्वेकत्र विग्रहात् ॥ १९ ॥
वाक्यस्यावृत्तिरप्येवं यथासम्भवमिष्यते ।
अलङ्कारादयनुप्रासो लघुमध्येवमर्हणात् (१) * ॥ २० ॥
यया कयाचिदावृत्त्या यत् समानमनुभूयते ।
तदुपादिपदासत्तिः सानुप्रासा रसावहा ॥ २१ ॥
गोष्ठ्यां कुतूहलाध्यायी वाग्बन्धश्चित्रमुच्यते ।
प्रश्नः प्रहेलिका गुप्तं च्युतदत्ते तथोभयम् ॥ २२ ॥
समस्या सप्त तद्भेदा नानार्थस्यानुयोगतः ।
यत्र प्रदीयते तुल्यवर्णविन्यासमुत्तरं ॥ २३ ॥
स प्रश्नः स्यादेकपृष्टद्विपृष्टीत्तरभेदतः ।
द्विधैकपृष्टो द्विविधः समस्तो व्यस्त एव च ॥ २४ ॥
द्वयोरप्यर्थयोर्गुप्तमानशब्दा प्रहेलिका ।
सा द्विधार्थी च शाब्दी च तत्रार्थी चार्थबोधतः ॥ २५ ॥
शब्दावबोधतः शाब्दी प्राहुः धीठा प्रहेलिकां ।
यस्मिन् गुप्तेऽपि वाक्यार्थे भाव्यर्थोऽपारमार्थिकः ॥ २६ ॥
तदङ्गविहिताकाङ्क्षवस्तुगुप्तं गूढमग्रदः ।
यथार्थान्तरनिर्भासो वाक्यार्थश्चवनादिभिः ॥ २७ ॥
तदङ्गविहिताकाङ्क्षवस्तुच्युतं स्याच्चतुर्विधम् ।

---

१ लघुमध्येवमर्घादिति ङ० । लघुमध्येव वर्घादिति अ० ।

* लघुमध्येवमर्घात्, लघुमध्येवमर्घात्, लघुमध्येव वर्घात् एतत् पाठत्रयं न समीचीनं प्रतिभाति ।

स्वरव्यञ्जनविन्दूनां विसर्गस्य च विच्युतेः ॥ २८ ॥
दत्तेपि यत्र वाक्याङ्गे द्वितीयोर्थः प्रतीयते ।
दत्तलदादुस्तद्भेदाः स्वरार्थैः पूर्ववन्मताः ॥ २९ ॥
अपनीताक्षरस्थाने न्यस्ते वर्णान्तरेऽपि च ।
भासतेऽर्थान्तरं यत्र च्युतदत्तं तदुच्यते ॥ ३० ॥
सुश्लिष्टपद्यमेकं यन्नानाश्लोकांगनिर्मितम् ।
सा समस्या परस्यात्मपरयोः कृतिसङ्करात् ॥ ३१ ॥
दुःखेन कृतमत्यर्थं कविसामर्थ्यसूचकम् ।
दुष्करं नीरसत्वेपि विदग्धानां महोत्सवः ॥ ३२ ॥
नियमाच्च विदर्भाच्च बन्धाच्च भवति त्रिधा ।
कवेः प्रतिज्ञा निर्माणरम्यस्य नियमः स्मृतः ॥ ३३ ॥
स्थानेनापि स्वरेणापि व्यञ्जनेनापि स त्रिधा ।
विकल्पः प्रातिलोम्यानुलोम्यादेवाभिधीयते ॥ ३४ ॥
प्रातिलोम्यानुलोम्यञ्च शब्देनार्थेन जायते ।
अनेकधातुस्तवर्णविन्यासैः शिल्पकल्पना ॥ ३५ ॥
तत्तत्प्रसिद्धवस्तूनां बन्ध इत्यभिधीयते ।
गोमूत्रिकार्द्धभ्रमणे सर्व्वतोभद्रमम्बुजम् ॥ ३६ ॥
चक्रचक्राब्जकं दण्डो मुरजाश्वेति चाष्टधा ।
प्रत्यर्धं प्रतिपादं स्यादेकान्तरसमाक्षरा ॥ ३७ ॥
द्विधा गोमूत्रिकां पूर्व्वामाहुरग्रपदां परे ।
अन्त्याङ्गोमूत्रिकां धेनुं जालबन्धं(१) वदन्ति हि ॥ ३८ ॥
अर्द्धाभ्यामर्धपादैश्च कुर्य्याद्विन्यासमेतयोः ।

---

१ जालबन्धमिति ब०, ख० च ।

न्यस्तानामिह वर्णानामधोधः क्रमभागिनां ॥ ३९ ॥
अधोधःस्थितवर्णानां यावत्तूर्य्यपदन्नयेत् ।
तुर्य्यपादान्नयेदूर्द्धं पादार्द्धं प्रातिलोम्यतः ॥ ४० ॥
तदेव सर्व्वतोभद्रं त्रिविधं सरसीरुहं ।
चतुष्कं ततो विघ्नं चतुष्कं उभे अपि ॥ ४१ ॥
अथ प्रथमपादस्य मूर्द्धन्यक्षिपदाक्षरं ।
सर्व्वेषामेव पादानामन्ते तदुपजायते ॥ ४२ ॥
प्राक्पदस्यान्तिमं प्रत्यक् पादादौ प्रातिलोम्यतः ।
अन्त्यपादान्तिमञ्चाद्यपादादावक्षरद्वयं ॥ ४३ ॥
चतुश्छदे भवेदष्टच्छदे वर्णत्रयं पुनः ।
स्यात् षोड़शच्छदे त्वेकान्तरञ्चैकमक्षरं ॥ ४४ ॥
कर्णिकां तोलयेदूर्द्धं पद्माकाराक्षरावलिं ।
प्रवेशयेत् कर्णिकायाञ्चतुष्कन्नसरोरुहे ॥ ४५ ॥
कर्णिकायां लिखेदेकं द्वे द्वे दिक्षु विदिक्षु च ।
प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टच्छदेऽम्बुजे ॥ ४६ ॥
विश्लग्विषमवर्णानां तावत् पद्मावलीजुषां ।
मध्ये समाक्षरन्यासः सरोजे षोड़शच्छदे ॥ ४७ ॥
द्विधा चक्रं चतुरं षड़रन्तत्र चादिमं ।
पूर्व्वार्द्धे सदृशा वर्णाः पादप्रथमपञ्चमाः ४८ ॥
अयुजोऽयुजयैव तुर्य्यावष्टमावपि ॥ ।
तस्योपपादप्राक्प्रत्यग्दरेषु च यथाक्रमं ॥ ४९ ॥
स्यात्पादार्द्धचतुष्कन्तु नाभौ तस्याद्यमक्षरं ।
पश्चिमारावधि न्यसेन्मो शेषे पद्मेऽम्बुजे ॥ ५० ॥

द्वतीयं तुर्य्यपादान्ते प्रथमौ सदृशावुभौ ।
वर्णौ पादत्रयस्यापि दशमः सदृशो यदि ॥ ५१ ॥
प्रथमे चरमे तस्य षड्वर्णाः पश्चिमे यदि ।
भवन्ति ह्यन्तरं तर्हि द्वद्वच्चक्रमुदाहृतं ॥ ५२ ॥
सम्मुखारेद्वये पादमेकैकं क्रमशो लिखेत् ।
नाभौ तु वर्णं दशमं नेमौ तुर्य्यपदत्रयेत् ॥ ५३ ॥
श्लोकस्याद्यन्तदशमाः समा आद्यन्तिमौ युजोः ।
आदौ वर्णः समौ तुर्य्यपञ्चमावाद्यतुर्य्ययोः ॥ ५४ ॥
द्वितीयप्रातिलोम्येन द्वतीयं जायते यदि ।
पदं विदध्यात् पद्मस्य दण्डयक्काङ्कं कृतेः ॥ ५५ ॥
द्वितीयौ प्राग्दले तुल्यौ सप्तमौ च तथापरौ ।
सदृशावुत्तरदलौ द्वितीयाभ्यामथार्द्धयोः ॥ ५६ ॥
द्वितीयषष्ठाः सदृशास्तुर्य्यपञ्चमावपि ।
आद्यन्तपादयोस्तुल्यौ परार्द्धसप्तमावपि ॥ ५७ ॥
समौ तुर्य्यं पञ्चमन्तु क्रमेण विनियोजयेत् ।
तुर्य्यौ योज्यौ तु तद्वच्च दलान्ताः क्रमपादयोः ॥ ५८ ॥
अर्द्धयोरन्तिमाद्यौ तु मुरजे सदृशावुभौ ।
पादार्द्धपतितो वर्णः प्रातिलोम्यानुलोमतः ॥ ५९ ॥
अन्तिमं परिवर्त्तीयाद्यावत्तुर्य्यमिहादिमत् ।
पादात्तुर्य्यादयेवाद्यं नवमात् षोड़शादपि ॥ ६० ॥
अक्षरात् पुटके मध्ये मध्ये चरचतुष्टयम् ।
ज्ञात्वा कुर्य्याद्यथैतस्य मुरजाकारता भवेत् ॥ ६१ ॥
द्वितीयं चक्रमार्द्धेन विक्रीडितकसम्मदम् ।

गोमूत्रिका सर्ववृत्तैरन्ये बन्धास्त्वनुष्टुभा ॥ ६२ ॥
नामधेयं यदि न चेदमीषु कविकाव्ययोः ।
मित्रधेयाभितुष्यन्ति नामिनः खिद्यते तथा ॥ ६३ ॥
वाणवाणासनव्योमखड्गमुद्गरशक्तयः ।
द्विचतुर्थचिशृङ्गाटा दम्भोलिमुषलाङ्कुशाः ॥ ६४ ॥
पद्मं रथस्य नागस्य पुष्करिण्यसिपुत्रिका ।
एते बन्धास्तथा चान्ये एवं ज्ञेयाः स्वयं बुधैः ॥ ६५ ॥

इत्याग्नेये महापुराणे अलङ्कारे शब्दालङ्कारनिरूपणं नाम द्विचत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अथ त्रिचत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अर्थालङ्काराः ।

अग्निरुवाच । अलङ्करणमर्थानामर्थालङ्कार इष्यते ।
तं विना शब्दसौन्दर्य्यमपि नास्ति मनोहरम् ॥ १ ॥
अर्थालङ्काररहिता विधवेव(१) सरस्वती ।
स्वरूपमथ सादृश्यमुत्प्रेक्षातिशयावपि ॥ २ ॥
विभावना विरोधश्च हेतुश्च सममष्टधा ।
स्वभाव एव भावानां स्वरूपमभिधीयते ॥ ३ ॥
निजमागन्तुकश्चेति द्विविधं तदुदाहृतम् ।
सांसिद्धिकं निजं नैमित्तिकमागन्तुकं तथा ॥ ४ ॥

---

१ विधुरेवेति ब०, ड० च ।

साहश्यं धर्मसामान्यमुपमा रूपकं तथा ।
सहोक्त्यर्थान्तरन्यासाविति स्यात् चतुर्विधम् ॥ ५ ॥
उपमा नाम सा यस्यामुपमानोपमेययोः ।
सत्ता चान्तरसामान्ययोगित्वे पि विवक्षितं ॥ ६ ॥
किञ्चिदादाय सारूप्यं लोकयात्रा प्रवर्त्तते ।
समासेनासमासेन सा द्विधा प्रतियोगिनः ॥ ७ ॥
विग्रहादभिधानस्य ससमासाऽन्यथोत्तरा ।
उपमाद्योतकपदैनोपमेयपदेनच ॥ ८ ॥
ताभ्याञ्च विग्रहात्त्रेधा ससमासात्तिमात् त्रिधा ।
विशिष्यमाणा उपमा भवन्त्यष्टादश स्फुटाः ॥ ९ ॥
यत्र साधारणो धर्मः कथ्यते गम्यतेऽपि वा ।
ते धर्मवस्तुप्राधान्याद्धर्मवस्तूपमे उभे ॥ १० ॥
तुल्यमेवोपमीयेते यत्रान्योन्येन धर्मिणौ ।
परस्परोपमा सा स्यात् प्रसिद्धेरन्यथा तयोः ॥ ११ ॥
विपरीतोपमा सा स्याद्यद्यत्तेर्विषमोपमा ।
अन्यत्राप्यनुवृत्तेस्तु भवेदनियमोपमा ॥ १२ ॥
समुच्चयोपमातोऽन्यधर्म्मैवानुक्तधर्मकीर्त्तनात् ।
सहोर्धर्मस्य साम्येपि वैलक्षण्यं विवक्षितं ॥ १३ ॥
यदुच्यतेऽतिरिक्तत्वं व्यतिरेकोपमा तु सा ।
यत्रोपमा स्याद्दुभिः सदृशैः सा बहूपमा ॥ १४ ॥
धर्म्माः प्रत्युपमानत्वे दन्ये मालोपमेव सा ।
उपमानविकारेच तुल्यता विक्रियोपमा ॥ १५ ॥
वैलोक्यासम्भवि किमप्यारोप्य प्रतियोगिनि ।

कविनोपमीयते या प्रथते साद्भुतोपमा ॥ १६ ॥
प्रतियोगिनमारोप्य तद्भेदेन कीर्त्तनम् ।
उपमेयस्य सा मोहोपमाऽसौ भ्रान्तिमद्वचः ॥ १७ ॥
उभयोर्धर्म्मिणोस्तथ्यानिश्चयात् संशयोपमा ।
उपमेयस्य संशय्य निश्चयाद्विषयोपमा ॥ १८ ॥
वाक्यार्थेनैव वाक्यार्थोपमा स्यादुपमानतः ।
आत्मनोपमानादुपमा साधारण्यतिशायिनी ॥ १९ ॥
उपमेयं यदन्यस्य तदन्यस्योपमा मता ।
यद्युत्तरोत्तरं याति तदाऽसौ गगनोपमा (१) ॥ २० ॥
प्रशंसा चैव निन्दा च कथिता सदृशी तथा ।
किञ्चिच्च सदृशी ज्ञेया उपमा पञ्चधा पुनः ॥ २१ ॥
उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते ।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥ २२ ॥
उपमैव तिरोभूतभेदा रूपकमेव वा ।
सहोक्तिः सहभावेन कथनं तुल्यधर्म्मिणां ॥ २३ ॥
भवेदर्थान्तरन्यासः सादृश्येनोत्तरेण सः ।
अन्यथोपस्थिता हृत्तिर्येतनस्येतरस्य च ॥ २४ ॥
अन्यथा मन्यते यच्च तामुत्प्रेक्षां प्रचक्षते ।
लोकसीमानिबद्धस्य वस्तुधर्म्मस्य कीर्त्तनम् ॥ २५ ॥
भवेदतिशयो नाम सम्भवासम्भवाद्विधा ।
गुणजातिक्रियादीनां यच्च वैकल्यदर्शनं ॥ २६ ॥
विशेषदर्शनायैव सा विशेषोक्तिरुच्यते ।

---

१ यत्नोपमेति ङ० । गगनोपमेति क०, ङ० च ।

प्रसिद्धहेत्वाहत्या यत् किञ्चित् कारणान्तरम् ॥ २७ ॥
यच्च स्वाभाविकत्वं वा विभाव्यं सा विभावना ।
सङ्गतीकरणं युक्त्या यदसंगच्छमानयोः ॥ २८ ॥
विरोधपूर्वकत्वेन तद्विरोध इति स्मृतं ।
सिसाधयिषितार्थस्य हेतुर्भवति साधकः ॥ २९ ॥
कारको ज्ञापक इति द्विधा सोऽप्युपजायते ।
प्रवर्त्तते कारकाख्यः प्राक् पश्चात् कार्य्यजन्मनः ॥ ३० ॥
पूर्व्वशेष इति ख्यातस्तयोरेव विशेषयोः ।
कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् ॥ ३१ ॥
ज्ञापकाख्यस्य भेदोऽस्ति नदीपूरादिदर्शनात् ।
अविनाभावनियमो ह्यविनाभावदर्शनात् ॥ ३२ ॥

इत्याग्नेये महापुराणे अलङ्कारे अर्थालङ्कारनिरूपणं नाम चतुश्चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अथ चतुश्चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

शब्दार्थालङ्काराः ।

अग्निरुवाच । शब्दार्थयोरलङ्कारो द्वावलङ्कुरुते समं ।
एकत्र निहितो हारः स्तनं ग्रीवामिव स्त्रियाः ॥ १ ॥
प्रसादः कान्तिरौचित्यं संक्षेपो यावदर्थता ।
अभिव्यक्तिरिति व्यक्तं षड्भेदास्तस्य जायते ॥ २ ॥
प्रसादः परवस्त्वर्थद्रवीकरणकारणः ।
वाचो युक्तिर्द्विधा सा च प्रेमोक्तिश्रुतिभेदतः ॥ ३ ॥

प्रेमोक्तिस्तुतिपर्य्यायो प्रियोक्तिगुणकीर्त्तने ।
कान्तिः सर्व्वमनोरुच्यवाच्यवाचकसङ्गतिः ॥ ४ ॥
यथा वस्तु तथा रीतिर्यथा वृत्तिस्तथा रसः ।
ओजःक्षमदुसन्दर्भादौचित्यमुपजायते ॥ ५ ॥
संक्षेपो वाचकैरल्पैर्बहोरर्थस्य संग्रहः ।
अन्यूनाधिकता शब्दवस्तुनोर्यावदर्थता ॥ ६ ॥
प्रकटत्वमभिव्यक्तिः स्फुटिरास्फेप इत्यपि ।
तस्या भेदो स्फुटिस्तत्र शब्दं स्वार्थसमर्पणम् ॥ ७ ॥
भवेन्नैमित्तिकी पारिभाषिकी द्विविधैव सा ।
सङ्केतः परिभाषेति ततः स्यात् पारिभाषिकी ॥ ८ ॥
मुख्योपचारिकी चेति सा च सा च द्विधा द्विधा ।
स्वाभिधेयस्खलद्वृत्तिरमुख्यार्थस्य वाचकः ॥ ९ ॥
यया शब्दो निमित्तेन केनचिल्लोपचारिकी ।
सा च लाक्षणिकी गौणी लक्षणागुणयोगतः ॥ १० ॥
अभिधेयाविनाभूता प्रतीतिर्लक्षणोच्यते ।
अभिधेयेन सम्बन्धात्सामीप्यात्समवायतः ॥ ११ ॥
वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता ।
गौणीगुणानामानन्त्यादनन्ता तद्विवक्षया ॥ १२ ॥
अन्यधर्म्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते यत्र स समाधिरिह स्मृतः ॥ १३ ॥
श्रुतेरलभ्यमानोऽर्थो यस्माद्याति सचेतनः ।
स आक्षेपो ध्वनिः स्याच्च ध्वनिना व्यज्यते यतः ॥ १४ ॥
शब्देनार्थेन यत्रार्थः कृत्वा स्वयमुपार्जनम् ।

प्रतिषेध इवेष्टस्य यो विशेषोऽभिधित्सया ॥ १५ ॥
तमाक्षेपं ब्रुवन्त्यत्र स्तुतं स्तोत्रमिदं पुनः ।
अधिक्षारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः ॥ १६ ॥
यत्रोक्तं गम्यते नार्थस्तत्समानविशेषणं ।
सा समासोक्तिरुदिता सङ्क्षेपार्थतया बुधैः ॥ १७ ॥
अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थसूचनम् ।
पर्य्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
एषामेकांतमस्येव समाख्या ध्वनिरित्यतः । १८ ॥

इत्याग्नेये महापुराणे अलङ्कारे शब्दार्थालङ्कारनिरूपणं नाम चतुश्चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अथ पञ्चचत्वारिंशदधिकत्रिशततमोऽध्यायः ।

काव्यगुणविवेकः ।

अग्निरुवाच । अलंकृतमपि प्रौढ्यै न काव्यं निर्गुणं भवेत् ।
वपुष्यलङ्किते स्त्रीणां हारो भारायते परं ॥ १ ॥
न च वाच्यं गुणो दोषोऽभाव एव भविष्यति ।
गुणाः श्लेषादयो दोषा गूढ़ार्थाद्याः पृथक् कृताः ॥ २ ॥
यः काव्ये महतीं छायामनुगृह्णात्यसौ गुणः ।
सञ्चवत्येष सामान्यो वैशेषिक इति द्विधा ॥ ३ ॥
सर्व्वसाधारणीभूतः सामान्य इति मन्यते ।
शब्दमर्थमुभौ प्रायः सामान्यो भवति त्रिधा ॥ ४ ॥
शब्दमाश्रयते काव्यं शरीरं यः स तद्गुणः ।

श्लेषो लालित्यगाम्भीर्य्यसौकुमार्य्यसुदारता ॥ ५ ॥
सत्यैव यौगिकी चेति गुणाः शब्दस्य सप्तधा ।
सुश्लिष्टसन्निवेशत्वं शब्दानां श्लेष उच्यते ॥ ६ ॥
गुणादेश्यादिना पूर्व्वं पदसम्बन्धमक्षरं ।
यत्र सन्धीयते नैव तल्लालित्यमुदाहृतं ॥ ७ ॥
विशिष्टलक्षणोल्लेखलेख्यमुक्तानशब्दकम् ।
गाम्भीर्य्यं कथयन्त्यार्य्यास्तदेवान्येषु शब्दतां ॥ ८ ॥
अनिष्ठुराक्षरप्रायशब्दता सुकुमारता ।
उक्तानपदतोदार्य्ययुतत्वाद्यैर्विशेषणैः ॥ ९ ॥
ओजः समासभूयस्त्वमेतत्त्यादिजीवितं ।
आनन्त्यं स्तम्भपर्य्यन्तमोजसैकेन पौरुषं ॥ १० ॥
उच्यमानस्य शब्देन येन केनापि वस्तुनः ।
उत्कर्षमावहन्नर्थो गुण इत्यभिधीयते ॥ ११ ॥
माधुर्य्यं सन्निधानस्य कोमलत्वसुदारता ।
प्रौढिः सामयिकत्वस्य तद्भेदाः षट्चकाश्यति ॥ १२ ॥
औदार्य्याकारगाम्भीर्य्यामाधुर्य्यं धैर्य्यगर्हिता ।
सन्निधानं परिकरः स्यादपेक्षितसिद्धये ॥ १३ ॥
यत्काठिन्यादिनिर्मुक्तसन्निवेशविशिष्टता ।
तिरस्कृत्यैव मृदुता भाति कोमलतेति सा ॥ १४ ॥
लक्ष्यते स्थूललक्ष्यत्वप्रहृत्तेर्यच्च लक्षणम् ।
गुणस्य तदुदारत्वमाशयस्यातिसौष्ठवं ॥ १५ ॥
अभिप्रेतं प्रति यतो निर्व्याहस्योपपादिकाः ।
युक्तयो हेतुगर्भिण्यः प्रौढाप्रौढिरुदाहृता ॥ १६ ॥

स्वतन्त्रस्यान्यतन्त्रस्य वाङ्मात्रान्तःसमर्पणात् ।
तत्र व्युत्पत्तिरर्थस्य या सामर्थिकतेति सा ॥ १७ ॥
शब्दार्थावुपकुर्व्वाणो नाम्नोभयगुणः स्मृतः ।
तस्य प्रसादः सौभाग्यं यथासङ्ख्यं प्रशस्तता ॥ १८ ॥
पाको रागः इति प्राज्ञैः षट् प्रपञ्चविपश्चिताः ।
सुप्रसिद्धार्थपदता प्रसाद इति गीयते ॥ १९ ॥
उत्कर्षवान् गुणः कश्चिच्चित्रत्वे प्रतीयते ।
तत्सौभाग्यमुदारत्वं प्रवदन्ति मनीषिणः ॥ २० ॥
यथासङ्ख्यमनुद्देशः सामान्यमतिदिश्यते ।
समये वर्णनीयस्य दारुणस्यापि वस्तुनः ॥ २१ ॥
अदारुणेन शब्देन प्राशस्त्यमुपवर्णनं ।
उक्तेः परिणतिः कापि पाक इत्यभिधीयते ॥ २२ ॥
मृद्वीकानारिकेलाम्रपाकभेदाच्चतुर्विधः ।
आदावन्ते च सौरस्यं मृद्वीकापाक एव सः ॥ २३ ॥
काव्येच्छया विशेषो यः स राग इति गीयते ।
अभ्यासोपहितः कान्तिं सङ्गलामपि वर्त्तते ॥ २४ ॥
हारिद्रश्चैव कौसुम्भो नीली रागश्च स त्रिधा ।
वैशेषिकः परिज्ञेयो यः स्वलक्षणगोचरः ॥ २५ ॥

इत्याग्नेये महापुराणे काव्यगुणविवेको नाम पञ्चचत्वारिंश
दधिकत्रिशततमोऽध्यायः ।

अथ षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

———000———

काव्यदोषविवेकः ।

अग्निरुवाच । उद्वेगजनको दोषः सभ्यानां स च सप्तधा ।
वक्तृवाचकवाच्यानामेकद्वित्रिनियोगतः ॥ १ ॥
तत्र वक्ता कविर्नाम प्रथते स च भेदतः ।
सन्दिग्धानोऽविनीतः सन्नज्ञो ज्ञाता चतुर्विधः ॥ २ ॥
निमित्तपरिभाषाभ्यामर्थसंस्त्यर्गिवाचकम् ।
तद्भेदो पदवाक्ये द्वे कथितं लक्षणं द्वयोः ॥ ३ ॥
असाधुत्वाप्रयुक्तत्वे द्वावेव पदनिग्रहौ ।
शब्दशास्त्रविरुद्धत्वमसाधुत्वं विदुर्बुधाः ॥ ४ ॥
व्युत्पन्नैरनिबद्धत्वमप्रयुक्तत्वमुच्यते ।
छान्दसत्वमविस्पष्टत्वञ्च कष्टत्वमेव च ॥ ५ ॥
तदसामयिकत्वञ्च ग्राम्यत्वञ्चेति पञ्चधा ।
छान्दसत्वं न भाषायामविस्पष्टमबोधतः ॥ ६ ॥
गूढार्थता विपर्य्यस्तार्थता संशयितार्थता ।
अविस्पष्टार्थता भेदास्तत्र गूढार्थतेति सा ॥ ७ ॥
यत्रार्थो दुःखसंवेद्यो विपर्य्यस्तार्थता पुनः ।
विवक्षितान्यशब्दार्थप्रतिपत्तिर्मीलीमसा (१)॥ ८ ॥
अन्यार्थत्वासमर्थत्वे एतामेवोपसर्पतः ।

---

१ मलीमसेति अ० ।

सन्दिग्धमानवाच्यत्वमाहुः संशयितार्थतां ॥ ९ ॥
हीनत्वमनुवक्तीति सज्ञनोद्देजनाहते ।
असुखोच्चार्यमाणत्वं कष्टत्वं समयाच्युतिः ॥ १० ॥
असामयिकता नेयामेताश्च मुनयो जगुः ।
ग्राम्यता तु जघन्यार्थप्रतिपत्तिः खलीकृता ॥ ११ ॥
वक्तव्यग्राम्यवाच्यस्य वचनात्स्मरणादपि ।
तद्वाचकपदेनाभिसाम्याद्भवति सा त्रिधा ॥ १२ ॥
दोषः साधारणः प्रातिस्विकोऽर्थस्य स तु द्विधा ।
अनेकभागुपालभ्यः साधारण इति स्मृतः ॥ १३ ॥
क्रियाकारकयोर्भ्रंशो विसन्धिः पुनरुक्तता ।
व्यस्तसम्बन्धता चेति पञ्च साधारणा मताः (१) ॥ १४ ॥
अक्रियत्वं क्रियाभ्रंशो भ्रष्टकारकता पुनः ।
कर्त्रादिकारकाभावो विसन्धिः सन्धिदूषणम् ॥ १५ ॥
विगतो वा विरुद्धो वा सन्धिः स भवति द्विधा ।
सन्धेर्विरुद्धता कष्टपादादर्थान्तरागमात्(२) ॥ १६ ॥
पुनरुक्तत्वमाभीक्ष्ण्यादभिधानं द्विधैव तत् ।
अर्थाद्वृत्तिः पदाद्वृत्तिरर्थाद्वृत्तिरपि द्विधा ॥ १७ ॥
प्रयुक्तवरशब्देन (३) तथा शब्दान्तरेण च ।
नावर्त्तते पदाद्वृत्तौ वाच्यमावर्त्तते पदम् ॥ १८ ॥
व्यस्तसम्बन्धता सुष्ठु सम्बन्धो व्यवधानतः ।
सम्बन्धान्तरनिर्भावात् सम्बन्धान्तरजन्मनः ॥ १९ ॥

---

१ तथा इति ब०, अ० च। २ कष्टपादादर्थान्तरप्रसादिति ब०।
३ प्रयुक्तप्रवरशब्देनेति ब०, अ० च।

अभावेपि तयोरन्तर्व्यवधानाच्चिधैव सा ।
अन्तरा पदवाक्याभ्यां प्रतिभेदं पुनर्द्विधा ॥ २० ॥
वाच्यमर्थ्यमानत्वात्तद्द्विधा पदवाक्ययोः ।
व्युत्पादितपूर्ववाच्यं व्युत्पाद्यत्वेति भिद्यते ॥ २१ ॥
दृष्टव्याघातकारित्वं हेतोः स्यादसमर्थता ।
असिद्धत्वं विरुद्धत्वमनैकान्तिकता तथा ॥ २२ ॥
एवं सत्प्रतिपक्षत्वं कालातीतत्वसङ्करः ।
पक्षे सपक्षे नास्तित्वं विपक्षेऽस्तित्वमेव तत् ॥ २३ ॥
काव्येषु परिषद्यानां न भवेदप्यरुन्तुदम् ।
एकादग्निरर्थत्वं(१) दुष्करादौ नदुष्यति ॥ २४ ॥
दुःखीकरोति दोषज्ञान्गूढार्थत्वं न दुष्करे ।
न ग्राम्यतोद्वेगकारी प्रसिद्धेर्लोकयात्रयोः ॥ २५ ॥
क्रियाभ्रंशेन लक्ष्मास्ति क्रियाध्याहारयोगतः ।
अष्टकारकताचे पवलाध्याहृतकारके ॥ २६ ॥
प्रस्तुते गृह्यते नैव यतं विगतसन्धिना ।
कष्टपाठादिसन्धित्वं दुर्व्वचादौ न दुर्भगम् ॥ २७ ॥
अनुप्रासे पदाद्यन्तिर्व्यस्तसम्बन्धता शुभा ।
नार्थसंग्रहणे दोषो व्युत्क्रमाद्यैर्न क्षिप्यते ॥ २८ ॥
विभक्तिसंख्यालिङ्गानां यत्रोद्वेगो न धीमतां ।
संख्यायास्तत्र भिन्नत्वमुपमानोपमेययोः ॥ २९ ॥
अनेकस्य तवैक्येन बहूनां बहुभिः शुभा ।
जनौघा यत्समुदाचारः समयो नाम गीयते ॥ ३० ॥

१ एकादग्निरुन्तुदमिति ग० ।

समान्यं च विशिष्टं च धर्म्मवच्चवति द्विधा ।
सिद्धसैद्धान्तिकानाञ्च कवीनाञ्चाविवादतः ॥ ३१ ॥
यः प्रसिध्यति सामान्यमित्यसौ समयो मतः ।
सर्व्वे सिद्धान्तिका येन सञ्चरन्ति निरत्ययं ॥ ३२ ॥
कियन्त एव वा येन सामान्यस्तेन स द्विधा ।
क्वेदसिद्धान्ततोऽन्यः स्यात् केषाञ्चिद्भ्रान्तितो यथा ॥३३॥
तर्कज्ञानं मुनेः कस्य कस्यचित् क्षणभङ्गिका ।
भूतचैतन्यता कस्य ज्ञानस्य सुप्रकाशता ॥ ३४ ॥
ब्रह्मातस्थूलतादग्ध्वानेकान्तत्वं तथार्हतः ।
शैववैष्णवशाक्तेयसौरसिद्धान्तिनां मतिः ॥ ३५ ॥
जगतः कारणं ब्रह्म साङ्ख्यानां सप्रधानकं ।
अस्मिन् सरस्वतीलोके सञ्चरन्तः परस्परम् ॥ ३६ ॥
ब्रुवन्ति व्यतिषज्यन्तो यद्विशिष्टः स उच्यते ।
परिग्रहाद्व्यसतां सतामेवापरिग्रहात् ॥ ३७ ॥
भिद्यमानस्य तस्यायं द्वैविध्यमुपगीयते ।
प्रत्यक्षादिप्रमाणैर्यद्बाधितं तदसद्विदुः ॥ ३८ ॥
कविभिस्तत् प्रतिपाद्यं ज्ञानस्य द्योतमानता ।
यदेवार्थक्रियाकारि तदेव परमार्थसत् ॥ ३९ ॥
अज्ञानाज्ज्ञानतस्त्वेकं ब्रह्मैव परमार्थसत् ।
विष्णुः स्वर्गादिहेतुः स मृद्दारुहारकृपवान् ।
अपरा च परा विद्या तां ज्ञात्वा मुच्यते भवात् ॥ ४० ॥

इत्याग्नेये महापुराणे अलङ्कारे काव्यदोषविवेको नाम
षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः ।

अथ सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः।

———000———

एकाक्षराभिधानं।

अग्निरुवाच। एकाक्षराभिधानञ्च मातृकान्तं वदामि ते।
अ विष्णुः प्रतिषेधः स्यादा पितामहवाक्ययोः॥ १॥
सीमायामथाध्ययं आ भवेत्क्रोधपीडयोः।
इः कामे रतिलक्ष्मीरी ईः शिवे रक्षकाय ङः(१)॥ २॥
उ ग्रन्थे चादितो ऋस्यात् ऋ ऋ ते वै दितौ गुहे।
ए देवौ ऐ योगिनौ स्यादो ब्रह्मा औ महेश्वरः॥ ३॥
अङ्गानः अः प्रशस्तः स्यात्(२) को ब्रह्मादौ कु कुत्सिते।
खं शून्येन्द्रियं खङ्गो गन्धर्वे च विनायके॥ ४॥
गङ्गीते गो गायने स्याद् घो घण्टा किङ्किणीमुखे।
ताडने ङस्य विषये चृद्दायाञ्चैव भैरवे॥ ५॥
चो दुर्जने निर्मले छच्छे दे जिर्ज्जयने तथा।
जं गीते झः प्रशस्ते स्याद्वज्रे ञो गायने च टः॥ ६॥
ठश्चन्द्रमण्डले शून्ये शिवे चोद्यन्धने मतः।
डस्य वृद्धे ध्वनौ चाथे ढश्चार्यां ढो ध्वनौ मतः॥ ७॥
णो निष्कर्षे निषये च तद्वोरे क्रोडपुच्छके।
भक्षणे थश्छेदने दो धारिणे शोभने मतः॥ ८॥

---

१ ङश्चकाय जरिति ङ०। २ प्रशान्तः स्यादिति ङ०।
३ चन्द्रे इति ङ०।

धौ धातरि च धूसूरे नौ छन्दे सुगते तथा ।
प उपवने विख्यातः फञ्च भञ्जनिले मतः ॥ ८ ॥
फुः फुत्कारे निष्फले च विः पक्षी भञ्च तारके ।
मा श्रीर्ब्रह्मनच माता खाद्याग यो याढवीरघे ॥ ९० ॥
रो वह्नौ च लः शक्रे च लो विधातरि दूरितः ।
विश्लेषणे वो वरुणे शयने शच यं सुखे ॥ ११ ॥
षः श्रेष्ठे सः परीक्षे च सा लक्ष्मीः सं कचे मतः ।
धारणे हस्तथा रुद्रे चः चन्द्रे चाचरे मतः ॥ १२ ॥
छौ नृसिंहे हरौ तद्वत् क्षेत्रपालकयोरपि ।
मन्त्र एकाक्षरो देवो भुक्तिमुक्तिप्रदायकः ॥ १३ ॥
हैहयऋषये नमः सर्व्वविद्याप्रदो मनुः ।
अकाराद्यास्तथा मन्त्रा माढकामन्त्र उत्तमः ॥ १४ ॥
एकपञ्चेऽर्चयेदेतान्नव दुर्गाश्च पूजयेत् ।
भगवती कात्यायनी कौशिकी चाथ चण्डिका ॥ १५ ॥
प्रचण्डा सुरनायिका उग्रा पार्व्वती दुर्गया ।
ओं चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात् ।
क्रमादि तु षडङ्गं स्याद्गणो गुरुर्गुरुः क्रमात् ॥ १६ ॥
अजितापराजिता चाथ जया च विजया ततः ।
कात्यायनी भद्रकाली मङ्गला सिद्धिरेवती ॥ १७ ॥
सिद्धादिवटुकाः पूज्या क्षेत्रुकश्च कपालिकः ।
एकपादो भीमरूपो दिक्पालाश्चाधतो नव ॥ १८ ॥
क्रीं दुर्गे दुर्गे रक्षणि स्वाहामन्त्रार्थसिद्धये ।
गौरी पूज्या च धर्म्माद्याः स्कन्दाद्याः शक्तयो यजेत् ॥१९॥

प्रज्ञा ज्ञाना क्रिया वाचा वागीशी ज्वालिनी तथा ।
कालिनी कालमाता च इन्द्राद्याः अग्निपूजनं ॥ २० ॥
श्रीं गं स्वाहा मूलमन्त्रोऽयं गं वा गणपतये नमः ।
षड्भक्तो रक्तशुक्लश्च दन्ताक्षपरशूत्कटः ॥ २१ ॥
समोदकोऽथ (१) गन्धादिगन्धोल्कायेति च क्रमात् ।
गजो महागणपतिर्मन्त्रोल्कः पूज्य एव च ॥ २२ ॥
शुभ्राङ्काय एकदन्तत्रिपुरान्तकाय श्यामदन्तविकटहरहासाय ।
लम्बनाग्राननाय पद्मदंष्ट्राय मेघोल्काय धूमोल्काय ।
वज्रतुण्डाय विघ्नेश्वराय विकटोत्कटाय गजेन्द्रगमनाय ।
भुजगेन्द्रहाराय व्याघ्राम्बरधराय गणाधिपतये स्वाहा ।
एतैर्मनुभिः स्वाहान्तैः पूज्य तिलहोमादिनार्थभाक् ।
काद्यैर्वा बीजसंयुक्तैस्तैरार्यैश नमोऽन्तकैः ॥ २३ ॥
मन्त्राः पृथक् पृथग्वा स्युर्द्विरेफद्विर्मुखाक्षिणः(२)* ।
कात्यायनं स्कन्द आह यत्तद्वाकरणं वदे ॥ २४ ॥

इत्याग्नेये महापुराणे एकाक्षराभिधानं नाम सप्तचत्वारिंश-
दधिकत्रिशततमोऽध्यायः ।

---

१ क्वचिं देशेऽयेति अ० ।

२ द्वे द्वे रेफाव दक्षिणा इति अ० ।

* द्विरेफद्विर्मुखाक्षिण इत्यर्थः यावत् यावदग्नेर्दीप्तयस्तावतीभी अग्नितुं नार्हति ।

अथाष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः।

———000———

व्याकरणं।

स्कन्द उवाच। वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम्।
कात्यायनविबोधाय बालानां बोधनाय च॥ १॥
प्रत्याहारादिकाः संज्ञाः शास्त्रसंव्यवहारगाः।
अ इ उ ण् ऋ ऌ क् ए ङ् ऐ ओ च् ह य व र ट् ल ञ् म ङ् ण न म् झ भ ञ् घ ढ ध ज ब ग ड द श् ख् फ छ ठ थ च ट त क् प य् श ष स र् ह ल् इति प्रत्याहारः।
उपदेशेऽजनुनासिक इत्॥ २॥
आदिर्ञिटुडवः शकन्धुमाषोऽप्यत्खेनेता सहैव तु।
तयोर्मध्यगतानां स्यादुपाहकः स्वस्य तथा॥ ३॥

अण् एङ् अट् यङ् ञ्व् झम् भञ् घढ् धष् जब् गड् दश् ख्फ् छठ् थच् टत् कप् श्य् ष्म् स र् ह ल् वरेच यकारेच। अम् यम् ङम् अच् इच् एच् अय् मय् झय् ख्य् जय् झय् ख्य् चय् शय् अस् इश् वस् भस् अल् हल् वल् रल् झल् खल् इति प्रत्याहारः।

इत्याग्नेये महापुराणे व्याकरणे प्रत्याहारो नामाष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः।

———

अथोनपञ्चाशदधिकद्विशततमोऽध्यायः ।

———ooo@ooo———

सन्धिसिद्धरूपं ।

स्कन्द उवाच । वक्ष्ये सन्धिसिद्धरूपं स्वरसन्धिमथादितः ।
दण्डाग्रं सागता दधीदं नदीहते मधूदकं ॥ १ ॥
पितृवभः ऌकारश्च तवेदं सकलोदकं ।
अर्धर्चोऽयं तवस्कारः सैषा सैन्द्री तवौदनम् ॥ २ ॥
खट्वोवोऽभवदित्येवं व्यसुधीर्वस्वलङ्कृतं ।
पित्रर्थोपवनं दात्रौ नायकौ लावकौ नयः ॥ ३ ॥
तद्रह तयिहेत्यादि तेऽत्र योऽत्र अलेऽकजं ।
प्रस्तितर्नौ अक्षौ एहि अ अवेहि इ इन्द्रकं ॥ ४ ॥
उ उत्तिष्ठ कवी एतौ वायु एतौ वने इमे ।
अमी एते यज्ञभूते एहि देव इमत्रय ॥ ५ ॥
वक्ष्ये सन्धिं व्यञ्जनाणां वाग्यतोऽनेकमात्रकः ।
षडेते तदिमे वादिवाङ्मीतिः वक्ष्युक्तादिकम् ॥ ६ ॥
वाग्जनसं वगभावादिर्वाक् स्वरं तद्धरीरकं ।
तनुनाति तथरेत्र क्रुङ्कास्ते च सुगच्छिह ॥ ७ ॥
भवांश्चरन् भवांश्छात्रो भवांष्टीका भवांश्चकः ।
भवांस्तीर्थं भवांस्त्वेयात् भवांस्त्रेखा भवाञ्जयः ॥ ८ ॥
भवाञ्छेते भवाञ्चयेते भवाञ्जयेते भवाञ्छीनः ।
त्वञ्चर्ता त्वङ्करोत्यादिः सन्धिर्ज्ञेयो विसर्गजः ॥ ९ ॥

कश्छिन्द्यात् कश्चरेत् कष्टः कष्टः कस्य कश्चलेत् ।
क × खनेत् क × करोति क × क ॥ पठेत् क ॥ फलेत वा ॥१०॥
कश्खश्वरः कःखश्वरः कस्सावरः कःसावरः ।
कः फलेत कः श्रयिता कोऽत्र योधः क उत्तमः ॥ ११ ॥
देवा एते भो इह सोदरा यान्ति भगो व्रज ।
सुपूः सुदूराविरत्र वायुर्याति पुनर्न हि ॥ १२ ॥
पुनरेति स यातीह एष याति क ईश्वरः ।
ज्योतीरूपं तवच्छत्रं स्तेच्छधीश्छिद्रमच्छिदत् ॥ १३ ॥

इत्याग्नेये महापुराणे व्याकरणे सन्धिसिद्धरूपं नामो-
नपञ्चाशदधिकत्रिशततमोऽध्यायः ।

अथ पञ्चाशदधिकत्रिशततमोऽध्यायः ।

सुब्विभक्तिसिद्धरूपं ।

स्कन्द उवाच । विभक्तिसिद्धरूपञ्च कात्यायन वदामि ते ।
हे विभक्तौ सुप्तिङश्च सुपः सप्त विभक्तयः ॥ १ ॥
सुभ्योजसिति प्रथमा ऽमौट्यसौ द्वितीया ।
टाभ्यां भिसिति तृतीया ङेभ्यांभ्यस्चतुर्थ्यपि ॥ २ ॥
ङसिभ्यांभ्यसः पञ्चमी स्यात्ङसोसामिति षष्ठ्यपि ।
ङिओस्सुपीति सप्तमी स्यात् सुः प्रातिपदिकात्परा: ॥३॥
द्विविधं प्रातिपदिकं ह्यजन्तञ्च हलन्तकं ।

प्रत्येकं त्रिविधं तत् स्यात् पुमांस्त्री च नपुंसकं ॥ ४ ॥
दृश्यन्ते नायकास्तेषामनुक्तानाञ्च वीप्सितः ।
हृच्चः सर्व्वोऽथ पूर्व्वश्च प्रथमश्च द्वितीयकः ॥ ५ ॥
तृतीयः खण्डपा वह्निः सखापतिरहर्पतिः ।
पटुर्नीर्ग्रामणीन्द्रश्च खलपूर्म्मित्रभूः स्वभूः ॥ ६ ॥
सुग्रीः सुधीः पिता भ्राता ना कर्त्ता क्रोष्टुनप्तृकौ ।
सुरा रा गौस्तथा द्यौर्ग्लौः स्वरान्ताः पुंसि नायकाः ॥७॥
सुवाक् त्वक् पृषत् सम्राट् जन्मभाक् च अवेडपि ।
आपो मरुद्भवन् दीव्यन् भवांश्च मघवान् पिवन् ॥ ८ ॥
भगवानधवानर्व्वान्वह्निमत् सर्व्ववित्सुधृत् ।
सुसीमा कुण्डी राजा च श्वा युवा मघवा तथा ॥ ९ ॥
पूषा सुकर्म्मा यज्वा च सुवर्म्मा च सुधर्म्मणा ।
अर्य्यमा हृत्वहा पन्थाः सुककुदादिपञ्च च ॥ १० ॥
प्रज्ञान् सुतांश्च पञ्चाद्याः सुगीः सुराः सुपूरपि ।
चन्द्रमाः सुवचाः श्रेयान् विद्वांश्चोशनसा सह ॥ ११ ॥
पेचिवान् गौरवानड्वान् गोधूक्षिवद्रुहौ खलिट् ।
स्त्रियां जाया जरा बाला एडका सह हृदया ॥ १२ ॥
क्षत्रिया बहुराजा च बहुदा माऽथ बालिका ।
माया कौमुदगन्धा च सर्व्वा पूर्व्वा सहान्यया ॥ १३ ॥
द्वितीया च तृतीया च बुद्धिः स्त्री ओर्व्रदौ सुधीः ।
भवन्ती चैवन्दीव्यन्ती भ्रातौ भ्रान्ती च यान्त्यपि ॥ १४ ॥
शृण्वती तुदतौ कर्त्री तुदन्ती कुर्वती मही ।
रुन्धती क्रीड़ती दान्ती पालयन्ती सुराण्यपि ॥ १५ ॥

गौरी पुत्रवती नौश्च वधूर्हैवतया भुवा ।
तिस्रो द्वे कति वर्षाभूः स्वसा माता वरा च गौः ॥ १६ ॥
नौर्वाक्त्वक्प्राच्यवाचीति तिरश्ची समुदीच्यपि ।
शरद्विद्युत् सरिद्योषित् अग्निवित् सम्पदा इयत् ॥ १७ ॥
यैषा सा वेदवित्संवित् बह्वी राज्ञो त्वया मया ।
सीमा पश्चादयो राजौ धूः पूर्वैव दिशा (१)गिरा ॥ १८ ॥
चतस्रो विदुषो चैव केयं दिक् दृक्च तादृशी ।
असौ स्त्रियां नायकाय नायकाय नपुंसके ॥ १९ ॥
कुण्डं सर्वं सोमपश्च दधि वारि खलप्वथ ।
मधु त्वपु कर्त्तृ भक्तृ अतिवक्तृ पयः पुरः ॥ २० ॥
प्राक्प्रत्यक् च तिर्य्यगुदक् जगद् जाग्रत्तथा सतत् ।
सुसम्यञ्च सदग्डोह अहः किञ्चेदमित्यपि ॥ २१ ॥
षट्सर्पिः त्र्येयत्वारि अदोऽन्ये द्वौदया: परे ।
एतेभ्यः प्रथमादयश्च स्युः प्रातिपदिकात्परा: ॥ २२ ॥
धातुप्रत्ययहीनं यत्स्यात् प्रातिपदिकन्तु तत् ।
प्रातिपदिकात् स्वलिङ्गार्थवचने प्रथमा भवेत् ॥ २३ ॥
सम्बोधने च प्रथमा उक्ते कर्म्मणि कर्त्तरि ।
कर्म्म यत् क्रियते तत्स्यात् द्वितीया कर्मणि स्मृता ॥ २४ ॥
क्रियते येन करणं कर्त्ता यश्च करोति सः ।
अनुक्ते तिङ्कृत्तद्धितेस्तृतीया करणे भवेत् ॥ २५ ॥
कारके कर्त्तरि च सा सम्प्रदाने चतुर्ष्वपि ।
यस्मै दिक्षा धारयते सम्प्रदानं तदीरितं ॥ २६ ॥

---

१ दिवेति ज० ।

अपादानं यतोऽपैति आदत्ते च भयं यतः ।
अपादाने पञ्चमी स्यात् स्वस्वाम्यादौ च षष्ठ्यपि ॥ २७ ॥
आधारो योऽधिकरणं विभक्तिस्तत्र सप्तमी ।
एकार्थे चैकवचनं द्वयर्थे द्विवचनं भवेत् ॥ २८ ॥
बहुषु बहुवचनं सिद्धरूपाण्यथो वदे ।
हस्तः सूर्योऽम्बुवाहोऽर्के हेरवे हेहिजातयः ॥ २९ ॥
विप्रो गजान्महेन्द्रेण यमाभ्यामनलैः कृतं ।
रामाय मुनिवर्य्याभ्यां केभ्यो धर्म्मात् हरौ रतिः ॥ ३० ॥
शराभ्यां पुस्तकेभ्यश्च अर्थस्येश्वरयोर्गतिः ।
बालानां सज्जने प्रीतिर्हंसयोः कमलेषु च ॥ ३१ ॥
एवं काममहेशाद्याः शब्दा ज्ञेयाश्च हस्तवत् ।
सर्वे विश्वे च सर्वस्मै सर्वस्मात्कतरो मतः ॥ ३२ ॥
सर्वेषां स्वश्च विश्वस्मिन् शेषं रूपञ्च हस्तवत् ।
एवञ्चोभयकतरकतमान्यतरादयः ॥ ३३ ॥
पूर्व्वे पूर्व्वाय पूर्वस्मै पूर्वस्मात् सुसमागतः ।
पूर्व्वे तुल्ये पूर्वस्मिन् शेषरूपन्तु सर्ववत् ॥ ३४ ॥
एवं परावराद्याश्च दक्षिणोत्तरकान्तराः ।
अपरस्याधरो नेमाः प्रथमाः प्रथमेऽर्कवत् ॥ ३५ ॥
एवं चरमायतया अल्पार्द्धा नेमआदयः ।
द्वितीयस्मै द्वितीयाय द्वितीयस्मात् द्वितीयकात् ॥ ३६ ॥
द्वितीयस्मिन्-द्वितीये च तृतीयश्च तथाऽर्कवत् ।
सोमपाः सोमपौ ज्ञेयौ सोमपाः सोमपां व्रज ॥ ३७ ॥
कीलालपौ सोमपश्च सोमपा सोमपे दद ।

सोमपाभ्यां सोमपाभ्यः सोमपः सोमपोः कुलं ॥ ३८ ॥
एवं कौलालपाद्याः स्युः कविरग्निस्तथाऽरयः ।
हेकवे कविमग्नी तान् हरीन् सात्यकिना हृतं ॥ ३९ ॥
रविभ्यां रविभिर्हेहि वह्नये यः समागतः ।
अग्नेरग्नेोस्तथाग्नीनां कवौ कव्योः कविष्वथ ॥ ४० ॥
एवं सुस्तिरभ्रान्तिः सुकीर्त्तिः सुधृतिस्तथा ।
सखा सखायौ सखायः हेसखे व्रज सत्पतिं ॥ ४१ ॥
सखायश्च सखायौ च सखीन् सख्या गतो दद ।
सख्यै सख्युश्च सख्युश्च सख्योः शेषः कवेरिव ॥ ४२ ॥
पत्या पत्ये च पत्युश्च पत्युः पत्योस्तथाऽग्निवत् ।
द्वौ द्वौ द्वाभ्यां द्वाभ्यां द्वित्वाद्यर्थं द्वयोर्द्वयोः ॥ ४३ ॥
त्रयस्त्रींय त्रिभिस्त्रिभ्यस्त्रयाणाञ्च त्रिषु क्रमात् ।
कविवत् कतिकतीतिशेषं बहुवचनं स्मृतम् ॥ ४४ ॥
नौर्नियौ च नियो हेनौः नियं नियौ नियो निया ।
नौभ्यां नौभिर्नियै नौभ्यः नियाश्चियि नियोस्तथा ॥४५॥
सुश्रीः सुधीः प्रभृतयो ग्रामणीः पूजयेद्धरिं ।
ग्रामण्यौ ग्रामण्यो ग्रामण्यं ग्रामण्या ग्रामणीभिः ॥४६॥
ग्रामण्यो ग्रामण्यामेवं सेनानीप्रमुखाः सुभूः ।
सुभुवौ च स्वयम्भुवः स्वयम्भुश्च स्वयम्भुवः ॥ ४७ ॥
स्वयम्भुवा स्वयम्भुवि एवं प्रतिभुवादयः ।
खलपूः खलप्वौ श्रेष्ठौ खलप्वश्च खलूप्वि च ॥ ४८ ॥
एवं शरपूमुखाः स्युः क्रोष्टा क्रोष्टार ईरिताः ।
क्रोष्टूं च क्रोष्टुना क्रोष्ट्रा क्रोष्टूनां क्रोष्टरीदृयं ॥ ४९ ॥

पिता पितरौ पितरः हेपितः पितरौ शुभौ ।
पितॄन् पितुः पितुः पित्रोः पितॄणां पितरौदृश्यं ॥ ५० ॥
एवं भ्राता च जामातृमुखा नॄणां नृणां तथा ।
कर्त्ता कर्त्तारौ कर्त्तॄंश्च कर्त्तॄणां कर्त्तरौदृश्यं ॥ ५१ ॥
पितृवच्चैवमुद्भाता स्वसा नप्तृादयः स्मृताः ।
सुराः सुरायौ सुरायः सुरायाश्च सुराष्वपि ॥ ५२ ॥
गौः गावौ गाङ्गा गवा च गोर्गवोश्च गवां गवि ।
एवं द्यौर्ग्लौरापि तथा स्वरान्ताः पुंसि नायकाः ॥ ५३ ॥
सुवाक् सुवाचौ सुवाचा सुवाग्भ्याश्च सुवाक्ष्वपि ।
एवं दिक्प्रमुखाः प्राङ्च प्राचौ प्राञ्चश्च भो व्रज ॥ ५४ ॥
प्राग्भ्यां प्राग्भिः प्राचाश्च प्राचि च प्राङ्सु प्राङ्क्ष्वपि ।
एवं ह्युदङ्दीचौ वा सम्यङ् प्रत्यक्ममीच्यपि ॥ ५५ ॥
तिर्य्यङ् तिरश्च सम्राङ् च विश्वद्राङ् पूर्ववत् स्मृताः ।
अदद्राङ्दमुयङ् स्यात् तथामुमुयङीरितः ॥ ५६ ॥
अदद्राञ्चौ ह्यमुद्रीचः अदद्राग्भ्याश्च पूर्ववत् ।
तक्वलट् तक्वलषौ च तक्वलड्भ्यां समागतः ॥ ५७ ॥
तक्वलषि तक्वलट्सु एवं काष्ठतड़ादयः ।
भिषक् भिषग्भ्यां भिषजि जन्मभागादयस्तथा ॥ ५८ ॥
मरुत् मरुद्भ्यां मरुति एवं ऋत्विजादयः ।
भवान् भवन्तौ भवतां भवत्सैव भवत्यपि ॥ ५९ ॥
महान्महान्तौ महतामेवं भगवदादयः ।
एवं मघवान्मघवन्तौ अग्निचिच्चाग्निचित्यपि ॥ ६० ॥
अग्निचित्खेवमेवान्यत् वेदवित्तत्त्ववित्त्वपि ।

वेदविदामेवमन्यत् यः समस्तेन सर्व्ववित् ॥ ६१ ॥
राजा राजानौ राज्ञः राज्ञि राजनि राजन् ।
यज्वा यज्वानस्तद्वत् करौ दण्डौ च दण्डिनौ ॥ ६२ ॥
पन्थाः पन्थानौ च पथः पथिभ्यां पथि चेदृगम् ।
मन्था ऋभुक्षाः पथ्याद्याः पञ्च पञ्च च पञ्चभिः ॥ ६३ ॥
प्रतान् प्रतानौ प्रतान्भ्यां हे प्रतांश्च सुशर्म्मणः ।
आपः अपः अङ्गिरस्येवं प्रशांश्चैव प्रशास्यपि ॥ ६४ ॥
कः केन सर्व्ववत् केषु अयं चेमे इमान्नयः ।
अनेन चाभ्यामेभिश्च अस्मै चेभ्यः स्वमस्य च ॥ ६५ ॥
अनयोरेषामेषु स्याच्चत्वारश्चतुरस्तथा ।
चतुर्णाञ्च चतुर्भ्यश्च सुगीः श्रेष्ठः सुगिरयपि ॥ ६६ ॥
सुद्यौः सुदिवौ सुद्युभ्यां विड्विपौ विट्सु यादृगः ।
यादृग्भ्याञ्चैव विड्भ्याञ्च षट् षट् षण्णाञ्च षट्स्वपि ॥ ६७ ॥
सुवचाः सुवचसा च सुवचोभ्यामथेदृगम् ।
हे सुवचो हे उशनन् उशना वोशनस्यपि ॥ ६८ ॥
पुरुदंशा अनेहा हे विद्वन् विद्वांस उत्तमाः ।
विदुषे नमो विद्वद्भ्यां विद्वत्सु च बभूविवान् ॥ ६९ ॥
एवञ्च पेचिवान् श्रेयान् श्रेयांसौ श्रेयसस्तथा ।
असौ अमू अमी श्रेष्ठा अमुं अमूनिहामुना ॥ ७० ॥
अमीभिरमुष्मै वामुष्मादमुष्य वामुयोस्तथा ।
अमीषाममुष्मिन्नित्येवं गोधुक् गोधुग्भिरागतः ॥ ७१ ॥
गोधुक्षित्येवमन्येपि मित्रद्रुहौ मित्रद्रुहा ।
मित्रध्रुग्भ्यां मित्रध्रुग्भिरेवं चित्तद्रुहादयः ॥ ७२ ॥

स्वलिट् स्वलिड्भ्यां स्वलिड्हि अनड्वाननड्वत्सु च ।
अजन्ताश्च हलन्ताश्च पुंस्यथोऽथ स्त्रियां वदे ॥ ७३ ॥

इत्याग्नेये महापुराणे व्याकरणे पुंलिङ्गशब्दसिद्धरूपं नाम
पञ्चाग्रदधिकत्रिशततमोऽध्यायः ।

अथैकपञ्चाग्रदधिकत्रिशततमोऽध्यायः ।

स्त्रीलिङ्गशब्दसिद्धरूपं ।

स्कन्द उवाच । रमा रमे रमाः शुभा रमां रमे रमास्तथा ।
रमया च रमाभ्याञ्च रमाभिः कृतमव्ययं ॥ १ ॥
रमायै च रमाभ्याञ्च रमाया रमयोः शुभं ।
रमाणाञ्च रमायाञ्च रमास्वेवं कलादयः ॥ २ ॥
जरा जरसौ जरस इति जरसञ्च जरा जरां ।
जरसञ्च जरास्वेवं सर्व्वा सर्व्वे च सर्व्वया ॥ ३ ॥
सर्व्वस्यै देहि सर्व्वस्याः सर्व्वस्याः सर्व्वयोस्तथा ।
श्रेयं रमावद्भद्रं स्याद् हे हे तिस्रश्च तिस्रणां ॥ ४ ॥
बुद्धीर्बुद्धा बुद्धये च बुद्धेर्बुद्धेश्च हेमते ।
कविवत्स्यामनोनाश्च नद्यो नद्यौ नदीं नदीः ॥ ५ ॥
नद्या नदीभिर्नद्यै च नद्याश्चैव नदीषु च ।
कुमारी जृम्भणोत्येवं श्रीः श्रियौ च श्रियः श्रिया ॥ ६ ॥

स्त्रियै स्त्रिये स्त्रीं स्त्रियश्च स्त्रीश्च स्त्रियः स्त्रिया स्त्रियै ।
स्त्रियाः स्त्रीणां स्त्रियाश्च ग्रामण्यां धेन्वै च धेनवे॥ ७ ॥
जम्बूर्जम्बौ च जम्बूश्च जम्बूनाश्च फलम्मिव ।
वर्षाभ्वो च पुनर्भ्वौ च मातृर्वापि च गौश्च नौः ॥ ८ ॥
वाग्वाचा वाग्भिश्च वाक्षु अग्भ्यां स्रजि स्रजोस्रथा ।
विद्वद्भाश्चैव विद्वत्सु भवती स्याद् भवन्त्यपि ॥ ९ ॥
दीव्यन्ती भाती भान्ती च तुदन्ती च तुदत्यपि ।
रुदती रुन्धती देवी गच्छती चोरयन्त्यपि॥ १० ॥
दृषत् दृषद्भ्यां दृषदि विशेषविदुषो कृतिः ।
समित् समिद्भ्यां समिधि सीमा सीम्नि च सीमनि ॥११॥
दामनीभ्यां ककुद्भाश्च केयमाभ्यां तथासु च ।
गोभ्याश्चैव गिरा गीर्षु सुभूः सुपूः पुरा पुरि ॥ १२ ॥
द्यौर्द्युभ्यां दिवि द्युषु तादृग्या तादृशी दिगः ।
यादृग्यां यादृशी तद्वत् सुवचीभ्यां सुवचःस्वपि ।
असौ चामूममू चामूरमूभिरमुयाऽमुयोः ॥ १३ ॥

इत्याग्नेये महापुराणे व्याकरणे स्त्रीलिङ्गशब्दसिद्धरूपं नामैक-
पञ्चाशदधिकद्विशततमोऽध्यायः ।

अथ द्विपञ्चाशदधिकत्रिशततमोऽध्यायः ।

———ooo@ooo———

नपुंसकशब्दसिद्धरूपं ।

स्कन्द उवाच । नपुंसके किं के कानि किं के कानि ततो जलं ।
सर्वं सर्वे च पूर्वाद्याः सोमपं सोमपानि च । १ ॥
ग्रामणि ग्रामणिनी च ग्रामणि ग्रामणीन्यपि ।
वारि वारिणी वारीणि वारिणां वारिणीष्टयं ॥ २ ॥
शुचये शुचिने देहि मृदुने मृदवे तथा ।
त्रपु त्रपुणि त्रपुणाश्च खलपूनि खलप्वि च ॥ ३ ॥
कर्त्री च कर्तृणे कर्त्रे अतिर्य्यतिरिणास्तथा ।
अभिन्नाभिनिनी चैव सुवचांसि सुवाचु च ॥ ४ ॥
यदृयत्त्विमे तत् कर्म्माणि इदश्चे मे त्विमानि च ।
ईदृक्त्वदोऽमुनी अमूनि अमुना स्यादमीषु च ॥ ५ ॥
अहमावां वयं मां वै आवामस्मान्मया कृतं ।
आवाभ्याञ्च तथास्माभिरस्मभ्यमेव च ॥ ६ ॥
मदावाभ्यां मदस्माञ्च पुत्रोऽयं मम चावयोः ।
अस्माकमपि चास्मासु त्वं युवां यूयमीजिरे ॥ ७ ॥
त्वां युवाञ्च युष्मांश्च त्वया युष्माभिरीरितं ।
तुभ्यं युवाभ्यां युष्मभ्यं त्वत् युवाभ्याञ्च युष्मत् ॥ ८ ॥
तव युवयोर्युवाकं त्वयि युष्मासु भारती ।
उपलक्षणमत्रैव अन्यत्रलक्षाश्च ते स्मृताः ॥ ९ ॥

इत्याग्नेये महापुराणे व्याकरणे नपुंसकशब्दसिद्धरूपं नाम
द्विपञ्चाशदधिकत्रिशततमोऽध्यायः ।

अथ त्रिपञ्चाशदधिकत्रिशततमोऽध्यायः ।

———000@000———

कारकं ।

स्कन्द उवाच । कारकं सम्प्रवक्ष्यामि विभक्त्यर्थसमन्वितं ।
ग्रामोऽस्ति हेमहार्केह नौमि विष्णुं श्रिया सह ॥ १ ॥
स्वतन्त्रः कर्त्ता विद्यात्तं क्रतिनः समुपासते ।
हेतुकर्त्तालभयते हितं वै कर्म्मकर्त्तरि ॥ २ ॥
स्वयं भिद्येत प्राक्तधीः स्वयञ्च छिद्यते तरुः ।
कर्त्ताऽभिहित उत्तमः कर्त्ताऽनभिहितोऽधमः ॥ ३ ॥
कर्त्ताऽनभिहितो धर्म्मः शिष्ये व्याख्यायते यथा ।
कर्त्ता पञ्चविधः प्रोक्तः कर्म्म सप्तविधं शृणु ॥ ४ ॥
ईप्सितं कर्म्म च यथा श्रद्दधाति हरिं यतिः ।
अनीप्सितं कर्म्म यथा अहिं लङ्घयते भृशं ॥ ५ ॥
नैवेप्सितं नानीप्सितं दुग्धं सम्भक्षयन्नजः ।
भक्षयेद्दध्यक्षथितं गोपालो दोग्धि गां पयः ॥ ६ ॥
कर्त्तृकर्माऽथ गमयेच्छिष्यं ग्रामं गुरुर्यथा ।
कर्म्म चाभिहितं पूजा क्रियते वै श्रिये हरेः ॥ ७ ॥
कर्म्मानभिहितं स्तोत्रं हरेः कुर्य्यात्तु सर्व्वदं ।
करणं द्विविधं प्रोक्तं बाह्यमभ्यन्तरं तथा ॥ ८ ॥
चक्षुषा रूपं गृह्णाति बाह्यं दात्रेण तक्षनेत् ।
सम्प्रदानं त्रिधा प्रोक्तं प्रेरकं ग्राह्यायं गां ॥ ९ ॥

नरो ददाति नृपतये दासस्तदनुमन्त्रकं ।
अनिराकर्तृकं भर्त्रे दद्यात् पुष्पाणि सज्जनः ॥ १० ॥
अपादानं द्विधा प्रोक्तं चलमश्लाघ्यसु धावतः ।
पतितश्चाचलं ग्रामादागच्छति स वैष्णवः ॥ ११ ॥
चतुर्थ्या चाधिकरणं व्यापकन्दध्नि वै घृतम् ।
तिलेषु तैलं देवार्थमौपश्लेषिकमुच्यते ॥ १२ ॥
गृहे तिष्ठेत् कपिर्वृक्षे स्मृतं वैषयिकं यथा ।
जले मत्स्यो वने सिंहः स्मृतं सामीप्यकं यथा ॥ १३ ॥
गङ्गायां घोषो वसति औपचारिकमीदृशं ।
तृतीया वाथ वा षष्ठी स्मृताऽनभिहिते तथा ॥ १४ ॥
विष्णुः सम्पूज्यते लोकैर्गन्तव्यन्तेन तस्य वा ।
प्रथमाऽभिहितकर्तृकर्मणोः प्रणमेद्धरिम् ॥ १५ ॥
हेतौ तृतीया चान्नेन वसेद्वृत्ताय वै जलं ।
चतुर्थी तादर्थ्येऽभिहिता पञ्चमी पर्य्युपाङ्मुखैः ॥ १६ ॥
योगे हृष्टः परि ग्रामाद्देवोऽयं बलवत् पुरा ।
पूर्वो ग्रामादृते विष्णोर्न मुक्तिरितरो हरेः ॥ १७ ॥
पृथग्विनाद्यैस्तृतीया पञ्चमी च तथा भवेत् ।
पृथग्ग्रामादिद्वारेण विना श्रीश्च श्रिया श्रियः ॥ १८ ॥
कर्म्मप्रवचनीयाख्यैर्द्वितीया योगतो भवेत् ।
अन्तर्जलं च योद्वारो ह्यभितो ग्राममीरितं ॥ १९ ॥
नमःस्वाहास्वधाऽलंवषडाद्यैश्चतुर्थ्यपि ।
नमो देवाय ते स्वस्ति तुमर्थाद्भावचित्तः ॥ २० ॥
पाकाय पक्वये याति तृतीया सहयोगके ।

हेत्वर्थे कुक्षितेऽङ्गे सा तृतीया च विशेषणे ।। २१ ॥
पिताऽगात्सह पुत्रेण काणोऽक्ष्णा गदया हरिः ।
अर्थेन निवसेद्भृत्यः काले भावे च सप्तमी ।। २२ ।।
विष्णो नते भवेन्मुक्तिर्वसन्ते स गतो हरिम् ।
नृणां स्वामी नृषु स्वामी नृणामीशः सतामृषिः ।। २३ ।।
नृणां साक्षी नृषु साक्षी गोषु नाथो गवामृषिः ।
गोषु सूतो गवां सूतो राज्ञां दायादकोऽस्विह ।। २४ ।।
अन्नस्य(१) हेतोर्वसति षष्ठी स्मृत्यर्थकर्मणि ।
मातुः स्मरति गोमारं नित्यं स्यात् कर्तृकर्मणोः ।
अपां भेत्ता तव क्षतिर्न निष्ठादिषु षष्ठ्यपि ।। २५ ।।

इत्याग्नेये महापुराणे व्याकरणे कारकं नाम त्रिपञ्चाश-
दधिकद्विशततमोऽध्यायः ।

अथ चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ।

समासः ।

स्कन्द उवाच । षोढा समासं वक्ष्यामि अष्टाविंशतिधा पुनः ।
नित्यानित्यविभागेन लुगलोपेन च द्विधा ।। १ ।।
कुम्भकारस्य नित्यः स्याद्वैप्रकारादिकस्तथा ।
राज्ञः पुमान् राजपुमान् नित्योऽयञ्च समासकः ।। २ ।।

---

१ अन्नेति ज० ।

कष्टश्रितो लुक्समासः कण्ठेकालादिकस्त्वलुक् ।
स्यादष्टधा तत्पुरुषः प्रथमाद्यसुपा सह ॥ ३ ॥
प्रथमातत्पुरुषोऽयं पूर्वं कायस्य विग्रहे ।
पूर्वकायोऽपरकायो ह्यधरोत्तरकायकः ॥ ४ ॥
अर्धं कणाया अर्धकणा भिक्षातूर्यमत्रेष्टगम् ।
आपन्नजीविकस्तद्धत् द्वितीया चाधराश्रितः ॥ ५ ॥
वर्षभोग्यो वर्षभोग्यो धान्यार्थश्च तृतीयया ।
चतुर्थी स्याद्विष्णुबलिर्हरिकभौतिश्च पञ्चमी ॥ ६ ॥
राज्ञः पुमान् राजपुमान् षष्ठी तत्फलं तथा ।
सप्तमी चाक्षशौण्डोऽयमहितो नञ्समासकः ॥ ७ ॥
कर्मधारयः सप्तधा नीलोत्पलमुखाः स्मृताः ।
विशेषणपूर्वपदो विशेष्योत्तरतस्तथा ॥ ८ ॥
वैयाकरणखसूचिः शीतोष्णं द्विपदं शुभम् ।
उपमानपूर्वपदः शङ्खपाण्डर इत्यपि ॥ ९ ॥
उपमानोत्तरपदः पुरुषव्याघ्र इत्यपि ।
सम्भावनापूर्वपदो गुणहरिरितीष्टगम् ॥ १० ॥
गुण इति हरिर्वाच्या सुहृदेव सुबन्धुकः ।
अवधारणपूर्वपदो बहुव्रीहिश्च सप्तधा ॥ ११ ॥
द्विपदश्च बहुव्रीहिराकृढभवनो नरः ।
अर्चितानेषपूर्वोऽयं बहुकुधिः परिकीर्तितः ॥ १२ ॥
एते विप्रायोपदगाः सङ्ख्योत्तरपदस्त्वयम् ।
सङ्ख्योभयपदो यहदृहित्वा हेरकचयो नरः ॥ १३ ॥
सहपूर्वपदोऽयं स्यात् समूलोद्धृतकस्तरुः ।

व्यतिहारलक्षणार्थः केशाकेशि नखानखि ॥ १४ ॥
दिग्लक्ष्या स्याद्दक्षिणपूर्वा द्विगुराभाषितो द्विधा ।
एकवद्भावि द्विगुः पञ्चमूली खनेकधा ॥ १५ ॥
द्वन्द्वः समासो द्विविधो द्वीतरेतरयोगकः ।
रुद्रविष्णू समाहारो भेरीपटहमीदृगम् ॥ १६ ॥
द्विधाख्यातोऽव्ययीभावो नामपूर्वपदो यथा ।
शाकस्य मात्रा शाकप्रति यथाऽव्ययपूर्वकः ॥ १७ ॥
उपकुम्भ्वोपरथं प्राधान्येन चतुर्विधः ।
उत्तरपदार्थमुख्यो द्वन्द्वोभयमुख्यकः ।
पूर्वार्थेगोऽव्ययीभावो बहुव्रीहिश्च वाङ्मगः ॥ १८ ॥

इत्याग्नेये महापुराणे व्याकरणे समासो नाम चतुःपञ्चाश-
दधिकद्विशततमोऽध्यायः ।

अथ पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ।

तद्धितं ।

स्कन्द उवाच । तद्धितं विविधं वक्ष्ये सामान्यवृत्तिरीदृशी ।
ये व्यंसनो वत्सलः स्यादिलचि स्यात्तु फेनिलं ॥ १ ॥
सोमपः ये पामनो ने इलचि स्यात् पिच्छिलं ।
अणि प्राप्ते आर्शकः स्यात् दन्तादुरचि दन्तुरः ॥ २ ॥
रे स्यान्मधुरं सुश्रिरं रे स्यात् केशर ईदृशः ।

हिरण्यं ये मालवो वे वलचि स्याद्रजस्वलः ॥ ३ ॥
इनो धनी करी हस्ती धनिकं टिकनीरितं ।
पयस्वी विनि मायावी जर्णायुर्युचि ईरितं ॥ ४ ॥
वाग्मी मिनि आलचि स्याद्दाचालश्चाटचौरितं ।
फलिनो वर्हिणः केकी इन्दारकस्तथा कनि ॥ ५ ॥
आलुचि शीतत्र महते शीतालुः स्यालुरीदृशः ।
हिमालुरालुचि स्याच्च हिमं न सहते तथा ॥ ६ ॥
रूपं वातादुलचि स्याद् वातुलश्चानपत्यके ।
वाशिष्ठः कौरवो वासः पाञ्चालः सोस्य वासकः ॥ ७ ॥
तत्र वासी माथुरः स्याद्देत्यधीते च चान्द्रकः ।
व्युत्क्रमं वेत्ति क्रमकः नरश्चक्राम कौशिकः ॥ ८ ॥
प्रियङ्गूनां भवं क्षेत्रं प्रैयङ्गवीनकं खञि ।
मौद्गीनं कौद्रवीणञ्च वैदेहश्चानपत्यके ॥ ९ ॥
इञि दाक्षिर्दाशरथिः कचि नारायणादिकं ।
आश्वायनः स्याच्च फञि यचि गार्ग्यश्च वात्सकः ॥ १० ॥
ठकि स्याद्वैनतेयादिश्चाटकैरस्तथैरकि ।
ठकि गौधेरको रूपं गौधारश्चारकौरितं ॥ ११ ॥
क्षत्रियो घे कुलीनः खे एये कैरव्यादयः स्मृताः ।
यति मूर्द्धन्यमुख्यादिः सगन्धिरिति रूपकं ॥ १२ ॥
तारकादिभ्य इतनि नभस्तारकितादयः ।
अनङि स्याच्च कुरुङोश्च पुष्पधन्वसुधन्वनौ ॥ १३ ॥
चक्षुषि विस्तचक्षुः स्याद्दित्तमस्य च शब्दके ।
चणपि स्यात् केशचणः रूपे स्यात् षटरूपकम् ॥ १४ ॥

ईयसौ च पटीयान् स्यात् तरप्यन्ततरादिकम् ।
पचतितराञ्च तरपि तमप्यटतितमामपि ॥ १५ ॥
मृहीतमा कल्पपि स्यादिन्द्रकल्पोऽर्ककल्पकः ।
राजदेशीयो देशीये देश्ये देश्यादिरूपकम् ॥ १६ ॥
पटुजातीयो जातीये जानुमात्रञ्च मात्रचि ।
जरुहयमो हयमचि उरुदघ्नञ्च दघ्नचि ॥ १७ ॥
तयटि स्यात् पञ्चतयः दौवारिकष्ठकौरितं ।
सामान्यवृत्तिरुक्ताऽथ अव्ययाख्यश्च तद्धितः ॥ १८ ॥
यस्माद्यतस्तस्मिलि च यत्र तत्र त्रलौरितं ।
अस्मिन् काले ह्यधुनास्यादिदानीञ्चैव दान्यपि ॥ १९ ॥
सर्वस्मिन् सर्व्वदा दास्यात्तस्मिन्काले हिलौरितं ।
तर्हि हाऽस्मिन् काल इह कर्हि कस्मिंश्च कालके ॥ २० ॥
यथा थालि थमि कथं पूर्व्वस्यान्दिशि सञ्चयेत् ।
अस्ताति चैव पूर्व्वस्याः पूर्व्वादिग्रामणीयकाः ॥ २१ ॥
पुरस्तात् सञ्चरेद् गच्छेत् सद्यस्त्व्योऽहनीरितं ।
उति पूर्व्वाब्दे च परुत् पूर्व्वतरे परार्य्यपि ॥ २२ ॥
एषमोऽस्मिन् संवत्सरे रूपं समसि चेरितं ।
एद्यवौ परेद्यवि स्यात् परस्मिन्नहनीरितं ॥ २३ ॥
अद्यास्मिन्नहनि द्वे स्यात् पूर्व्वेद्युश्च तथेद्युमि ।
दक्षिणस्यान्दिशि वसेत् दक्षिणाहक्षिणाद्युभौ ॥ २४ ॥
उत्तरस्यान्दिशि वसेदुत्तराहुत्तरादुभौ ।
उपरि वसेदुपरिष्टाद् भवेद्रिष्टाति ऊर्ध्वकात् ॥ २५ ॥
उत्तरेण च पित्रोक्तं आचि च स्याच्च दक्षिणा ।

आहो दक्षिणाहि वसेद्विप्रकारं द्विधा च धा ॥ २६ ॥
ध्यमुञि चैकध्यं कुरु त्वं द्वैधन्यमुञि चेट्टगं ।
द्वौ प्रकारौ द्विधा धात्ति(१) आसुसुरतरं यथा(२)* ॥२७॥
निपातास्तद्विताः प्रोक्ताः तद्धितो भाववाचकः ।
पटोर्भावः पटुत्वन्त्वे पटुता तल्लिचेरितं ॥ २८ ॥
प्रथिमा चेमनि पृथोः सौख्यं सुखात् यजोरितम् ।
स्तेयं याति च स्तेनस्य ये सख्युः सख्यमीरितं ॥ २९ ॥
कपेर्भावस्य कापेयं सैन्यं पथ्यं यजोरितं ।
आख्यं कौमारकं चाणि रूपं चाणि च यौवनम् ।
आचार्य्यकं कणि प्रोक्तमेवमन्येपि तद्धिताः ॥ ३० ॥

इत्याग्नेये महापुराणे व्याकरणे तद्धितमिद्रूपं नाम
पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ।

अथ षट्पञ्चाशदधिकद्विशततमोऽध्यायः ।

उणादिसिद्धरूपम् ।

कुमार उवाच । उणादयोऽभिधास्यन्ते प्रत्यया धातुतः परे ।
उणि कारस्य शिल्पी स्यात् जायुर्मायुश्च पित्तकं ॥ १ ॥
गोमायुर्वायुर्वेदेषु वहुलं स्युरुणादयः ।

---

१ पाठोऽयं पीनरूक्षादोषेण दुष्टः ।
२ स्वयं सुहृत्तरा यथेति ज० । अमृतसरं यथेति ट० ।
* पाठोऽयं, एतत्पाठस्यान्यभिन्नपाठान्तरेषु न सम्यक् प्रतिभाति ।

आयुः स्वादुश्च हेत्याद्याः किंशारुर्धान्यशूकके ॥ २ ॥
ककवाकुः कुक्कुटः स्याद् गुरुर्भर्त्ता मरुस्तथा ।
शयुर्याजगरो ज्ञेयः स हरायुधमुच्यते ॥ ३ ॥
स्वरुर्वज्रं त्वपुरुषि समसारं फल्गुरीरितं ।
गृध्रश्च क्लनि किरचि मन्दिरं तिमिरं तमः ॥ ४ ॥
दृलचि सलिलं वारि कल्याणं भद्रिलं स्मृतं ।
बुधो विद्वान् क्रमो स्याच्च गिविरं गुप्तसंस्थितिः ॥ ५ ॥
ओनुर्विडालश्च तुनि अभिधानादुगादयः ।
कर्णः कामो च गृहभूर्वास्तुजवाचकः स्मृतः ॥ ६ ॥
अनड्वान् वहतेर्विनि स्याज्जातौ जीवार्णवौषधं ।
नौ वङ्गिरिनजि हरिणः मृगः कामो च भाजनम्(१)॥७॥
कम्बाजो भाजनश्चागड़ं सरगड़श्च चतुष्पदः ।
तरुरेरण्डः सङ्घातो वरुड़ः साम निर्भरं ॥ ८ ॥
स्फारं प्रभूतं स्याद्वान्तप्रत्यये चीरवल्कलं ।
कातरो भीरुरुग्रस्तु प्रचण्डो जवसं तृणं ॥ ९ ॥
जगच्चैव तु भूलींको क्रमान्तर्ज्योतिरर्कके ।
वर्व्वरः कुटिलो धूर्त्तश्चत्वरश्च चतुष्पथः ॥ १० ॥
चीवरं भिक्षुप्रावृत्तिरादित्यो मित्र ईरितः ।
पुत्रः सूनुः पिता तातः पृदाकुर्व्याघ्रसर्पयोः ।
गर्त्तोऽवटोऽथ भरतो नटोऽपरेऽप्युणादयः ॥ ११ ॥

इत्याग्नेये महापुराणे व्याकरणे उणादिसिद्धरूपं नाम षट्-पञ्चाशदधिकत्रिशततमोऽध्यायः ।

---

१ पाठोऽयं न सर्वासु प्रतिषु दृश्यते ।

अथ सप्तपञ्चाशदधिकत्रिशततमोऽध्यायः ।

———ooo———

तिङ्विभक्तिसिद्धरूपं ।

कुमार उवाच । तिङ्विभक्तिं प्रवक्ष्यामि तथादेशं समासतः ।
तिङस्त्रिष्वपि वर्त्तन्ते भावे कर्म्मणि कर्त्तरि ॥ १ ॥
सकर्म्मकाकर्म्मकाच्च कर्त्तरि द्विपदे स्मृताः ।
सकर्म्मकाकर्म्मणि च तदादेशस्तथेरितः ॥ २ ॥
वर्त्तमाने लडाख्यातो विध्याद्यर्थे लिङीरितः ।
विध्यादौ लोडाशिषि च भूतानद्यतने च लङ् ॥ ३ ॥
भूते लुङ्लिट् परोक्षेऽथ भाविन्यद्यतने च लृट् ।
लिङाशिषि च शेषेऽर्थे लृङ्भविष्यति लङ्भवेत् ॥ ४ ॥
लिङ्निमित्ते क्रियातिपत्तौ परे नवात्मनेपदम् ।
पूर्व्वं नव परस्मैपदन्तिप्तस्झीति प्रथमः पुमान ॥ ५ ॥
सिप्थस्थ मध्यमनरो मिप्वस्मस्चोत्तमः पुमान् ।
त आतां झन्तात्मने मुख्याः थासाथां ध्वञ्च मध्यमः ॥ ६ ॥
उत्तम इ वहि महि भूवाद्या धातवः स्मृताः ।
भूविरेधिः पचिर्नन्दिर्ग्रहिः अ सिः पदिस्वदिः ॥ ७ ॥
शीङः क्रीड़ा जुहोतिश्च जहातिश्च दधात्यपि ।
दीव्यतिः स्वपितिर्नहिः सुनोतिर्वसिरेव च ॥ ८ ॥
तुदिर्मृजतिर्मुञ्चतिः रुधिर्भुजिस्त्यजिस्तनिः ।
शवादिके विकरणे मनियैव करोत्यपि ॥ ९ ॥

क्रीड़तिर्ह्यङो यङ्हियोरिः पा नीरर्च्छिश नायकाः ।
भुवि स्यात् तिङ् भवति सः भवतस्तौ भवन्ति ते ॥ १० ॥
भवसि त्वं युवां भवथो यूयं भवथ चाप्यहं ।
भवाम्यावां भवावश्च भवामो ह्येधते कुलं ॥ ११ ॥
एधेते ह्वे तथैधन्ते एधसे त्वं हि मेधया ।
एधेथे च समेधध्वे एधे ह्येधावहे धिया ॥ १२ ॥
एधामहे हरेर्भक्त्या पचतीत्यादि पूर्ववत् ।
भूयतेऽनुभूयते ऽसौ भावे कर्म्मणि वै यकि ॥ १३ ॥
बुभूषति मनोत्येवं णिचि भावयतीश्वरं ।
यङि बोभूयते वाद्यं बोभोति स्याच्च यङ्लुकि ॥ १४ ॥
पुत्रीयति पुत्रकाम्यत्येवं पटपटायते ।
घटयत्यश्व मनि णिचि बुभूषयति रूपकं ॥ १५ ॥
भवेद्भवेताञ्च लिङि भवेयुश्च भवेः परे ।
भवेतञ्च भवेतैवं भवेयञ्च भवेव च भवेम च ॥ १६ ॥
एधेत एधेयातामेधेरन् मनसा स्त्रिया ।
एधेथाश्च एधेयाथामेधेध्वमेधेय एधेवहि एधेमहि ॥ १७ ॥
अस्तु तावद्भवतां लोटि भवन्तु भवताद्भव ।
भवतं भवत भवानि भवाव च भवाम च ॥ १८ ॥
एधतामेधेतामेधन्तामेधै पचावहै पचामहै ।
अभ्यनन्दत्पचतामचन्नपचन्तथा ॥ १९ ॥
अभवतमभवतापचमपचावापचाम च ।
ऐधतैधेतामैधध्वं ऐधे चैधामहीरितं ॥ २० ॥
अभूदभूतामभवन्भूश्चाभूवमेव लुङ् ।

ऐधिष्टैधिषातां नरावैधिष्ठा ऐधिषीष्टग्वं ॥ २१ ॥
लिटि बभूव बभूवतुः बभूवुश्च बभूविथ ।
बभूवथुर्बभूव च बभूविव बभूविम ॥ २२ ॥
पेचे पेचाते पेचिरे त्वमेधाश्चक्रषे तथा ।
एधाञ्चक्राथे पेचिध्वे पेचे पेचिमहे तथा ॥ २३ ॥
लुटि भविता भवितारौ भवितारो हरादयः ।
भवितासि भवितास्थो भवितास्मस्तथा वयं ॥ २४ ॥
पक्ता पक्तारौ पक्तारः पक्तासे त्वं शुभोदनं ।
पक्ताध्वे पक्ताहे चाहं पक्तास्महे हरेरगृं ॥ २५ ॥
लिङाशिषि सुखं भूयात् भूयास्तां हरिगङ्गरौ ।
भूयासुस्ते च भूयास्त्वं युवां भूयास्तमोखरौ ॥ २६ ॥
भूयास्त यूयं भूयासमहं भूयास्म सर्व्वदा ।
यच्चोष्टास्यैधिषीयास्तां यंचौरन्नैधिसीय च ॥ २७ ॥
यच्चीवास्यैधिसीमहि लिङि चायष्यतेति लृङ् ।
अयक्ष्येतामयक्ष्यन्तायक्ष्येऽयक्ष्येथां युवां ॥ २८ ॥
अयक्ष्यध्वमैधिष्यावास्यैधिष्यामास्यारेर्वयम् ।
लृटि स्याङ्विष्यतीति एधिष्यामास्य ईट्टयम् ॥ २९ ॥
एवं विभावयिष्यन्ति बोभविष्यति रूपकं ।
घटयेत् पटयेत्तद्वत् पुचीयति च काम्यति ॥ ३० ॥

इत्याग्नेये महापुराणे व्याकरणे तिङन्तिबरूपं नाम
सप्तपञ्चाशदधिकत्रिशततमोऽध्यायः ।

अथाष्टपञ्चाशदधिकत्रिशततमोऽध्यायः ।

कृत्सिद्धरूपम् ।

कुमार उवाच । कृतस्त्रिष्वपि विज्ञेया भावे कर्म्मणि कर्त्तरि ।
अज्ल्युट् क्तिन् घञा भावे युजकारत एव च । १ ॥
अचि धर्म्मस्य विनय उत्करः प्रकरस्तथा ।
देवो भद्रः श्रीकरश्च ल्युटि रूपन्तु शोभनम् ॥ २ ॥
क्तिनि स्तुतिस्तुतिमतौ घञि भावोऽथ यद्यपि ।
कारणा भावनेत्यादि अकारे च चिकित्सया ॥ ३ ॥
तथा तव्यो ह्यनीयश्च कर्त्तव्यं करणीयकम ।
देयं ध्येयस्त्वेव यति ण्यति कार्य्यश्च कृत्यकाः ॥ ४ ॥
कर्त्तरि क्तादयो ज्ञेया भावे कर्म्मणि च क्वचित् ।
गतो ग्रामं गतो ग्राम आश्लिष्टश्च गुरुस्त्वया ॥ ५ ॥
शतृङ् शानचौ भवन् एधमानौ भवन्त्यपि ।
युग् ल्युटौ सर्व्वधातुभ्यो भावको भविता तथा ॥ ६ ॥
क्वसुस्तश्च स्वयम्भूश्च भूतें लिटः कनस् कान च ॥
बभूविवान् पेचिवांश्च पेचानः शब्दकाः ॥ ७ ॥
अणि स्युः कुम्भकाराद्या भूतेष्वुणादयः स्मृताः ।
वायुः पायुश्च कारुः स्याद्बहुलं छन्दसीरितं ॥ ८ ॥

इत्याग्नेये महापुराणे व्याकरणे कृत्सिद्धरूपं नामाष्टपञ्चाशदधिकत्रिशततमोऽध्यायः ।

अथोनषष्ट्यधिकत्रिशततमोऽध्यायः ।

———ooo———

स्वर्गपातालादिवर्गाः ।

अग्निरुवाच । स्वर्गादिनामलिङ्गो यो हरिस्तं प्रवदामि ते ।
स्वःस्वर्गनाकत्रिदिवा द्यौर्द्यो हे त्रिपिष्टपं ॥ १ ॥
देवा वृन्दारका लेखा ऋद्धाद्या गणदेवताः ।
विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः ॥ २ ॥
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ।
देवद्विषोऽसुरा दैत्याः सुरतः स्यात्तथागतः ॥ ३ ॥
ब्रह्मात्मभूः सुरज्येष्ठो विष्णुर्नारायणो हरिः ।
रेवतीशो हली रामः कामः पञ्चशरः स्मरः ॥ ४ ॥
लक्ष्मीः पद्मालया पद्मा सर्व्वः सर्व्वेश्वरः शिवः ।
कपर्दोऽस्य जटाजूटः पिनाकोऽजगवस्त्वनः ॥ ५ ॥
प्रमथाः स्युः पारिषदा मृडानी चण्डिकाऽम्बिका ।
हैमातुरो गजास्यश्च सेनानीरग्निभूर्गुहः ॥ ६ ॥
आखण्डलः सुनासीरः सूत्रामाणौ दिवस्पतिः ।
पुलोमजा शचीन्द्राणी देवी तस्य तु वल्लभा ॥ ७ ॥
स्यात् प्रासादो वैजयन्तो जयन्तः पाकशासनिः ।
ऐरावतेऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ८ ॥
क्रूरादिनो वज्रमस्त्री स्यात् कुलिशभिदुरं पविः ।
व्योमयानं विमानोऽस्त्री पीयूषममृतं सुधा ॥ ९ ॥

स्यात् सुधर्मा देवसभा स्वर्गङ्गा सुरदीर्घिका ।
स्त्रियां बहुच्वप्सरसः स्वर्वेश्या उर्व्वशीमुखाः ॥ १० ॥
हाहा हूहूश्च गन्धर्व्वा अग्निर्वह्निर्धनञ्जयः ।
जातवेदाः कृष्णवर्त्मा आशयाशश्च पावकः ॥ ११ ॥
हिरण्यरेताः समार्चिः शुक्रश्चैवाशुशुक्षणिः ।
शुचिरप्पित्तमौर्व्वस्तु वाडवो वडवानलः ॥ १२ ॥
वह्नेर्ज्वालाऽर्च्चिरुल्कायां विस्फुलिङ्गोऽग्निकणो धर्म्मराजः परेतराट् ॥ १३ ॥
कालोऽन्तको दण्डधरः श्राद्धदेवोऽथ राक्षसः ।
कौणपाशुभक्रव्यादा यातुधानाश्च नैर्ऋतिः ॥ १४ ॥
प्रचेता वरुणः पाशी यसनः सपर्शनोऽनिलः ।
सदागतिर्मातरिश्वा प्राणी मरुत् समीरणः ॥ १५ ॥
जवो रंहस्तरस्वी तु लघुश्चित्रमरन्तुतम् ।
सत्वरं चपलं तूर्णमविलम्बितमाशु च ॥ १६ ॥
सततेऽनारताश्रान्तसन्ततानिरतानियं ।
नित्यानवरताजस्रमप्यथातिग्रयो भरः ॥ १७ ॥
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ।
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ॥ १८ ॥
गुह्यकेशो यक्षराजो राजराजो धनाधिपः ।
स्यात् किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ॥ १९ ॥
निधिर्न्ना नेवधिर्व्योम त्वभ्रं पुष्करमम्बरम् ।
द्यौर्दिवौ चान्तरीक्षं खं काष्ठाशाककुभौ दिशः ॥ २० ॥
अभ्यन्तरस्त्वन्तरः स्याच्चक्रवाडस्तु मण्डलं ।

तडित्वान् वारिदो मेघस्तनयित्नुर्बलाहकः ॥ २१ ॥
कादम्बिनी मेघमाला स्तनितं गर्जितं तथा ।
अभ्राभ्रतडिदाद्यादित्यैरावत्यः क्षणप्रभाः ॥ २२ ॥
तडित्सौदामिनी विद्युच्चञ्चला चपलाऽपि च ।
स्फुर्जथुर्वज्रनिष्पेषो वृष्टिघातस्त्ववग्रहः ॥ २३ ॥
धारा सम्पात आसारः शीकरोऽम्बुकणाः स्मृताः ।
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनं ॥ २४ ॥
अन्तर्धा व्यवधा पुंसि त्वन्तर्द्विरपवारणं ।
अपिधानतिरोधानविधानच्छदनानि च ॥ २५ ॥
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
विधुः कुमुदबन्धुश्च विम्बोऽस्त्री मण्डलं त्रिषु ॥ २६ ॥
कला तु षोडशो भागो भित्तं शकलखण्डके ।
चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ॥ २७ ॥
लक्षणं लक्ष्मकं चिह्नं शोभा कान्तिर्द्युतिश्छविः ।
सुषमा परमा शोभा तुषारस्तुहिनं हिमं ॥ २८ ॥
अवश्यायस्तु नीहारः प्रालेयः शिशिरो हिमः ।
नक्षत्रमृक्षं भत्तारा तारका प्युडु वा स्त्रियां ॥ २९ ॥
गुरुर्जीव आङ्गिरस उशना भार्गवः कविः ।
विधुन्तुदस्तमो राहुर्ग्रहं राह्युदयः स्मृतः ॥ ३० ॥
समर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।
हरिदश्वस्तमःपूषा मणिर्ग्रहिरो रविः ॥ ३१ ॥
परिवेषस्तु परिधिरपसूर्यकमण्डले ।
किरणोऽस्रमयूखांशुगभस्तिर्हरिदश्वयः ॥ ३२ ॥

भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियां ।
स्युः प्रभा रयुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ॥ ३३ ॥
रोचिः ग्रोचिरुभे क्लीवे प्रकाशो द्योत आतपः ।
कोष्णं कवोष्णं मन्दोष्णं कटुष्णं त्रिषु तद्वति ॥ ३४ ॥
तिग्मं तीक्ष्णं खरं तद्वद्दृष्टोऽनेहा च कालकः ।
घस्रो दिनाह्नी चैव सायंसन्ध्या पितृप्रसूः ॥ ३५ ॥
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्यूषसी अपि ।
प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यमथ गर्व्वरी ॥ ३६ ॥
यामी तमी तमिस्रा च ज्योत्स्नी चन्द्रिकयान्विता ।
आगामिवर्त्तमानाह्न्यर्युक्तायां निशि पत्निणी ॥ ३७ ॥
अर्द्धरात्रनिशीथौ द्वौ प्रदोषो रजनीमुखं ।
स पर्व्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥ ३८ ॥
पञ्चान्तो पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ।
कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥ ३९ ॥
अमावास्या त्वमावस्या दर्शः सूर्य्येन्दुसङ्गमः ।
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ॥ ४० ॥
संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।
कल्मषं दुरितं दुष्कृतं पापं किल्बिषमंहोदुरितदुष्कृतम् ॥ ४१ ॥
स्वाधर्म्यमस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।
सुप्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ॥ ४२ ॥
स्यादानन्दथुरानन्दः शर्म्मशातसुखानि च ।
शुभः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ ४३ ॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियां ।

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥ ४४ ॥
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियां ।
हेतुर्नी कारणं बीजं निदानं त्वादिकारणम् ॥ ४५ ॥
चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।
बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ॥ ४६ ॥
प्रेक्षोपलब्धिश्चित्सम्बित्प्रतिपज्ज्ञप्तिश्चेतना ।
धीर्धारणावती मेधा सङ्कल्पः कर्म मानसं ॥ ४७ ॥
सङ्ख्या विचारणा चर्चा विचिकित्सा तु संशयः ।
अध्याहारस्तर्क ऊहः समौ निर्णयनिश्चयौ ॥ ४८ ॥
मिथ्यादृष्टिर्नास्तिकता भ्रान्तिर्मिथ्याप्रतिभ्रमः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ४९ ॥
मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
मुक्तिः कैवल्यनिर्व्वाणश्रेयोनिःश्रेयसामृतं ॥ ५० ॥
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहन्मतिः स्त्रियां ।
विमर्दोत्थे परिमलो गन्धे जनमनोहरे ॥ ५१ ॥
आमोदः सोऽतिनिर्हारी सुरभिर्घ्राणतर्पणः ।
शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डराः ॥ ५२ ॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥ ५३ ॥
कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ॥ ५४ ॥
रोहितो लोहितो रक्तः शोणः कोकनदच्छविः ।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥ ५५ ॥

श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्गपिशङ्गौकटुपिङ्गलौ ॥ ५६ ॥
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।
व्याहार उक्तिर्लपितमपभ्रंशोऽपशब्दकः ॥ ५७ ॥
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ।
इतिहासः पुरावृत्तं पुराणं पञ्चलक्षणं ॥ ५८ ॥
आख्यायिकोपलब्धार्था प्रबन्धः कल्पना कथा ।
समाहारः संग्रहस्तु प्रवह्लिका प्रहेलिका ॥ ५९ ॥
समस्या तु समासार्था स्मृतिस्तु धर्ममंहिता ।
आख्याने चाभिधानञ्च वार्त्ता वृत्तान्त ईरितः ॥ ६० ॥
स्मृतिराकारणाद्ज्ञानमुपन्यासस्तु वाङ्मुखं ।
विवादो व्यवहारः स्यात् प्रतिवाक्योत्तरे समे ॥ ६१ ॥
उपोद्घात उदाहारो ह्यथ मिथ्याभिसंगनम् ।
अभिशापो यशः कीर्त्तिः प्रश्नः पृच्छानुयोगकः ॥ ६२ ॥
आम्रेडितं द्विरुक्तं कुत्सानिन्दे च गर्हणे ।
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥ ६३ ॥
अनुलापो मुहुर्भाषा विलापः परिदेवनं ।
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ॥ ६४ ॥
सुप्रलापः सुवचनमपलापस्तु निह्नवः ।
उपतापी वाग्कल्याणो मङ्गलं हृदयङ्गमं ॥ ६५ ॥
अत्यर्थमधुरं साम्त्वमनर्घं स्यादनर्थकं ।
निष्ठुराश्लीलपरुषं ग्राम्यं वै सुनृतं प्रिये ॥ ६६ ॥
सत्यं तथ्यमृतं सम्यङ्नादनिस्वाननिस्वनाः ।

झारवारावसंरावविरावा अथ मर्म्मरः ॥ ६७ ॥
स्वनिते वल्लपर्णानां भूषणानान्तु शिञ्जितं ।
वीणाया निक्वणः क्वाणः तिरश्चां वाशितं रुतं ॥ ६८ ॥
कोलाहलः कलकलो गीतं गानमिमे समे ।
स्त्री प्रतिश्रुत् प्रतिध्वाने तन्त्रीकण्ठाविसादकः ॥ ६९ ॥
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्वयस्विषु ॥ ७० ॥
समन्वितलयस्वे कतालौ वीणा तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ७१ ॥
ततं वीणादिकं वाद्यमानद्धं मुरजादिकं ।
वंश्यादिकन्तु शुषिरं कांस्यतालादिकं घनं ॥ ७२ ॥
चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं ।
मृदङ्गा मुरजा भेदास्त्वङ्गालिङ्गोऽर्द्धकास्त्रयः ॥ ७३ ॥
स्याद्यशःपटहो टक्का भेर्य्यामानकदुन्दुभिः ।
आनकः पटहो भेदा झर्झरीडिण्डिमादयः ॥ ७४ ॥
मर्दलः पणवस्तुल्यो क्रियामानन्तु तालकः ।
लयः साम्यं ताण्डवन्तु नाट्यं लास्यञ्च नर्त्तनं ॥ ७५ ॥
तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ।
राजा भट्टारको देवः साभिषेका च देव्यपि ॥ ७६ ॥
शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रे च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ ७७ ॥
उत्साहवर्द्धनो वीरः कारुण्यं करुणा कृपा ।
क्षमा दया चानुकम्पाऽप्यनुक्रोशोऽप्यथो घृणः ॥ ७८ ॥

हासो हास्यञ्च वीभत्सं विकृतं चिच्चिदं हयं ।
विस्मयोऽद्भुतमाश्चर्य्यं चित्रमप्यथ भैरवं ॥ ६६ ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकं ।
भयङ्करं प्रतिभयं रौद्रन्त्वग्रमसौ त्रिषु ॥ ६७ ॥
चतुर्ष्वग्र दरत्रासौ भीतिर्भी: साध्वसम्भयं ।
विकारी मानसो भावोऽनुभावो भावबोधन: ॥ ६८ ॥
गर्व्वोऽभिमानोऽहङ्कारी मानश्चित्तसमुन्नति: ।
अनादर: परिभव: परिभावस्तिरस्क्रिया ॥ ६९ ॥
व्रीडा लज्जा त्रपा स्त्री: स्यादभिधानं धने स्पृहा ।
कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलं ॥ ७० ॥
स्त्रीणां विलासविब्बोकविभ्रमा ललितन्तथा ।
हेला लीलेत्यमी हावा: क्रिया: शृङ्गारभावजा: ॥ ७१ ॥
द्रवकेलिपरीहासा: क्रीड़ा लीला च कूर्दनं ।
स्यादाकुरितकं हास: सोत्प्रास: समनाक्स्मितं ॥ ७२ ॥
अधोभुवनपातालं च्छिद्रं ग्रभ्रं वपा शुषि: ।
गर्त्तावटौ भुवि ग्रभ्रे तमिस्रन्तिमिरं तम: ॥ ७३ ॥
सर्प: पृदाकुर्भुजगो दन्दशूको विलेशय: ।
विषं क्ष्वेडञ्च गरलं निरयो दुर्गति: स्त्रियां ॥ ७४ ॥
पय: कीलालममृतमुदकं भुवनं वनं ।
भङ्गस्तरङ्ग ऊर्म्मिर्व्वा कल्लोलोलकौ च तौ ॥ ७५ ॥
पृषन्तिबिन्दुपृषता: कूलं रौधश्य तीरकं ।
तोयोत्थितं तत् पुलिनं जम्बालं पङ्ककर्दमौ ॥ ७६ ॥
जलौच्छासा: परीवाहा: कूपकास्तु विदारका: ।

आतरस्तरपण्यं स्यादृद्रोणी काष्ठाम्बुवाहिनी ॥ ७७ ॥
कलुषस्याविलोऽच्छस्तु प्रसन्नोऽथ गभीरकं ।
अगाधं दासकीवर्त्तौ शम्बूका जलशुक्तयः ॥ ७८ ॥
सौगन्धिकन्तु कह्लारं नीलमिन्दीवरं कजं ।
स्यादुत्पलं कुवलयं सिते कुमुदकैरवे ॥ ७९ ॥
शालूकमेषां कन्दः स्यात् पद्मं तामरसङ्कजं ।
नीलोत्पलं कुवलयं रक्तं कोकनदं स्मृतम् ॥ ८० ॥
करहाटः शिफा कन्दं किञ्जल्कः केशरोऽस्त्रियां ।
खनिः स्त्रियामाकरः स्यात् पादाः प्रत्यन्तपर्व्वताः ॥८१॥
उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ।
स्वर्गपातालवर्गाद्या उक्ता नानार्थकान् शृणु ॥ ८२ ॥

इत्याग्नेये महापुराणे स्वर्गपातालादिवर्गो नामोनषष्ट्यधिकत्रिशततमोऽध्यायः ।

अथ षष्ट्यधिकत्रिशततमोऽध्यायः ।

अव्ययवर्गः ।

अग्निरुवाच । आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ।
आ प्रगल्भः स्मृतौ वाक्ये ऽप्याप्तः स्यात् कोपपीड़योः ॥१॥
पापकुत्सेषदर्थे कु धिग्जुगुप्सननिन्दयोः ।
चाम्बाचयसमाहारेतरेतरसमुच्चये ॥ २ ॥

खल्वाशीःक्षेमपृच्छादौ प्रकर्षे लङ्नेऽप्यति ।
क्षित्प्रश्ने च वितर्के च तु स्यान्नेदेऽवधारणे ॥ ३ ॥
सकृत्सङ्केकवारे स्यादाराद्दूरसमीपयोः ।
प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः ॥ ४ ॥
पुनःसदृशार्थयोः शश्वत् साक्षात् प्रत्यक्षतुल्ययोः ।
खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत ॥ ५ ॥
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।
प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ॥ ६ ॥
हेतौ प्रकरणे प्रकाश्यादिसमाप्तिषु ।
प्राच्यां पुरस्तात् प्रथमे पुरार्धेऽग्रत इत्यपि ॥ ७ ॥
यावत्तावच्च साकल्येऽवधौ माने ऽवधारणे ।
मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोत च ॥ ८ ॥
वृथा निरर्थकाविध्योर्नानाऽनेकोभयार्थयोः ।
नु पृच्छायां विकल्पे च पश्चात्माद्दश्ययोरनु ॥ ९ ॥
प्रश्नावधारणानुज्ञाऽनुनयामन्त्रणे ननु ।
गर्हासमुच्चयप्रश्नयङ्कासम्भावनास्वपि ॥ १० ॥
उपमायां विकल्पे वा सामित्यर्धे जुगुप्सिते ।
अमा सह समीपे च कं वारिणि च मूर्द्धनि ॥ ११ ॥
इवेत्यथमर्थयोरेवं नूनं तर्केऽर्थनिश्चये ।
तूष्णीमर्थे सुखे जोषं किम्पृच्छायां जुगुप्सने ॥ १२ ॥
नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने ।
अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ॥ १३ ॥

हूं वितर्के परिप्रश्ने समयाऽन्तिकमध्ययोः ।
पुनरप्रथमे भेदे निर्निश्चयनिषेधयोः ॥ १४ ॥
स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ।
उरर्यु री चोररी च विस्तारेऽङ्गीकृते चयम् ॥ १५ ॥
स्वर्गे परे च लोके स्वर्वार्त्तासम्भावयोः किल ।
निषेधवाक्यालङ्कारे जिज्ञासावमरे(१) खलु ॥ १६ ॥
समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः ।
नामप्रकाशयोः प्रादुर्मिथोऽन्योन्यं रहस्यपि ॥ १७ ॥
तिरोऽन्तर्धौ तिर्यगर्थे हा विषादशुगर्त्तिषु ।
अहहेत्यद्भुते खेदे हि हेताववधारणे ॥ १८ ॥
चिराय चिररात्राय चिरस्याद्याधिरार्थकाः ।
मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समाः ॥ १९ ॥
स्वाग्झटित्यञ्जसाङ्गाय सपदि द्राङ्झडु च द्रुते ।
बलवत् सुष्ठु किमुत विकल्पे किं किमूत च ॥ २० ॥
तु हि च स्म ह वै पादपूरणे पूजनेऽपि च ।
दिवाऽक्ष्णीत्यथ दोषा च नक्तञ्च रजनाविति ॥ २१ ॥
तिर्यगर्थे साचि तिरोऽप्यथ सम्बोधनार्थकाः ।
स्युः प्याट्पाडङ्ग हे हे भोः समया निकषा हिरुक् ॥२२॥
अतर्किते तु सहसा स्यात् पुरः पुरतोऽग्रतः ।
स्वाहा देवहविर्दाने ओषट् वौषट् वषट् स्वधा ॥ २३ ॥
किञ्चिदीषन्मनागल्पे प्रेत्याऽमुत्र भवान्तरे ।

---

१ जिज्ञाषाहुनथ इति अ० ।

यथा तथा चैव साम्ये अहो हो इति विस्मये ॥ २४ ॥
मौने तु तूष्णीं तूष्णीकं सद्यः सपदि तत्क्षणे ।
दिष्ट्या शमुपयोषञ्चेत्यानन्देऽथान्तरेऽन्तरा ॥ २५ ॥
अन्तरेण च मध्ये स्यः प्रमाद्य तु हटार्थकम् ।
युक्ते हे साम्प्रतं स्थानेऽभीक्ष्णं शश्वदनारते ॥ २६ ॥
अभावे नञ्जनो नापि माऽम्म मालञ्च वारणे ।
पक्षान्तरे चेद्यदि च तत्त्वे त्वऽडाऽङ्क्षमा हयम् ॥ २७ ॥
प्राकाश्ये प्रादुराविः स्यादीमेवं परमं मते ।
समन्ततस्तु परितः सर्वतो विश्वगित्यपि ॥ २८ ॥
अकामानुमतौ काममभ्युपगमेऽस्तु च ।
ननु च स्याद्विरोधोक्तौ कचित् कामप्रवेदने ॥ २९ ॥
निःषमं दुःषमं गर्ह्यं यथास्वन्तु यथायथं ।
मृषा मिथ्या च वितथे यथार्थन्तु यथातथं ॥ ३० ॥
स्युरेवन्तु पुनर्वैत्यवधारणवाचकाः ।
प्रागतीतार्थकं नूनमवश्यं निश्चये हयं ॥ ३१ ॥
संवत्सरेऽवरे त्वर्वागामिवं स्वयमात्मना ।
अल्पे नीचैर्महत्युच्चैः प्रायोभूम्नाऽद्भुते ग्रनैः ॥ ३२ ॥
सना नित्ये बहिर्वाह्ये स्रातीतेऽस्तमदर्शने ।
अस्ति सत्त्वे रुषोक्तावूमुं प्रत्येऽनुमये त्वयि ॥ ३३ ॥
ह्यः तर्के स्यादुषा रात्रेरवसाने नमो नतौ ।
पुनरर्थेऽङ्गनिन्दायां दुष्ठु सुष्ठु प्रशंसने ॥ ३४ ॥
सायं साये प्रगे प्रातः प्रभाते निकषाऽन्तिके ।
परुत्परार्थ्यसमोऽब्दे पूर्वे पूर्वतरे यति ॥ ३५ ॥

अथात्राङ्कास्थ पूर्वेङ्कीत्यादौ पूर्वोत्तरा परात् ।
तथाऽधरान्यान्यतरेतरात्पूर्वेद्युरादयः ॥ ३५ ॥
उभयद्युश्चोभयेद्युः परे त्वङ्कि परेद्यवि । ।
स्त्री गतेऽनागतेऽङ्कि स्वः परस्वः स्वःपरेऽह्नि । ॥ ३७ ॥
तदा तदानीं युगपदेकदा सर्वदा सदा । ।
एतर्हि सम्प्रतीदानीमधुना साम्प्रतन्तथा ॥ ३८ ॥

इत्याग्नेये महापुराणे अव्ययवर्गो नाम षष्ट्यधिक-
त्रिशततमोऽध्यायः ।

अथैकषष्ट्यधिकत्रिशततमोऽध्यायः ।

नानार्थवर्गाः ।

अग्निरुवाच । आकाशे त्रिदिवे नाकौ लोकस्तु भुवने जने ।
पद्ये यशसि च श्लोकः शरे खड्गे च सायकः ॥ १ ॥
आनकः पटहो भेरौ कलशोऽपापदार्ययोः ।
मारुते वेधसि ब्रह्मे पुंसि कः कं शिरोऽम्बुनोः ॥ २ ॥
स्यात् पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ।
मङ्केन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः ॥ ३ ॥
शालाद्यको कविख्यातौ मानं स्यान्मितिसाधनं ।
सर्गः स्वभावनिर्मोचनिषयाध्यायसृष्टिषु ॥ ४ ॥
योगः सङ्गतनोपायध्यानसङ्गतिदुक्तिषु ।

भोगः सुखे स्त्र्यादिभृतावहौ शङ्कनिशाकरौ ॥ ५ ॥
काके भगण्डो करटो दुरात्मा गिरिविष्टकः ।
रिष्टं क्षेमाशुभाभावैष्वरिष्टे तु शुभाऽशुभे ॥ ६ ॥
व्युष्टिः फले समृद्धौ च दृष्टिर्ज्ञानेऽक्षि दर्शने ।
निष्ठानिष्पत्तिनाशान्ताः काष्ठोत्कर्षे स्थितौ दिशि ॥ ७ ॥
भूगोवाचस्त्विड़ा इलाः प्रगाढ़ं भृशलक्ष्वयोः ।
भृशप्रतिज्ञयोर्वाढं शूलस्थूलौ दृढौ त्रिषु ॥ ८ ॥
विन्यस्तसंहतौ व्यूढौ क्षणो व्यासेऽर्जुने हरौ ।
पणौ द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ९ ॥
मौर्व्यां द्रव्याश्रिते सत्वशुक्लसन्ध्यादिके गुणः ।
ज्येष्ठेऽधिपे ग्रामणीः स्यात् जुगुप्साकरुणे घृणे ॥ १० ॥
तृष्णा स्पृहापिपासे हे विपणिः स्याद्वणिक्पथे ।
विषाभिमरलोहेषु तीक्ष्णं क्लीवे खरे त्रिषु ॥ ११ ॥
प्रमाणं हेतुमर्य्यादाज्ञास्त्रेयत्तासमाहृषु ।
करणं क्षेत्रगात्रादावीरिणं शून्यमूषरं ॥ १२ ॥
यत्ता हस्तिपके सूते वह्निज्वाला च हेतयः ।
श्रुतं शास्त्रावधृतयोर्यु गैपर्य्यायमयोः क्लतं ॥ १३ ॥
ख्याते दृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ।
विविक्तो पूतविजनौ मूर्च्छितौ मूढसोच्छ्रयौ ॥ १४ ॥
अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।
निदानागमयोस्तीर्थमृषिजुष्टजले गुरौ ॥ १५ ॥
प्राधान्ये राजलिङ्गे च वृषाङ्के ककुदोऽस्त्रियां ।
स्त्री सम्विज्ज्ञानसभाशक्तियाकाराजिनासु ॥ १६ ॥

धर्म्मे रहस्युपनिषत् स्याद्दतौ वत्सरे शरत् ।
पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ॥ १७ ॥
त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ।
सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ॥ १८ ॥
विधिर्विधाने दैवेऽपि प्रणिधिः प्रार्थने चरैः ।
वधूर्जाया स्नुषा स्त्री च सुधालेपोऽमृतं स्नुही ॥ १९ ॥
स्पृहा सम्प्रत्ययः श्रद्धा पण्डितम्मन्यगर्व्वितौ ।
ब्रह्मबन्धुरधिक्षेपे भानू रश्मिदिवाकरौ ॥ २० ॥
ग्रावाणौ शैलपाषाणौ मूर्खनीचौ पृथग्जनौ ।
तरुशैलौ शिखरिणौ तनुस्त्वग्देहयोरपि ॥ २१ ॥
आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्त्म च ।
उत्थानं पौरुषे तन्त्रे व्युत्थानं प्रतिरोधने ॥ २२ ॥
निर्य्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।
व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥ २३ ॥
मृगयाद्यो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्य्यत्रिकं त्रयाटा च कामजो दशको गणः ॥ २४ ॥
पैशून्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डश्चैव पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ २५ ॥
अकर्म्मगुह्ये कौपीनं मैथुनं सङ्गतौ रतौ ।
प्रधानं परमार्था धीः प्रज्ञानं बुद्धिचिद्भयोः ॥ २६ ॥
क्रन्दने रोदनाह्वाने वर्ष्म देहप्रमाणयोः ।
आराधनं साधने स्यादवासो तोषणेऽपि च ॥ २७ ॥
रत्नं स्वजातिश्रेष्ठेऽपि लक्ष्म चिह्नप्रधानयोः ।

कलापो भूषणे वर्हे तूणीरे संहतेऽपि च ॥ २८ ॥
तल्पं शय्याट्टदारेषु डिम्भो तु शिशुबालिशौ ।
स्तम्भौ स्थूणाजड़ौभावौ सभ्ये संसदि वै सभा ॥ २९ ॥
किरणप्रग्रहौ रश्मी धर्म्माः पुण्ययमादयः ।
ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ॥ ३० ॥
प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ।
समयाः शपथाचारकालसिद्धान्तसंविदः ॥ ३१ ॥
अत्ययोऽतिक्रमे क्षच्छ्रे सत्यं शपथतथ्ययोः ।
वीर्य्यं बलप्रभावौ च रूप्यं रूपे प्रशस्तके ॥ ३२ ॥
दुरोदरो द्यूतकारे पणे द्यूते दुरोदरं ।
महारण्ये दुर्गपथे कान्तारः पुन्नपुंसकं ॥ ३३ ॥
यमानिलेन्द्रचन्द्रार्कविष्णुसिंहादिके हरिः ।
दरोऽस्त्रियां भये श्वभ्रे जठरः कठिनेऽपि च ॥ ३४ ॥
उदारो दातृमहतोरितरस्त्वन्यनीचयोः ।
चूड़ा किरीटं केशाश्च संयता मौलयस्त्रयः ॥ ३५ ॥
बलिः करोपहारादौ सैन्यस्थैर्य्यादिके बलं ।
श्लोकटीवस्त्रबन्धेऽपि नीवी परिषणेऽपि च ॥ ३६ ॥
शुक्ले मूषिके श्रेष्ठे सुकृते द्युपभे द्वयः ।
द्यूताङ्गे सारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये ॥ ३७ ॥
ना द्यूताङ्गे च कर्षे च व्यवहारे कलिद्रुमे ।
उष्णीषः स्यात् किरीटादौ कूर्पूः कुल्याभिधायिनी ॥ ३८ ॥
प्रत्यक्षेऽधिकृतेऽध्यक्षः सूर्य्यवह्नौ विभावसू ।
शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः ॥ ३९ ॥

तेजःपुरीषयोर्वर्च्चं आगः पापापराधयोः ।
छन्दः पद्येऽभिलाषे च साधीयान् साधुवाढ्योः ।
व्यूढो हृद्येऽप्यहिर्दृष्टे ऽप्यग्नीन्द्रार्कास्त्रमोनुदः ॥ ४० ॥

इत्याग्नेये महापुराणे नानार्थवर्गो नामैक-
षष्ट्यधिकत्रिशततमोऽध्यायः ।

अथ द्विषष्ट्यधिकत्रिशततमोऽध्यायः ।

भूमिवनौषध्यादिवर्गाः ।

अग्निरुवाच । वक्ष्ये भूपुराद्रिवनौषधिसिंहादिवर्गकान् ।
भूरनन्ता क्षमा धात्री क्ष्माप्याकुः स्याद्वरित्रपि ॥ १ ॥
मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
जगत्निपिष्टपं लोकं भुवनं जगती समा ॥ २ ॥
अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्त्तन्येकपदीति च ॥ ३ ॥
पूः स्त्री पुरीनगर्य्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥ ४ ॥
तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।
आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ ५ ॥
रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियां ।
प्राकारो वरणः शालः प्राचीरं प्रान्तरो हृतिः ॥ ६ ॥

भित्तिः स्त्री कुड्यमेडूकं यद्दन्तनखकीकसं ।
वासः कूटो द्वयोः शाला सभा सङ्भवनस्त्विदम् ॥ ७ ॥
चतुःशालं मुनीनान्तु पर्णशालोटजोऽस्त्रियां ।
चैत्यमायतनन्तुल्ये वाजिशाला तु मन्दुरा ॥ ८ ॥
हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां ।
स्त्री द्वारार्गलं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥ ९ ॥
कपोतपालिकायान्तु विटङ्कं पुंनपुंसकं ।
कवाटमवरन्तुल्ये निःश्रेणिस्त्वधिरोहिणी ॥ १० ॥
सम्मार्जनी शोधनी स्यात् सङ्करोऽवकरस्तथा ।
अद्रिर्गोत्रगिरिर्नगो गहनं काननं वनं ॥ ११ ॥
आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितं ॥ १२ ॥
वीथ्यालिरावलिः पङ्क्तिश्रेणीलेखास्तु राजयः ।
वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ॥ १३ ॥
ओषध्यः फलपाकान्ताः पलाशी द्रुद्रुमागमाः ।
स्थाणुर्वा ना ध्रुवः शङ्कुः प्रफुल्लोत्फुल्लसंस्फुटाः ॥ १४ ॥
पलाग्रं छदनं पर्णमिध्ममेधः समित् स्त्रियां ।
बोधिद्रुमश्चलदलो दधित्थग्राहिमन्मथाः ॥ १५ ॥
तस्मिन् दधिफलः पुष्पफलदन्तशठावपि ।
उडुम्बरे हेमदुग्धः कोविदारे द्विपच्चकः ॥ १६ ॥
समपर्णी विशालत्वक् छत्रमालः सुवर्णकः ।
आरेवतव्याधिघातसम्पाकचतुरङ्गुलाः ॥ १७ ॥
स्याज्जम्बीरे दन्तशठो वरुणे तिक्तशाबकः ।

पुन्नागे पुरुषस्तुङ्गः केशरो देववल्लभः ॥ १८ ॥
पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
वञ्जुलश्चित्रवृक्षश्च द्वौ पीतनकपीतनौ ॥ १९ ॥
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ।
पीलौ गुडफलः स्रंसी नादेयी चाम्बुवेतसः ॥ २० ॥
शोभाञ्जने शिग्रुतीक्ष्णगन्धकाच्चीरमोचकाः ।
रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेणिलः समौ ॥ २१ ॥
गालवः शावरो लोध्रस्तिरीटस्तिल्वमार्जनौ ।
श्लेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ २२ ॥
वैकङ्कतः शुवाहश्चो ग्रन्थिलो व्याघ्रपादपि ।
तिन्दुकः स्फूर्जकः कालो नादेयी भूमिजम्बुकः ॥ २३ ॥
काकतिन्दौ पीलुकः स्यात् पाटलिर्मोचसुष्कको ।
क्रमुकः पट्टिकाख्यः स्यात्वुग्भौ कैटर्यकट्फले ॥ २४ ॥
वीरवृक्षोऽरुष्करोऽग्निमुखौ भल्लातकौ त्विषु ।
सर्जकासनजोवाह्य पीतसालेऽथ मालके ॥ २५ ॥
सर्जाश्वकर्णौ वीरेन्द्रौ इन्द्रद्रुः ककुभोऽर्जुनः ।
इङ्गुदौ तापसतरुर्भौचा शाल्मलिरेव च ॥ २६ ॥
चिरविल्वो नक्तमालः करजश्च करञ्जके ।
प्रकीर्य्यः पूतिकरजो गर्कटाङ्गारवल्लरौ ॥ २७ ॥
रोहीं रोहितकः शीघ्रशुर्दाड़िमपुष्पकः ।
गायत्री बालतनयः खदिरो दन्तधावनः ॥ २८ ॥
अरिमेदो विट्खदिरे कदरः खदिरे सिते ।
पद्माङ्गुलो वर्धमानश्चुर्गन्धर्वहस्तकः ॥ २९ ॥

पिण्डीतको मरुवकः पीतदारु च दारु च ।
देवदारु. पूतिकाष्ठं श्यामा तु महिलाह्वया ॥ ३० ॥
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।
मण्डूकपर्णपत्रोर्णनटकट्वङ्गटगुटकाः ॥ ३१ ॥
श्योनाकशुकनासर्क्षदीर्घवल्लकटवटाः ।
पीतद्रुः सरलश्चाथ निचुलोऽम्बुज वेज्जलः ॥ ३२ ॥
काकोदुम्बरिका फल्गुररिष्टः पिचुमर्दकः ।
सर्वतोभद्रको निम्बे गिरीषस्तु कपीतनः ॥ ३३ ॥
वकुलो वञ्जुलः प्रोक्त. पिच्छिलाऽगुरुगिंगपाः ।
जया जयन्ती तर्कारी कणिका गणिकारिका ॥ ३४ ॥
श्रीपर्णमग्निमन्थः स्याद्दन्तमूलो गिरिमल्लिका ।
कालस्कन्धस्तमालः स्यात् तण्डुलीयोऽल्पमारिषः ॥ ३५ ॥
निम्बवारस्तु निर्गुण्डी सैवास्फोता वनोद्भवा ।
गणिका यूथिकाऽम्बष्ठा ममला नवमालिका ॥ ३६ ॥
अतिमुक्तः पुण्ड्रकः स्यात्कुमारी तरणिः सहा ।
तच्च शोणे कुरुवकस्तत्र पीते कुरण्टकः ॥ ३७ ॥
नीला झिण्टी हयार्वाणा झिण्टी सैरीयकस्तथा ।
तस्मिन्रक्ते कुरुवकः पीते सहचरौ द्वयोः ॥ ३८ ॥
धुस्तूरः कितवो धूर्तो रुचको मातुलुङ्गके ।
समीरणो मरुवकः प्रस्थपुष्पः फणिज्झकः ॥ ३९ ॥
कुठेरकस्तु पर्णासेऽथास्फीतो वसुकार्कके ।
शिवमल्लो पाशुपतो हृन्दा हृद्यादनी तथा ॥ ४० ॥
जीवन्तिका हृद्यरुहा गुडूची तन्त्रिकाऽमृता ।

सोमवल्ली मधुपर्णी मूर्वा तु मोरटी तथा ॥ ४१ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।
पाठाऽम्बष्ठा विडकर्णी प्राचीना वनतिक्तिका ॥ ४२ ॥
कटुः कटुम्भरा चाथ चक्राङ्गी शकुलादनी ।
आलगुप्ता प्राहुषायी कपिकच्छुश्च मर्कटी ॥ ४३ ॥
अपामार्गः शैखरिकः प्रत्यक्पर्णी मयूरकः ।
फल्गिका ब्राह्मणी भार्गी द्रवन्ती शम्बरी हृषा ॥ ४४ ॥
मण्डूकपर्णी भण्डीरी समङ्गा कालमेषिका ।
रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ॥ ४५ ॥
पृश्निपर्णी पृथक्पर्णी कलशिर्धावनिर्गुहा ।
निदिग्धिका स्पृशी व्याघ्री क्षुद्रा दुस्पर्शया सह ॥ ४६ ॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ॥ ४७ ॥
कणोषणोपकुल्या स्याच्छ्रेयसी गजपिप्पली ।
चव्यन्तु चविका काकचिञ्ची गुञ्जे तु कृष्णला ॥ ४८ ॥
विशा विषा प्रतिविषा वनशृङ्गाटगोक्षुरौ ।
नारायणी शतमूली कालेयकहरिद्रवः ॥ ४९ ॥
दार्वी पचम्यचा दारु शुक्ला हैमवती वचा ।
वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥ ५० ॥
आस्फोता गिरिकर्णी स्यात् सिंहास्यो वासको हृषः ।
मिशी मधुरिकाऽम्लवा कोकिलाक्षेक्षुरक्षुरा ॥ ५१ ॥
विडङ्गोऽस्त्री कृमिघ्नः स्यात् वज्रदुग्धकुहो सुधा ।
गुडूची गोपनी द्राक्षा वला वाटयालकस्तथा ॥ ५२ ॥

काला मसूरविदला त्रिपुटा त्रिवृता त्रिवृत् ।
मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ॥ ५३ ॥
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च या सिता ।
गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ॥ ५४ ॥
मोचा रम्भा च कदली भण्डाकी दुष्प्रधर्षिणी ।
स्थिरा ध्रुवा सालपर्णी शृङ्गी तु वृषभो वृषः ॥ ५५ ॥
गाङ्गेरुकी नागबला मुषली तालमूलिका ।
ज्योत्स्नी पटोलिका जाली अजशृङ्गी विषाणिका ॥ ५६ ॥
स्यात्माङ्गल्यग्निशिखा ताम्बूली नागवल्लापि ।
हरेणू रेणुका कौन्ती क्षीवेरो दिव्यनागरं ॥ ५७ ॥
कालानुसार्यं तद्वाल्यपुष्पगौतशिवानि तु ।
शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा ॥ ५८ ॥
अन्यिपर्णं शुकं वर्हि वला तु त्रिपुटा चुटिः ।
शिवा तामलकी चाथ हनुर्हट्टविलासिनी ॥ ५९ ॥
कुटं नटं दशपुरं वानेयं परिपेलवम् ।
तपस्विनी जटामांसी पूका देवी लता लगूः ॥ ६० ॥
कर्चुरको द्राविड़को गन्धमूली शठी स्मृता ।
स्याद्वचगन्धा छगलान्त्रा वेगी हृद्दारकः ॥ ६१ ॥
तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ।
चाङ्गेरी चुक्रिकाम्लेष्टा स्वर्णक्षीरी हिमावती ॥ ६२ ॥
सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।
जीवन्ती जीवनी जीवा भूमिनिम्बः किरातकः ॥ ६३ ॥
कूर्चशीर्षो मधुकरयन्द्रः कपिलकस्तथा ।

दद्रुघ्नः स्यादेडगजो वर्षाभूः श्रोत्रहारिणी ॥ ६४ ॥
क्रुनन्दती निकुम्भस्था(१) यमानी वार्षिका तथा ।
लशुनङ्कृच्छनारिष्टमहाकन्दरसोनकाः ॥ ६५ ॥
वाराही वदरा गृष्टिः काकमाची तु वायसी ।
शतपुष्पा सितच्छत्रा ऽतिच्छत्रा मधुरा मिसिः ॥ ६६ ॥
अवाक्पुष्पी कारवी च सरणा तु प्रसारणी ।
कट्भरा भद्रवला कर्व्वूरश्च शटी च्छथ ॥ ६७ ॥
पटोलः कुलकस्त्रिक्तः कारवेल्लः कटिल्लकः ।
कुष्माण्डकस्तु कर्कारुरिर्वारुः कर्कटी स्त्रियौ ॥ ६८ ॥
इक्ष्वाकुः कटुतुम्बी स्याद्विशाला त्विन्द्रवारुणी ।
अर्शोघ्नः शूरणः कन्दो सुस्तकः कुरुविन्दकः ॥ ६९ ॥
वंशे त्वक्सारकर्म्मारवेणुमस्करतेजनाः ।
छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणे ॥ ७० ॥
तृणराजाक्षयस्तालो घोण्टा क्रमुकपुगकौ ।
शार्दूलद्वीपिनौ व्याघ्रे हर्य्यक्षः केशरी हरिः ॥ ७१ ॥
कोलः पोती वराहः स्यात् कोक ईहामृगो वृकः ।
लूतोर्णनाभौ तु समौ तन्तुवायश्च मर्कटे ॥ ७२ ॥
वृश्चिकः शूककीटः स्यात्सारङ्गस्तोककौ समौ ।
कृकवाकुस्ताम्रचूड़ः पिकः कोकिल इत्यपि ॥ ७३ ॥
काके तु करटारिष्टौ वकः कङ्क उदाहृतः ।
कोकयक्रक्रयक्राकौ कादम्बः कलहंसकः ॥ ७४ ॥
पतङ्गिका पुत्तिका स्यात्सारघा मधुमक्षिका ।

---

१ चक्रुन्दरकौ निर्दहतीति च० ।

हिरेफपुष्पलिड्भृङ्गषट्पदभ्रमराऽलयः ॥ ७५ ॥
केकी शिखण्डिन् बाकेका शकुन्तिशकुनिद्विजाः ।
स्त्री पत्नतिः पंक्तमूलक्षत्नुस्तोटिरुभे स्त्रियौ ॥ ७६ ॥
गतिरुड्डीनसण्डीनौ कुलायो नीड़मस्त्रियां ।
पेशी कोषो द्विहीनेऽण्डं पृथुकः शावकः शिशुः ॥ ७७ ॥
पीतः पाकोऽर्भको डिम्भः सन्दोहव्यूहको गणः ।
स्तोमौघनिकरव्राता निकुरम्बं कदम्बकं ।
सङ्घातसञ्चयौ वृन्दं पुञ्जरागी तु कूटकं ॥ ७८ ॥

इत्याग्नेये महापुराणे भूमिवनौषध्यादिवर्गा नाम द्विषष्ट्यधिकत्रिशततमोऽध्यायः ।

अथ त्रिषष्ट्यधिकत्रिशततमोऽध्यायः ।

———000———

नृब्रह्मक्षत्रविट्शूद्रवर्गाः ।

अग्निरुवाच । नृब्रह्मक्षत्रविट्शूद्रवर्गान्वक्ष्येऽथ नामतः ।
नरः पञ्चजना मर्त्या यदूयोपाऽवला वधूः ॥ १ ॥
कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका ।
कुलटा पुंश्चल्यसती नग्निका स्त्री च कोटवी ॥ २ ॥
कात्यायन्यर्धवृद्धा या सैरिन्ध्री परवेश्मगा ।
असिक्नी स्यादवृद्धा या मलिनी तु रजस्वला ॥ ३ ॥
वारस्त्री गणिका वेश्या भ्रातृजायास्तु यातरः ।
ननान्दा तु स्वसा श्वश्रूः सपिण्डास्तु सनाभयः ॥ ४ ॥

समानोदर्य्यसोदर्य्यसगर्भसहजाक्षमाः ।
सगोत्रबान्धवज्ञातिबन्धुस्वजनाः समाः ॥ ५ ॥
दम्पती जम्पती भार्य्यापती जायापती च तौ ।
गर्भाशयो जरायुः स्यादुल्बश्च कललोऽस्त्रियां ॥ ६ ॥
गर्भो भ्रूण इमौ तुल्यौ क्लीवं शण्डो नपुंसकम् ।
स्यादुन्मानशया डिम्भा बालो मांशपचकः स्मृतः ॥ ७ ॥
पिचिण्डिलो दृढत्वक्चिरवभ्रटो नतनासिके ।
विकलाङ्गस्तु पीगण्ड आरोग्यं स्यादनामयम् ॥ ८ ॥
स्याद्देडे वधिरः कुञ्जे गडुलः कुकरे कुनिः ।
क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः ॥ ९ ॥
स्त्री क्षुत्क्षुतं क्षयं पुंसि कासस्तु क्षवथुः पुमान् ।
शोथस्तु श्वयथुः शोफः पादस्फोटो विपादिका ॥ १० ॥
किलासं सिध्मकच्छान्तु पाम पामा विचर्चिका ।
कोठो मण्डलकं कुष्ठं क्षिचे दुर्नामकार्शसी ॥ ११ ॥
अनाहस्तु विबन्धः स्यादग्रहणी रुक्प्रवाहिका ।
वीजवीर्य्येन्द्रियं शुक्रं पलं क्रव्यमामिषं ॥ १२ ॥
वृक्काऽग्रमांसं हृदयं हृन्मेदस्तु वपा वसा ।
पशादग्रीवा शिरा मन्या नाडी तु धमनिः शिरा ॥ १३ ॥
तिलकं क्लोम मस्तिष्कं दूषिका नेत्रयोर्मलम् ।
अन्त्रं पुरी तदृगुल्बस्तु प्लीहा पुंस्यथ वक्षसा ॥ १४ ॥
आयुः स्त्रियां कालखण्डयक्षती तु ऽसमे द्वमे ।
स्यात् कर्पूरः कपालोऽस्त्री कीकसक्लुप्तमस्थि च ॥ १५ ॥
आच्छरीराख्यि कङ्कालः पृष्ठास्थि तु कशेरुका ।

शिरोऽस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका ॥१६॥
अङ्गं प्रतीकोऽवयवः शरीरं वर्ष्म विग्रहः ।
कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती ॥ १७ ॥
पश्चान्नितम्बः स्त्रीकटयाः क्लीबे तु जघनं पुरः ।
कूपकौ तु नितम्बस्थौ हयहोने ककुन्दरे ॥ १८ ॥
स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ।
भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसो ॥ १९ ॥
पिचिण्डकुक्षी जठरोदरं तुन्दं कुची स्तनौ ।
चूचुकन्तु कुचाग्रं स्यान्न नाभिं भुजान्तरम् ॥ २० ॥
स्कन्धो भुजशिरोंऽशोऽस्त्री सन्धी तस्यैव जत्रुणी ।
पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियां ॥ २१ ॥
प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ।
अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ॥ २२ ॥
पाणौ च पेटप्रतलप्रहस्ता विस्तृताङ्गुली ।
बद्धमुष्टिकरो रत्निररत्निः स कनिष्ठवान् ॥ २३ ॥
कम्बुग्रीवा चिरेखा साऽवटुर्घाटा ककाटिका ।
अधः स्याच्चिबुकञ्चौष्ठादथ गण्डौ गलो हनुः ॥ २४ ॥
अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ।
चिकुरः कुन्तलो बालः प्रतिकर्म प्रसाधनम् ॥ २५ ॥
आकल्पवेशौ नेपथ्यं प्रत्यक्षं खेलयोगजम् ।
चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ २६ ॥
कर्णिका तालपत्रं स्याल्लम्बनं स्याल्ललन्तिका ।
मञ्जीरो नूपुरं पादे किङ्किणी क्षुद्रघण्टिका ॥ २७ ॥

दैर्घ्यमायाम आरोहः परिणाहो विशालता ।
पटच्चरं जीर्णवस्त्रं संव्यानञ्चोत्तरीयकम् ॥ २८ ॥
रचना स्यात् परिस्पन्द आभोगः परिपूर्णता ।
समुद्गकः सम्पुटकः प्रतिग्राहः पतद्ग्रहः ॥ २९ ॥

इत्याग्नेये महापुराणे नृवर्गो नाम त्रिषष्ट्यधिक-
त्रिशततमोऽध्यायः ।

अथ चतुःषष्ट्यधिकत्रिशततमोऽध्यायः ।

ब्रह्मवर्गः ।

अग्निरुवाच । वंशोऽन्ववायो गोत्रं स्यात् कुलान्यभिजनान्वयौ ।
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती ॥ १ ॥
यष्टा च यजमानः स्यात् प्रारब्धारम्भ उपक्रमः ।
सतीर्थ्याश्चैकगुरवः सभ्याः सामाजिकास्तथा ॥ २ ॥
सभासदः सभास्तारा ऋत्विजो याजकाश्च ते ।
अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ॥ ३ ॥
षडालो यूपकटकः समे स्यखिदलचत्वरे ।
आमिक्षा सा श्रृतोष्णे या घोरे स्याद्दधियोगतः ॥ ४ ॥
वृषदाज्यं सदध्याज्ये परमान्नन्तु पायसम् ।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ ५ ॥
परम्परार्कं समनं प्रोक्षणञ्च बधार्षकम् ।

पूजा नमस्याऽपचितिः सपर्यार्चार्हणाः समाः ॥ ६ ॥
वरिवस्या तु शुश्रूषा परिचर्योपासनम् ।
नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ॥ ७ ॥
मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः ।
कल्पे विधिक्रमौ श्रेयौ विवेकः पृथगात्मता ॥ ८ ॥
संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ।
भिक्षुः परिव्राट् कर्मन्दी पाराशर्योऽपि मस्करी ॥ ९ ॥
ऋषयः सत्यवचसः स्नातकव्रात्यव्रतौ ।
ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ १० ॥
शरीरसाधनापेक्षं नित्यं यत् कर्म तद्यमः ।
नियमस्तु स यत् कर्मानित्यमागन्तुसाधनम् ।
स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ११ ॥

इत्याग्नेये महापुराणे ब्रह्मवर्गो नाम चतुःषष्ट्यधिक-
त्रिशततमोऽध्यायः ।

अथ पञ्चषष्ट्यधिकत्रिशततमोऽध्यायः ।

क्षत्रविट्शूद्रवर्गाः ।

अग्निरुवाच । मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥ १ ॥
चक्रवर्त्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ।
मन्त्री धीसचिवोऽमात्यो महामात्राः प्रधानकाः ॥ २ ॥

द्रष्टरि व्यवहाराणां प्राड्विवाकाऽक्षदर्शकौ ।
औरिकः कनकाध्यक्षोऽथाध्यक्षाधिकृतौ समौ ॥ ३ ॥
अन्तःपुरे स्वधिकृतः स्यादन्तर्वंशिको जनः ।
सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ४ ॥
षण्ढो वर्षवरस्तुल्याः सेवकार्थ्यनुजीविनः ।
विषयानन्तरो राजा शत्रुर्मित्रमतः परं ॥ ५ ॥
उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः ।
चरः स्पर्शः स्यात्प्रणिधिरुत्तरः काल आयतिः ॥ ६ ॥
तत्कालस्तु तदात्वं स्यादुदर्कः फलमुत्तरं ।
अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम् ॥ ७ ॥
भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ।
प्रभिन्नो गर्जितो मत्तो वमथुः करशीकरः ॥ ८ ॥
स्त्रियां शृणिस्त्वङ्कुशोऽस्त्री परिस्तोमः कुथो द्वयोः ।
कर्णीरथः प्रवहणं दोला प्रेङ्खादिका स्त्रियां ॥ ९ ॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
भटा योधाश्च योद्धारः कञ्चुको वारणोऽस्त्रियां ॥ १० ॥
शीर्षण्यश्च शिरस्त्रेऽथ तनुत्रं वर्म्म दंशनं ।
आमुक्तः प्रतिमुक्तश्च पिनद्धस्तापिनद्धवत् ॥ ११ ॥
व्यूहस्तु बलविन्यासश्चक्रशकटानीकमस्त्रियां ।
एकैकेभरथा अश्वाः पत्तिः पञ्चपदातिकाः ॥ १२ ॥
पञ्चाङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं ।
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ॥ १३ ॥
अनीकिनी दशानीकिन्योऽक्षौहिण्यो गजादिभिः ।

धनुः कोदण्डदृष्वासौ कोटिरस्याटनी स्त्रियाम् ॥ १४ ॥
नक्तकस्तु धनुर्मध्यं मौर्वी ज्या गिञ्जिनी गुणः ।
पृषत्कबाणविशिखौ अजिह्मगखगाशुगाः ॥ १५ ॥
तूणीपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ।
असिर्ऋष्टिश्च निस्त्रिंशः करवालः क्षुरपाणवत् ॥ १६ ॥
सरः खड्गस्य मुष्टौ स्यादीली तु करपालिका ।
द्वयोः कुठारः सुधितिः क्षुरिका चासिपुत्रिका ॥ १७ ॥
प्रासस्तु कुन्तो विज्ञेयः सर्वला तोमरोऽस्त्रियां ।
वैतालिका बोधकरा मागधा वन्दिनस्तुतौ ॥ १८ ॥
संग्रामकास्तु समयात्सङ्ग्रामादनिवर्तिनः ।
पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियां ॥ १९ ॥
अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियां ।
अहमहमिका सा स्याद्योऽहङ्कारः परस्परम् ॥ २० ॥
शक्तिः पराक्रमः प्राणः शौर्यं स्थानमहोबलं ।
मूर्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनं ॥ २१ ॥
अभ्यवस्कन्दनन्त्वभ्यासादनं विजयो जयः ।
निर्वासनं संज्ञपनं मारणं प्रतिघातनं ॥ २२ ॥
स्यात्प्रच्युता कालधर्मौ दिष्टान्तः प्रलयोऽव्ययः ।
विशो भूमिस्पृशो वैश्या वृत्तिर्वर्तनजीवने ॥ २३ ॥
कृष्यादिवृत्तयो ज्ञेयाः कुसीदं वृद्धिजीविका ।
उद्धारोऽर्धप्रयोगः स्यात्कणिशं सस्यमञ्जरी ॥ २४ ॥
किंशारुः सस्यशूकं स्यात् स्तम्बो गुल्मस्तृणादिनः ।
धान्यं व्रीहिः स्तम्बकरिः कडङ्करो वृषं स्मृतं ॥ २५ ॥

माषादयः शमीधान्ये शुकधान्ये यवादयः ।
तृणधान्यानि नीवाराः शूर्पं प्रस्फोटनं मृतं ॥ २६ ॥
स्यूतप्रसेवौ कण्डोलपिटौ कटकिनिष्कुटौ ।
समानौ रसवत्यान्तु पाकस्थानमहानसे ॥ २७ ॥
पौरोगवस्तदध्यक्षः सूपकारास्तु वल्लवाः ।
आरालिका आन्वसिकाः सूदा औदनिका गुणाः ॥२८॥
क्लीवेऽम्बरीषं भ्राष्टौ ना कर्कर्यालुर्गलन्तिका ।
आलिञ्जरः स्याद्भणिकं सुषवी क्षणजीरके ॥ २९ ॥
आरनालस्तु कुल्माषं वाह्लीकं हिङ्गु रामठं ।
निशा हरिद्रा पीता स्त्री खण्डे मत्स्यण्डिफाणिते ॥ ३० ॥
कूर्चिका क्षीरविकृतिः स्निग्धं मसृणचिक्कणं ।
पृथुकः स्याच्चिपिटको धाना भ्रष्टयवास्त्रियः ॥ ३१ ॥
जेमनं लेप आहारो माहेयी सौरभी च गौः ।
युगादीनाञ्च षोढारो युग्यप्रासङ्गयाटकाः ॥ ३२ ॥
चिरसूता वष्कयणी धेनुः स्याद्भवसूतिका ।
सन्धिनी वृषभाक्रान्ता वेहद्भर्भोपघातिनी ॥ ३३ ॥
पण्याजीवो ह्यापणिको न्यासयोपनिधिः पुमान् ।
विपणौ विक्रयः सङ्ख्या सङ्ख्येये ह्यादश त्रिषु ॥ ३४ ॥
विंशत्याद्याः सदैकत्वे सर्व्वाः संख्येयसंख्ययोः ।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ॥ ३५ ॥
षड्लक्षेः शतसहस्रादि क्रमाद्दशगुणोत्तरं ।
मानन्तु लाङ्गलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥ ३६ ॥
ते षोड़शाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।

सुवर्णविस्तौ हेम्नोऽन्ये कुरुविन्दस्तु तत्पले ॥ ३७ ॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
कार्षापणः कार्षिकः स्यात् कार्षिके ताम्रिके पणः ॥ ३८ ॥
द्रव्यं वित्तं स्वापतेयं रिक्थमृथक्थं धनं वसु ।
रीतिः स्त्रियामारकूटौ न स्त्रियामथ ताम्रकम् ॥ ३९ ॥
शुल्वमौदुम्बरं लौहे तीक्ष्णं कालायसायसी ।
क्षारः काचोऽथ चपलो रसः सूतश्च पारदे ॥ ४० ॥
गरलं माहिषं शृङ्गं त्रपुसीसकपिच्छटं ।
क्षिण्डीरोऽब्धिकफः फेणो मधूच्छिष्टन्तु सिक्थकम् ॥ ४१ ॥
रङ्गवङ्गे पिचुस्थूलौ कूलटौ तु मनःशिला ।
यवक्षारश्च पाक्यः स्यात् त्वक्क्षीरी वंशलोचना ॥ ४२ ॥
वृषला जघन्यजाः शूद्राश्चाण्डालाश्चाथ शङ्कराः ।
कारुः शिल्पी संहतैस्तैर्दयोः श्रेणिः सजातिभिः ॥ ४३ ॥
रङ्गाजीवश्चित्रकरस्त्वष्टा तक्षा च वर्धकिः ।
नाडिन्धमः स्वर्णकारो नापितान्तावसायिनः ॥ ४४ ॥
जावालः स्यादजाजीवी देवाजीवस्तु देवलः ।
जायाजीवास्तु शैलूषा भृतको भृतिभुक्तथा ॥ ४५ ॥
विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
विहीनोपसदौ जाल्मौ भृत्ये दासेरचेटकाः ॥ ४६ ॥
पटुस्तु पेशलो दक्षो मृगयुर्लुब्धकः स्मृतः ।
चाण्डालस्तु दिवाकीर्त्तिः पुंस्त्वं लेप्यादिकर्मणि ॥ ४७ ॥
पञ्चालिका पुत्रिका स्याद्दारुकरस्तरुणः पशुः ।
मञ्जूषा पेटकः पेडा तुल्यसाधारणौ समौ ।

प्रतिमा स्यात् प्रतिकृतिर्वर्गा ब्रह्मादयः स्मृताः ॥ ४८ ॥

इत्याग्नेये महापुराणे क्षत्रविट्शूद्रवर्गा नाम षण्षष्ट्यधिक-त्रिशततमोऽध्यायः ॥

अथ षट्षष्ट्यधिकत्रिशततमोऽध्यायः ।

सामान्यनामलिङ्गानि ।

अग्निरुवाच । सामान्यान्यथ वक्ष्यामि नामलिङ्गानि तच्छृणु ।
सुकृती पुण्यवान् धन्यो महेच्छस्तु महाशयः ॥ १ ॥
प्रवीणनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे ॥ २ ॥
कृती कृतज्ञः कुशल आसक्तोद्युक्त उत्सुकः ।
दक्ष आढ्यः परिवृढो ह्यधिभूर्नायकोऽधिपः ॥ ३ ॥
लक्ष्मीवान् लक्ष्मणः श्रीलः स्वतन्त्रः स्थैर्यऽपाहृतः ।
खलपूः स्याद्दुष्करो दीर्घसूत्रश्चिरक्रियः ॥ ४ ॥
जाल्मोऽसमीक्ष्यकारी स्यात् कुण्ठो मन्दः क्रियासु यः ।
कर्म्मशूरः कर्म्मठः स्याद्वृत्तको घस्मरोऽग्रः ॥ ५ ॥
लोलुपो गर्धनो गृध्नुर्विनीतप्रश्रितौ तथा ।
धृष्टे धृष्णुर्विधातरि निभृतः प्रतिभान्विते ॥ ६ ॥
प्रगल्भो भीरुको भीरुर्वन्दारुरभिवादके ।
भूष्णुर्भविष्णुर्भविता ज्ञाता विदुरविन्दुकौ ॥ ७ ॥
मत्तप्रोष्ठोत्कटचौवायष्ठस्त्वत्यन्तकोपनः ।

देवानञ्चति देवङ्गाङ् विश्वङ्गाङ् विश्वगञ्चति ॥ ८ ॥
यः सहाञ्चति स सध्रयङ् स तिर्यङ् यश्चिरोऽञ्चति ।
वाचोयुक्तिः पटुर्वाग्मी वावदूकश्च वक्तरि ॥ ९ ॥
स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
अपध्वस्तो धिक्कृतः स्याद्वद्वे कौलितसंयतौ ॥ १० ॥
वरणः श्रेष्ठनो नान्दीवादी नान्दीकरः समाः ।
व्यसनार्त्तोपरक्तौ द्वौ बद्धे कौलितसंयतौ(१) ॥ ११ ॥
विहस्तव्याकुलौ तुल्यौ दृग्रंसक्रूरघातुकाः ।
पापो धूर्त्तौ वञ्चकः स्याच्चूर्खे वैदेहवालिशौ ॥ १२ ॥
कदर्य्यौ क्षपणक्षुद्रौ मार्गणौ याचकार्थिनौ ।
अहङ्कारवानहंयुः स्याच्छुभंयुस्तु शुभान्वितः ॥ १३ ॥
कान्तं मनोरमं रुच्यं श्लाघ्याभीष्टे शुभीप्सिते ।
असारं फल्गु शून्यं वै मुख्यवर्य्यवरेण्यकाः ॥ १४ ॥
श्रेयान् श्रेष्ठः पुष्कलः स्यात्प्रायायप्रायीयमग्रिमं ।
बर्होरु विपुलं पीनपीवन्नी तु स्थूलपीवरे ॥ १५ ॥
स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं क्षुद्रतनु ।
मायाकुटीलवकणा भूयिष्ठं पुरुषं पुरु ॥ १६ ॥
अखण्डं पूर्णसकलसमकृत्स्नाखिलाभितः ।
समीपे सन्निधाभ्यासौ नेदिष्ठं सुसमीपकं ॥ १७ ॥
सुदूरे तु दविष्ठं स्याद्दृक्षं निस्तलवतले ।
उच्चप्रांशून्नतोद्ग्रा ध्रुवोन्नित्यः सनातनः ॥ १८ ॥
आविद्धं कुटिलं भग्नं वेष्टितं वक्रमित्यपि ।

---

१ पाठोऽयं पुनरस्तिदोषेण दुष्टः ।

चञ्चलं तरलञ्चैव कठोरं जठरं दृढं ॥ १८ ॥
प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ।
एकतानोऽनन्यवृत्तिरेकाग्र्यमविलम्बितं ॥ २० ॥
उद्भावनं नैकभेदं सम्बाधकलिलं तथा ।
तिमितं स्तिमितं क्लिन्नमभियोगस्त्वभिग्रहः ॥ २१ ॥
ख्यातिर्ह्रीः प्रथा ख्यातौ समाहारः समुच्चयः ।
अपहारस्त्वपचयो विहारस्तु परिक्रमः ॥ २२ ॥
प्रत्याहार उपादानं निर्हारोऽभ्यवकर्षणं ।
विघ्नोऽन्तरायः प्रत्यूहः स्यादाख्यात्वासना स्थितिः ॥ २३ ॥
सन्निधिः सन्निकर्षः स्यात्संक्रमो दुर्गसञ्चरः ।
उपलम्भस्त्वनुभवः प्रत्यादेशो निराकृतिः ॥ २४ ॥
परिरम्भःपरिष्वङ्गः संश्लेष उपगूहनं ।
अनुमा पक्षहेत्वार्थैर्ज्ञेये भ्रमरविप्लवौ ॥ २५ ॥
असन्निकृष्टार्थज्ञानं यच्छाब्दि शाब्दमीरितं ।
सादृश्यदर्शनात्तुल्ये बुद्धिः स्यादुपमानकं ॥ २६ ॥
कार्य्यं दृष्ट्वा विना नस्यादर्थापत्तिः परार्थधीः ।
प्रतियोगिन्यऽदृष्टेऽपि भूतले नास्तीत्यभावकः ।
इत्यादिनामलिङ्गो हि हरिरस्तो नृवुद्धये ॥ २७ ॥

इत्याग्नेये महापुराणे सामान्यनामलिङ्गानि नाम
षट्षष्ट्यधिकत्रिशततमोऽध्यायः ॥

अथ सप्तषष्ट्यधिकशततमोऽध्यायः ।

———000@000———

नित्यनैमित्तिकप्राकृतप्रलयाः ।

अग्निरुवाच । चतुर्विधस्तु प्रलयो नित्यो यः प्राणिनां लयः ।
सदा विनाशी जातानां ब्राह्मो नैमित्तिको लयः ॥ १ ॥
चतुर्युगसहस्रान्ते प्राकृतः प्राकृतो लयः ।
लय आत्यन्तिको ज्ञानादात्मनः परमात्मनि ॥ २ ॥
नैमित्तिकस्य कल्पान्ते वक्ष्ये रूपं लयस्य ते ।
चतुर्युगसहस्रान्ते क्षीणप्राये महीतले ॥ ३ ॥
अनावृष्टिरतीवोग्रा जायते शतवार्षिकी ।
ततः सत्त्वक्षयः स्याच्च ततो विष्णुर्जगत्पतिः ॥ ४ ॥
क्षितौ जलानि पिबति भानोः सप्तसु रश्मिषु ।
भूपातालसमुद्रादितोयं नयति संक्षयं ॥ ५ ॥
ततस्तस्यानुभावेन तोयाहारोपबृंहिताः ।
त एव रश्मयः सप्त जायन्ते सप्त भास्कराः ॥ ६ ॥
दहन्त्यग्रेयं त्रैलोक्यं सपातालतलं द्विज ।
कूर्मपृष्ठसमा भूः स्यात्ततः कालाग्निरुद्रकः ॥ ७ ॥
शेषाहिश्वाससम्भ्रातात् पातालानि दहत्यधः ।
पातालेभ्यो भुवं विष्णुर्भुवः स्वर्गं दहत्यतः ॥ ८ ॥
अम्बरीषमिवाभाति त्रैलोक्यमखिलं तथा ।
ततस्तापपरीतास्तु लोकद्वयनिवासिनः ॥ ९ ॥

गच्छन्ति ते महर्लोकं महर्लोकाज्जनं ततः ।
रुद्ररूपी जगद्दग्ध्वा मुखनिश्वासतो हरेः ॥ १० ॥
उत्तिष्ठन्ति ततो मेघा नानारूपाः सविद्युतः ।
शतं वर्षाणि वर्षन्तः शमयन्त्यग्निमुत्थितम् ॥ ११ ॥
सप्तर्षिस्थानमाक्रम्य स्थितेऽग्नि शतं मरुत् ।
मुखनिश्वासतो विष्णोर्नाशं नयति तान्घनान् ॥ १२ ॥
वायुं पीत्वा हरिः शेषे शेते चैकार्णवे प्रभुः ।
ब्रह्मरूपधरः सिद्धैर्जलगैर्मुनिभिस्तुतः ॥ १३ ॥
आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः ।
आत्मानं वासुदेवाख्यं चिन्तयन्मधुसूदनः ॥ १४ ॥
कल्पं शेते प्रबुद्धोऽथ ब्रह्मरूपी सृजत्यसौ ।
द्विपरार्धन्ततो व्यक्तं प्रकृतौ लीयते द्विज ॥ १५ ॥
स्थानात् स्थानं दशगुणमेकस्मादुच्यते बुधैः ।
ततोऽष्टादशमे भागे परार्धमभिधीयते ॥ १६ ॥
परार्धं द्विगुणं यत्तु प्राकृतः प्रलयः स्मृतः ।
अनावृष्ट्याऽग्निसम्पर्कात् क्षते संज्वलने द्विज ॥ १७ ॥
महदादेर्विकारस्य विशेषान्तस्य संक्षये ।
क्षणेच्छाकारिते तस्मिन् सम्प्राप्ते प्रतिसञ्चरे ॥ १८ ॥
आपो ग्रसन्ति वै पूर्वं भूमिर्गन्धादिकं गुणं ।
आपगन्धात्ततो भूमिः प्रलयत्वाय कल्पते ॥ १९ ॥
रसात्मिकायां तिष्ठन्ति ह्यापस्तासां रसो गुणः ।
पीयते ज्योतिषा तासु नष्टास्वग्निश्च दीप्यते ॥ २० ॥
ज्योतिषोऽपि गुणं रूपं वायुर्ग्रसति भास्करं ।

नष्टे ज्योतिषि वायुश्च बली दीप्यते महान् ॥ २१ ॥
वायोरपि गुणं स्पर्शमाकाशं ग्रसते ततः ।
वायौ नष्टे तु चाकाशशरीरं तिष्ठति द्विज ॥ २२ ॥
आकाशस्याथ वै शब्दं भूतादिर्ग्रसते च खं ।
अभिमानात्मकं खञ्च भूतादिं ग्रसते महान् ॥ २३ ॥
भूमिर्याति लयञ्चाप्सु आपो ज्योतिषि तज्जेत् ।
वायौ वायुश्च खे खञ्च अहङ्कारे लयं स च ॥ २४ ॥
महत्तत्त्वे महान्तञ्च प्रकृतिर्ग्रसते द्विज ।
व्यक्ताऽव्यक्ता च प्रकृतिर्व्यक्तस्याव्यक्तके लयः ॥ २५ ॥
पुमानेकाक्षरः शुद्धः सोऽप्यंशः परमात्मनः ।
प्रकृतिः पुरुषश्चैतौ लीयेते परमात्मनि ॥ २६ ॥
न सन्ति यत्र सर्वेऽपि नामजात्यादिकल्पनाः ।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥ २७ ॥

इत्याग्नेये महापुराणे नित्यनैमित्तिकप्राकृतप्रलया नाम षण्णवत्यधिकत्रिशततमोऽध्यायः ।

अथाष्टषष्ट्यधिकत्रिशततमोऽध्यायः ।

आत्यन्तिकलयगर्भोत्पत्तिनिरूपणं ।

अग्निरुवाच । आत्यन्तिकं लयं वक्ष्ये ज्ञानादात्यन्तिको लयः ।
आध्यात्मिकादिसन्तापं ज्ञात्वा खञ्च विरागतः ॥ १ ॥

आध्यात्मिकस्तु सन्तापः शारीरो मानसो द्विधा ।
शारीरो बहुभिर्भेदैस्तापोऽसौ श्रूयतां द्विज ॥ २ ॥
त्यक्त्वा जीवो भोगदेहं गर्भमाप्नोति कर्मभिः ।
आतिवाहिकसंज्ञस्तु देहो भवति वै द्विज ॥ ३ ॥
केवलं स मनुष्याणां मृत्युकाल उपस्थिते ।
याम्यैः पुंभिर्मनुष्याणां तच्छरीरं द्विजोत्तमाः ॥ ४ ॥
नीयते याम्यमार्गेण नान्येषां प्राणिनां क्वचे ।
ततः स्वर्यात्यति नरकं स भ्रमेद्घटयन्त्रवत् ॥ ५ ॥
कर्मभूमिरियं ब्रह्मन् फलभूमिरसौ स्मृता ।
यमो योनीश्च नरकं निरूपयति कर्मणा ॥ ६ ॥
पूरणीयाश्च तेनैव यमश्चैवानुपश्यता ।
वायुभूताः प्राणिनश्च गर्भन्ते प्राप्नुवन्ति हि ॥ ७ ॥
यमदूतैर्मनुष्यस्तु नीयते तच्च पश्यति ।
धर्मी च पूज्यते तेन पापिष्ठस्ताड्यते रुषे ॥ ८ ॥
शुभाशुभं कर्म तस्य चित्रगुप्तो निरूपयेत् ।
बान्धवानामशौचे तु देहे स्वस्यातिवाहिके ॥ ९ ॥
तिष्ठत्यति धर्मेण दत्तपिण्डप्रनन्तरः ।
तस्त्यक्त्वा प्रेतदेहन्तु प्राप्यान्यं प्रेतलोकतः(१) ॥ १० ॥
वसेत् क्षुधा तृषा युक्त आमश्राद्धान्नभुङ्नरः ।
आतिवाहिकदेहात्तु प्रेतपिण्डैर्विना नरः ॥ ११ ॥
न हि मोक्षमवाप्नोति पिण्डांस्तत्रैव सोऽश्नुते ।
कृते सपिण्डीकरणे नरः संवत्सरात्परं ॥ १२ ॥

१ प्रेतलौकिके इति च० ।

प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते ।
भोगदेहावुभौ प्रोक्तावशुभशुभसंज्ञितौ ॥ १३ ॥
मुक्ता तु भोगदेहेन कर्मबन्धाविपात्यते ।
तं देहं परतस्त्यक्त्वा नयन्ति निशाचराः ॥ १४ ॥
पापे तिष्ठति चेत् स्वर्गं तेन भुक्तं तदा द्विज ।
तदा द्वितीयं गृह्णाति भोगदेहन्तु पापिनां ॥ १५ ॥
भुक्त्वा पापन्तु वै पश्चाच्चेन भुक्तं चिपिष्टपं ।
शुचीनां श्रीमतां गेहे स्वर्गभ्रष्टोऽभिजायते ॥ १६ ॥
पुण्ये तिष्ठति चेत्पापन्तेन भुक्तं तदा भवेत् ।
तस्मिन् सञ्चिते देहे शुभं गृह्णाति विग्रहम् ॥ १७ ॥
कर्मण्यल्पावशेषे तु नरकादपि मुच्यते ।
मुक्तस्तु नरकाद्याति तिर्य्यग्योनिं न संशयः ॥ १८ ॥
जीवः प्रविष्टो गर्भन्तु कललेऽप्यच तिष्ठति(२) ।
घनीभूतं द्वितीये तु तृतीयेऽवयवास्ततः ॥ १९ ॥
चतुर्थेऽस्थीनि त्वङ्मांसम्पञ्चमे रोमसम्भवः ।
षष्ठे चेतोऽथ जीवस्य दुःखं विन्दति सप्तमे ॥ २० ॥
जरायुवेष्टिते देहे मूर्द्धि बद्धाञ्जलिस्तथा ।
मध्ये जीवस्तु वामे स्त्री दक्षिणे पुरुषस्थितिः ॥ २१ ॥
तिष्ठत्युदरभागे तु पृष्ठस्याभिमुखस्तथा ।
यस्यां तिष्ठत्यसौ योनौ तां स वेत्ति न संशयः ॥ २२ ॥
सर्वञ्च वेत्ति हृत्तास्तमारभ्य नरजन्मनः ।

---

२ गच्छतीति क० ।

अन्धकारञ्च महतीं पीड़ां विन्दति मानवः ॥ २३ ॥
मातुराहारपीतन्तु सप्तमे मास्युपाश्नुते ।
अष्टमे नवमे मासि भृशमुद्विजते तथा ॥ २४ ॥
व्यवाये पीड़ामाप्नोति मातुर्व्यायामके तथा ।
व्याधिश्च व्याधितायां स्यान्मुहूर्त्तं शतवर्षवत् ॥ २५ ॥
सन्तप्यते कर्मभिस्तु कुरुतेऽथ मनोरथान् ।
गर्भाद्विनिर्गतो ब्रह्मन् मोचयज्ञानं करिष्यति ॥ २६ ॥
सूतिवातैरधोभूतो निःसरेद्योनियन्त्रतः ।
पीड्यमानो मासमात्रं करस्पर्शेन दुःखितः ॥ २७ ॥
खान्यष्टात् क्षुद्रस्रोतांसि देहे स्रोत्रं विविक्षता ।
श्वासोच्छ्वासौ गतिर्वायोर्वक्त्रसंस्पर्शनं तथा(१) ॥२८॥
अम्भेरूपं दर्शनं स्यादूष्मा पङ्क्तिश्च पित्तकं ।
मेधा वर्णं बलं छाया तेजः शौर्य्यं शरीरके ॥ २९ ॥
जलात्स्वेदश्च रसनन्देहे वै संप्रजायते ।
क्लेदो वसा रसा रक्तं शुक्रमूत्रकफादिकं ॥ ३० ॥
भूमेर्नाणं केशनखं गौरवं स्थिरतोऽस्थितः ।
मांसजानि मृदून्यत्र त्वङ्मांसहृदयानि च ॥ ३१ ॥
नाभिर्मज्जा(२) शुक्रमेदःक्लेदान्त्रामाशयानि च ।
पित्तजानि शिरास्नायुशुक्रञ्चैवात्मजानि तु ॥ ३२ ॥
कामक्रोधौ भयं हर्षो धर्म्माधर्म्मात्मता तथा ।
आकृतिः स्वरवर्णौ तु मैथुनाद्यं तथा च यत् ॥ ३३ ॥

---

१ श्वासोच्छ्वासौ गतिर्वायोर्वाक्यसंस्पर्शनमिति अ० ।

२ नाभिर्मेढ्रमिति ख०, अ० घ ।

तामसानि तथाऽज्ञानं प्रमादालस्यतन्द्रुधाः ।
मोहमात्सर्य्यवैगुण्यशोकायासभयानि च ॥ ३५ ॥
कामक्रोधौ तथा शौर्य्यं यज्ञेप्सा बहुभाषिता ।
अहङ्कारः परावज्ञा राजसानि महामुने ॥ ३६ ॥
धर्मेप्सा मोक्षकामित्वं परा भक्तिश्च केशवे ।
दाक्षिण्यं व्यवसायित्वं सात्विकानि विनिर्दिशेत् ॥३७॥
चपलः क्रोधनो भीरुर्बहुभाषी कलिप्रियः ।
स्वप्ने गगनगश्चैव बहुवातो नरो भवेत् ॥ ३८ ॥
अकालपलितः क्रोधी महाप्राज्ञो रणप्रियः ।
स्वप्ने च दीप्तिमत्प्रेक्षी बहुपित्तो नरो भवेत् ॥ ३९ ॥
स्थिरमित्रः स्थिरोत्साहः स्थिराङ्गो द्रविणान्वितः ।
स्वप्ने जलसितालोकी बहुश्लेष्मा नरो भवेत् ॥ ४० ॥
रसस्तु प्राणिनां देहे जीवनं रुधिरं तथा ।
लेपनञ्च तथा मांसमेहस्नेहकरन्तु तत् ॥ ४१ ॥
धारणन्त्वस्थि मज्जा स्यात्पूरणं वीर्य्यवर्धनं ।
शुक्रवीर्य्यकरं स्नेहः प्राणकृज्जीवसंस्थितिः ॥ ४२ ॥
ओजः शुक्रात् सारतरमापीतं हृदयोपगं ।
षड्ङ्गयक्थिनी बाहुर्मूर्धा जठरमौरितं ॥ ४३ ॥
षट्त्वचा वाग्यतो यद्वदन्या रुधिरधारिका ।
विलासधारिणी चान्या चतुर्थी कुण्डधारिणी ॥ ४४ ॥
पञ्चमी विद्रधिस्थानं षष्ठी प्राणधरा मता ।
कलासप्तमी मांसधरा द्वितीया रक्तधारिणी ॥ ४५ ॥
यकृत्प्लीहाश्रयाऽन्या मेदोधराऽस्थिधारिणी ।

मज्जास्थे अपुरीषाणां धरा पक्वाशयस्थिता ।
षष्ठी पित्तधरा शुक्रधरा शुक्राशयाऽपरा ॥ ४६ ॥

इत्याग्नेये महापुराणे आत्यन्तिकलयगर्भोत्पत्तिनिरूपणं नामा
ष्टषष्ट्यधिकत्रिशततमोऽध्यायः ।

अथोनसप्तत्यधिकत्रिशततमोऽध्यायः ।

शरीरावयवाः ।

अग्निरुवाच । श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणं धीः खञ्च भूतगं ।
शब्दस्पर्शरूपरसगन्धाः खादिषु तद्गुणाः ॥ १ ॥
वायूपस्थौ करौ पादौ वाग्भवेत् कर्मखन्तथा ।
उत्सर्गानन्दकादानगतिवागादि कर्म्म तत् ॥ २ ॥
पञ्चकर्मेन्द्रियान्यत्र पञ्चबुद्धीन्द्रियाणि च ।
इन्द्रियार्थाश्च पञ्चैव महाभूता मनोऽधिपाः ॥ ३ ॥
आत्माऽव्यक्तात्मतुर्विंशतत्त्वानि पुरुषः परः ।
संयुक्तश्च वियुक्तश्च यथा मत्स्योदके उभे ॥ ४ ॥
अव्यक्तमाश्रितानीह रजःसत्त्वतमांसि च ।
आन्तरः पुरुषो जीवः स परं ब्रह्म कारणं ॥ ५ ॥
स याति परमं स्थानं यो वेत्ति पुरुषं परं ।
समाशयाः स्मृता देहे रुधिरस्यैक आशयः ॥ ६ ॥
श्लेष्मणश्चामपित्तस्य पक्वाशयस्तु पञ्चमः ।

वायुमूत्राशयः सप्तः स्त्रीणां गर्भाशयोऽष्टमः ॥ ७ ॥
पित्तात्पक्वाशयोऽग्नेः स्याद्योनिर्विकसिता द्युतौ ।
पद्मवद्गर्भाशयः स्यात्तच्च धत्ते सरक्तकं ॥ ८ ॥
शुक्रं स्वशुक्रतश्चाङ्गं कुरुतलान्यत्र कालतः ।
न्यस्तं शुक्रमतो योनौ नेति गर्भाशयं मुने ॥ ९ ॥
ऋतावपि च योनिस्थेहातपित्तकफाततः ।
भवेत्तदा विकाशित्वं नैव तस्यां प्रजायते ॥ १० ॥
शुक्रात्पुक्कसकक्लोम्हकृतकोष्ठाङ्गबृंहणाः ।
तण्डुकस्य महाभाग निबद्धान्याशये मतः ॥ ११ ॥
रसस्य पच्यमानस्य साराद्भवति देहिनां ।
प्लीहा यकृच्च धर्म्मघ्न रक्तफेणाच्च पुक्कसः ॥ १२ ॥
रक्तं पित्तच्च भवति तथा तण्डुकसंज्ञकः ।
मेदोरक्तप्रसाराच्च वृक्कायाः सम्भवः स्मृतः ॥ १३ ॥
रक्तमांसप्रमाराच्च भवन्त्यन्त्राणि देहिनां ।
सार्धत्रिव्यामसंख्यानि तानि नृणां विनिर्दिशेत् ॥ १४ ॥
त्रिव्यामानि तथा स्त्रीणां प्राहुर्वैद्यविदो जनाः ।
रक्तवायुसमायोगात् क्रामेयस्योद्भवः स्मृतः ॥ १५ ॥
कफप्रसाराद्भवति हृदयं पद्ममन्निभं ।
अधोमुखं तच्छुषिरं यत्र जीवो व्यवस्थितः ॥ १६ ॥
चैतन्यानुगता भावाः सर्वे तत्र व्यवस्थिताः ।
तस्य वामे तथा प्लीहा दक्षिणे च तथा यकृत् ॥ १७ ॥
दक्षिणे च तथा क्लोम पद्मस्यैवं प्रकीर्त्तितं ।
स्रोतांसि यानि देहेऽस्मिन् कफरक्तवहानि च ॥ १८ ॥

तेषां भूतानुमानाच्च भवतीन्द्रियसम्भवः ।
नेत्रयोर्मण्डलं शुक्लं कफाद्भवति पैत्तकं ॥ १९ ॥
कृष्णञ्च मण्डलं वातात्तथा भवति भास्वकं ।
पित्तात्त्वङ्मण्डलं श्रेयं मातापित्तसमुद्भवं ॥ २० ॥
मांसासृक्कफजा जिह्वा मेदोऽसृक्कफमांसजौ ।
दशाणौ दश प्राणस्य ज्ञेयान्यायतनानि तु ॥ २१ ॥
मूर्द्धा हृन्नाभिकण्ठाश्च जिह्वा शुक्रञ्च शोणितं ।
गुदं वस्तिश्च गुल्फौ च कण्डराः षोड़शेरिताः ॥ २२ ॥
द्वे करे द्वे च चरणे चतस्रः पृष्ठतो गले ।
देहे पादादिशीर्षान्ते जालानि चैव षोड़श ॥ २३ ॥
मांसस्नायुशिरास्थिन्यः चत्वारश्च पृथक् पृथक् ।
मणिबन्धनगुल्फेषु निबद्धानि परस्परं ॥ २४ ॥
षट्कूर्चानि स्मृतानीह हस्तयोः पादयोः पृथक् ।
ग्रीवायाश्च तथा मेढ्रे कथितानि मनीषिभिः ॥ २५ ॥
पृष्ठवंशस्योपगतायतस्रो मांसरज्जवः ।
नवत्यश्च तथा पेश्यस्तासां बन्धनकारिकाः ॥ २६ ॥
सीवन्यश्च तथा सप्त पञ्च मूर्द्धानमाश्रिताः ।
एकैका मेढ्रजिह्वास्था अस्थि षष्टिशतत्रयं ॥ २७ ॥
सूक्ष्मैः सह चतुःषष्टिर्दशना विंशतिर्नखाः ।
पाणिपादशलाकाश्च तासां स्थानचतुष्टयं ॥ २८ ॥
षड्यङ्गुलौनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयं ।
चत्वार्यरत्नेरस्थीनि जङ्घयोस्तद्वदेव तु ॥ २९ ॥
द्वे द्वे जानुकपोलोरुफलकांशसमुद्भवं ।

अन्नस्थानांशकश्रोणिफलके चैवमादिशेत् ॥ ३० ॥
भगास्थीकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।
ग्रीवायाश्च तथाऽस्थीनि जत्रुकश्च तथा हनुः ॥ ३१ ॥
तन्मूलं हे ललाटाक्षिगण्डनासाङ्घ्र्यवस्थिताः ।
पर्शुकास्तालुके: सार्द्धमर्बुदैश्च द्विसप्ततिः ॥ ३२ ॥
हे शङ्खके कपालानि चत्वार्येव शिरस्तथा ।
उरः सप्तदशास्थीनि सन्धीनां हे शते दश ॥ ३३ ॥
अष्टषष्टिस्तु शाखासु षष्टिश्चैकविवर्जिता ।
अन्तरा वै त्रयशीतिश्च स्नायोर्नवशतानि च ॥ ३४ ॥
त्रिंशाधिके हे शते तु अन्तराधौ तु सप्ततिः ।
जर्हगाः षट्शतान्येव शाखास्तु कथितानि तु ॥ ३५ ॥
पञ्चपेशीशतान्येव(१) चत्वारिंशत्तथोर्ध्वगाः ।
चतुःशतन्तु शाखासु अन्तराधौ च षष्टिका ॥ ३६ ॥
स्त्रीणां चैकाधिका वै स्याद्विंशतिश्चतुरुत्तरा ।
स्तनयोर्दश योनौ च त्रयोदश तथाशये ॥ ३७ ॥
गर्भस्य च चतस्रः स्युः शिराणाञ्च शरीरिणां ।
त्रिंशच्छतसहस्राणि तथान्यानि नवैव तु ॥ ३८ ॥
षट्पञ्चाशत्सहस्राणि रसन्हे वहन्ति ताः ।
केदार इव कुल्याय क्लेदलेपादिकञ्च यत् ॥ ३९ ॥
द्वासप्ततिस्तथा कोट्यो व्योम्नामिह महामुने ।
मज्जाया मेदसश्चैव वसायाश्च तथा द्विज ॥ ४० ॥
मूत्रस्य चैव पित्तस्य श्लेष्मणः शुक्रतस्तथा ।

---

१ पञ्चपेशीशतान्येवं इति क० अ०, च ।

रक्तस्य सरसस्यात्र क्रमशोऽञ्जलयो मताः ॥ ४१ ॥
अर्द्धार्द्धाभ्यधिकाः सर्व्वाः पूर्वपूर्वाऽञ्जलेर्मताः।
अर्द्धाञ्जलिस्तु शुक्रस्य तदर्द्धञ्च तथौजसः ॥ ४२ ॥
रजसस्तु तथा स्त्रीणाञ्चतस्रः कथिता बुधैः।
शरीरं मलदोषादि पिण्डं त्यक्त्वात्मनि त्यजेत्(१) ॥ ४३ ॥

इत्याग्नेये महापुराणे शरीरावयवा नामो
न सप्तत्यधिकत्रिशततमोऽध्यायः।

अथसप्तन्यधिकत्रिशततमोध्यायः।

———ooo@ooo———

नरकनिरूपणम्।

अग्निरुवाच। उक्तानि यममार्गाणि वक्ष्येऽथ मरणे नृणां।
जन्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥ १ ॥
शरीरमुपसृध्याऽथ क्षतस्थान्दोषान्रुणद्धि वै।
छिनत्ति प्राणस्थानानि पुनर्मर्माणि चैव हि ॥ २ ॥
शैत्यात् प्रकुपितो वायुश्छिद्रमन्विष्यते ततः।
द्वे नेत्रे द्वौ तथा कर्णौ द्वौ तु नासापुटौ तथा ॥ ३ ॥
जर्ह्वस्तु सप्त च्छिद्राणि अष्टमं वदनं तथा।
एतैः प्राणो विनिर्याति प्रायशः शुभकर्मणां ॥ ४ ॥
अधः पायुरुपस्थश्च अनेनाशुभकारिणां।

---

१ पिण्डं त्यक्त्वा तु विन्यसेदिति अ०।

मूर्द्धानं योगिनो भित्त्वा जीवो यात्यथ चेच्छया ॥ ५ ॥
अन्तकाले तु सम्प्राप्ते प्राणेऽपानमुपस्थिते ।
तमसा संवृते ज्ञाने संवृतेषु च मर्म्मसु ॥ ६ ॥
स जीवो नाभ्यधिष्ठानाच्चाख्यते मातरिश्वना ।
बाध्यमाणश्चानयते अष्टाङ्गाः प्राणवृत्तिकाः ॥ ७ ॥
च्यवन्तं जायमानं वा प्रविशन्तञ्च योनिषु ।
पश्यन्ति च तं सिद्धा देवा दिव्येन चक्षुषा ॥ ८ ॥
गृह्णाति तत्क्षणाद्योगे शरीरञ्चातिवाहिकम् ।
आकाशवायुतेजांसि विग्रहादूर्द्धगामिनः ॥ ९ ॥
जलं मही च पञ्चत्वमापन्नः पुरुषः स्मृतः ।
आतिवाहिकदेहन्तु यमदूता नयन्ति तं ॥ १० ॥
याम्यं मार्गं महाघोरं षड्शीतिसहस्रकम् ।
अन्नोदकं नीयमानो बान्धवैर्दत्तमश्नुते ॥ ११ ॥
यमं दृष्ट्वा यमोक्तेन चित्रगुप्तेन चेरितान् ।
प्राप्नोति नरकान्घोरान्धर्मी शुभपथैर्दिवम् ॥ १२ ॥
भुज्यन्ते पापिभिर्यत्ने नरकास्ताश्च यातनाः ।
अष्टाविंशतिरेवाधश्चित्रे नरककोटयः ॥ १३ ॥
सप्तमस्य तलस्यान्ते घोरे तमसि संस्थिताः ।
घोराख्या प्रथमाकोटिः सुघोरा तदधःस्थिता ॥ १४ ॥
अतिघोरा महाघोरा घोररूपा च पञ्चमी ।
षष्ठी तरलताराख्या सप्तमी च भयानका ॥ १५ ॥
भयोत्कटा कालरात्री महाचण्डा च चण्डया ।
कोलाहला प्रचण्डाख्या पद्मा नरकनायिका ॥ १६ ॥

पद्मावती भीषणा च भीमा चैव करालिका।
विकराला महावज्रा त्रिकोणा पञ्चकोणिका॥ १७॥
सुदीर्घा वर्तुला समभूमा चैव सुभूमिका।
दीप्तमायाऽष्टाविंशतयः कोटयः पापिदुःखदाः॥ १८॥
अष्टाविंशतिकोटीनां पञ्च पञ्च च नायकाः।
रौरवाद्याः शतञ्चैकं चत्वारिंशच्चतुष्टयं॥ १९॥
तामिस्रमन्धतामिस्रं महारौरवरौरवौ।
असिपत्रं वनञ्चैव लोहभारं तथैव च॥ २०॥
नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचि तपनं सम्प्रतापनं॥ २१॥
सङ्घातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकं।
लोहशङ्कुमृजीषञ्च प्रधानं शाल्मलीं नदीम॥ २२॥
नरकान्विद्धि कोटीशनागान्वै घोरदर्शनान्।
पात्यन्ते पापकर्म्माण एकैकस्मिन्बहुष्वपि॥ २३॥
मार्जारोलूकगोमायुगृध्रादिवदनाश्च ते।
तैलद्रोण्यां नरं क्षिप्त्वा ज्वालयन्ति हुताशनं॥ २४॥
अम्बरीषेषु चैवान्यांस्ताम्रपात्रेषु चापरान्।
अयःपात्रेषु चैवान्यान् बहुवह्निकणेषु च॥ २५॥
शूलाग्रारोपिताश्चान्ये क्षिप्यन्ते नरकेऽपरे।
ताड्यन्ते च कशाभिस्तु भाज्यन्ते चाप्ययोगुडान्॥ २६॥
यमदूतैर्नराः पांशून्विष्ठारक्तकफादिकान्।
तप्तं मद्यं पाययन्ति पाटयन्ति पुनर्नरान्॥ २७॥
यन्त्रेषु पीडयन्ति स्म भक्ष्यन्ते व्यालसादिभिः।

तैलेनोष्णेन सिच्यन्ते छिद्यन्ते नैकधा शिरः ॥ २८ ॥
हा तातेति क्रन्दमानाः स्वकर्म्मविदन्ति कर्म्म ते ।
महापातकजान्घोरान्नरकान्प्राप्य गर्हितान् ॥ २९ ॥
कर्म्मक्षयात्पुनर्जायन्ते महापातकिनस्त्विह ।
मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ॥ ३० ॥
खरपुक्कसगस्त्रीणां मद्यपः स्वर्णहार्य्यपि ।
कृमिकीटपतङ्गत्वं गुरुगस्तृणगुल्मतां ॥ ३१ ॥
ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः ।
स्वर्णहारी तु कुनखी दुश्चर्म्मा गुरुतल्पगः ॥ ३२ ॥
यो येन संस्पृशत्येषां स तल्लिङ्गोऽभिजायते ।
अन्नहर्त्ता मायावी स्यान्मूको वाग्यपहारकः ॥ ३३ ॥
धान्यं हृत्वाऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः ।
तैलहृत्तैलपायी स्यात् पूतिव्रक्कस्तु सूचकः ॥ ३४ ॥
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च ।
अरण्ये निर्जने देशे जायते ब्रह्मराक्षसः ॥ ३५ ॥
रत्नहारी हीनजातिर्गन्धान् कुकुन्दरो शुभान् ।
पत्रं शाकं शिखी हृत्वा सुस्वरो धान्यहारकः ॥ ३६ ॥
अजः पशुंपयः काको यानमुष्ट्रः(१) फलं कपिः ।
मधु दंशः फलं गृध्रो गृहकाक उपस्करं ॥ ३७ ॥
श्वित्री वस्त्रं सारसश्च भिक्षो लवणहारकः ।
उक्ता आध्यात्मिकस्तापः शस्त्राद्यैराधिभौतिकः ॥ ३८ ॥
ग्रहाग्निदेवपीड़ाद्यैराधिदैविक ईरितः ।

१ यानं वहतीति च० ।

त्रिधा तापं हि संसारं ज्ञानयोगादिनाशयेत् ।
कृच्छ्रैर्व्रतैश्च दानाद्यैर्विष्णुपूजादिभिर्नरः ॥ ३९ ॥
इत्याग्नेये महापुराणे नरकनिरूपणं नाम
सप्तत्यधिकत्रिशततमोऽध्यायः ।

अथैकसप्तत्यधिकत्रिशततमोऽध्यायः ।

यमनियमाः ।

अग्निरुवाच । संसारतापमुक्त्यर्थं वक्ष्याम्यष्टाङ्गयोगकं ।
ब्रह्मप्रकाशकं ज्ञानं(१) योगस्तत्रैकचित्तता ॥ १ ॥
चित्तवृत्तिनिरोधश्च जीवब्रह्मात्मनोः परः ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ॥ २ ॥
यमाः पञ्च स्मृता विप्र नियमाद्भुक्तिमुक्तिदाः ।
शौचं सन्तोषतपसी स्वाध्यायेश्वरपूजने ॥ ३ ॥
भूतापीड़ा ह्यहिंसा स्यादहिंसा धर्म्म उत्तमः ।
यथा गजपदेऽन्यानि(२) पदानि पथगामिनां(३) ॥ ४ ॥
एवं सर्वमहिंसायां धर्म्मार्थमभिधीयते ।
उद्वेगजननं हिंसा सन्तापकरणन्तथा ॥ ५ ॥
रुक्क्षतिः शोणितक्षतिः पैशुन्यकरणन्तथा ।

---

१ ब्रह्मप्रकाशनं ज्ञानमिति अ० ।
२ यथा नागपदेऽन्यानीति क० ।
३ पद्गामिनामिति ख०, ज०, च ।

हितस्यातिनिषेधश्च मर्मोद्घाटनमेव च ॥ ६ ॥
सुखापकृतिः संरोधो बधो दशविधा च सा ।
यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणं ॥ ७ ॥
सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं ।
प्रियञ्च नानृतं ब्रूयादेष धर्मः सनातनः ॥ ८ ॥
मैथुनस्य परित्यागो ब्रह्मचर्य्यमुदष्टधा ।
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ ९ ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ १० ॥
ब्रह्मचर्य्यं क्रियामूलमन्यथा विफला क्रिया ।
वसिष्ठश्चन्द्रमाः शुक्रो देवाचार्य्यः पितामहः ॥ ११ ॥
तपोवृद्धा वयोवृद्धास्तेऽपि स्त्रीभिर्विमोहिताः ।
गौड़ी पैष्टी च माध्वी च विज्ञेयास्त्रिविधाः सुराः ॥ १२ ॥
चतुर्थी स्त्री सुरा ज्ञेया ययेदं मोहितं जगत् ।
माद्यति प्रमदां दृष्ट्वा सुरां पीत्वा तु माद्यति ॥ १३ ॥
यस्माद्दृष्टमदा नारी तस्मात्तान्नावलोकयेत् ।
यदा तदाऽपरद्रव्यमपहृत्य बलाद्वरः ॥ १४ ॥
अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः ।
कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीं ॥ १५ ॥
पादुके चापि गृह्णीयात् कुर्य्यान्नान्यस्य संग्रहं ।
देहस्थितिनिमित्तस्य वैद्यादेः स्यात्परिग्रहः ॥ १६ ॥
शरीरं धर्म्मसंयुक्तं रक्षणीयं प्रयत्नतः ।
शौचन्तु द्विविधं प्रोक्तं बाह्यमभ्यन्तरं तथा ॥ १७ ॥

मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धेरथान्तरं ।
उभयेन शुचिर्यस्तु स शुचिर्नेतरः शुचिः ॥ १८ ॥
यथा कथञ्चित्प्राप्ता च सन्तोषस्तुष्टिरुच्यते ।
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं तप उच्यते ॥ १९ ॥
तज्ज्यः सर्वधर्म्मेभ्यः स धर्म्मः पर उच्यते ।
वाचिकं मन्त्रजप्यादि मानसं रागवर्ज्जनं ॥ २० ॥
शारीरं देवपूजादि सर्वदन्तु त्रिधा तपः ।
प्रणवाद्यास्ततो वेदाः प्रणवे पर्य्यवस्थिताः ॥ २१ ॥
वाङ्मयः प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत् ।
अकारस्य तथोकारो मकारस्यार्द्धमात्रया ॥ २२ ॥
तिस्रो मात्रास्त्रयो वेदाः लोका भूरादयो गुणाः ।
जाग्रत्स्वप्नः सुषुप्तिश्च ब्रह्मविष्णुमहेश्वराः ॥ २३ ॥
प्रद्युम्नः श्रीर्वासुदेवः सर्वमोङ्कारकः क्रमात् ।
अमात्रो नष्टमात्रश्च द्वैतस्योपगमः शिवः ॥ २४ ॥
ओङ्कारो विदितो येन स मुनिर्नेतरो मुनिः ।
चतुर्थी मात्रा गान्धारी प्रयुक्ता मूर्ध्नि लक्ष्यते ॥ २५ ॥
तत्तुरीयं परं ब्रह्म ज्योतिर्दीपो घटे यथा ।
तथा हृत्पद्मनिलयं ध्यायेन्नित्यं जपेन्नरः ॥ २६ ॥
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ २७ ॥
एतदेकाक्षरं ब्रह्म एतदेकाक्षरं परं ।
एतदेकाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ २८ ॥
छन्दोऽस्य देवी गायत्री अन्तर्य्यामी ऋषिः स्मृतः ।

देवता परमात्मास्य नियोगो भुक्तिमुक्तये ॥ २८ ॥
भूरग्न्यात्मने हृदयं भुवः प्राजापत्यात्मने ।
शिरः स्वःसूर्य्यात्मने च शिखा कवचमुच्यते ॥ २० ॥
ओंभूर्भुवः स्वःकवचं सत्यात्मने ततोऽस्त्रकं ।
विन्यस्य पूजयेद्विष्णुं जपेद्वै भुक्तिमुक्तये ॥ २१ ॥
जुहुयाच्च तिलाज्यादि सर्वं सम्पद्यते नरे ।
यस्तु द्वादशसाहस्रं जपमन्वहमाचरेत् ॥ २२ ॥
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ।
अनिमादि कोटिजप्याल्लभ्यात्सारस्वतादिकं ॥ २३ ॥
वैदिकस्तान्त्रिको मिश्रो विष्णोर्वै त्रिविधो मखः ।
त्रयाणामीप्सितेनैकविधिना हरिमर्चयेत् ॥ २४ ॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत् ।
स याङ्गतिमवाप्नोति न तां क्रतुशतैरपि ॥ २५ ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ २६ ॥

इत्याग्नेये महापुराणे यमनियमा नामै-
कसप्तत्यधिकत्रिशततमोऽध्यायः ।

अथ द्विसप्तत्यधिकत्रिशततमोऽध्यायः ।

———000———

आसनप्राणायामप्रत्याहाराः ।

अग्निरुवाच । आसनं कमलाद्युक्तं तद्वद्वा चिन्तयेत्परं ।
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ १ ॥
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरं ।
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ॥ २ ॥
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ।
समकायशिरग्रीवं धारयन्नचलं स्थिरः ॥ ३ ॥
सम्प्रेक्ष्य नासिकाग्रं स्वन्दिग्यश्चानवलोकयन् ।
पार्ष्णिभ्यां तुषणौ रुद्ध्वा तथा प्रजननं पुनः ॥ ४ ॥
ऊरुभ्यासुपरिस्थाप्य बाहू तिर्य्यक् प्रयत्नतः ।
दक्षिणं करपृष्ठञ्च न्यसेद्वामतलोपरि ॥ ५ ॥
उन्नम्य शनकैर्वक्त्रं मुखं विष्टभ्य चायतः ।
प्राणः स्वदेहजो वायुस्तस्यायामो निरोधनं ॥ ६ ॥
नासिकापुटमङ्गुल्या पीडयेव च पूरेण च ।
औदरं रेचयेद्वायुं रेचनाद्रेचकः स्मृतः ॥ ७ ॥
बाह्येन वायुना देहं दृतिवत् पूरयेद्यथा ।
तथा पुर्णञ्च सन्तिष्ठेत् पूरणात् पूरकः स्मृतः ॥ ८ ॥
न मुञ्चति न गृह्णाति वायुमन्तर्बहिःस्थितम् ।
सम्पूर्णकुम्भवत्तिष्ठेदचलः स तु कुम्भकः ॥ ९ ॥

कनीयः(१) सकृदुद्घातः स वै द्वादशमात्रिकः ।
मध्यमस्य द्विरुद्घातश्चतुर्विंशतिमात्रिकः ॥ १० ॥
उत्तमस्य त्रिरुद्घातः षट्त्रिंशत्तालमात्रिकः ।
स्वेदकम्पाभिधानानां जननश्चोत्तमोत्तमः ॥ ११ ॥
अजितौत्वारुहेद्वायुं हिक्काश्वासादयस्तथा ।
जिते प्राणे स्खल्पदोषविन्मूत्रादि प्रजायते ॥ १२ ॥
आरोग्यं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवम् ।
बलवर्णप्रसादश्च सर्वदोषक्षयः फलं ॥ १३ ॥
जपध्यानं विनागर्भः स गर्भस्तत्समन्वितः ।
इन्द्रियाणां जयार्थाय स गर्भं धारयेत्परं ॥ १४ ॥
ज्ञानवैराग्ययुक्ताभ्यां प्राणायामवशेन च ।
इन्द्रियाणि विनिर्जित्य सर्वमेव जितं भवेत् ॥ १५ ॥
इन्द्रियाण्येव तत्सर्वं यत् स्वर्गनरकावुभौ ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥ १६ ॥
शरीरं रथमित्याहुरिन्द्रियाण्यस्य वाजिनः ।
मनश्च सारथिः प्रोक्तः प्राणायामः कशः(२) स्मृतः ॥ १७ ॥
ज्ञानवैराग्यरश्मिभ्यां सायया विधृतं मनः ।
शनैर्निश्चलतामेति प्राणायामैकसंहितम् ॥ १८ ॥
जलबिन्दुं कुशाग्रेण मासे मासे पिबेत्तु यः ।
संवत्सरशतं साग्रं प्राणायामश्च तत्समः ॥ १९ ॥
इन्द्रियाणि प्रसक्तानि प्रविश्य विषयोदधौ ।

---

१ कन्यस इति अ० ।

२ प्राणायामोऽङ्कुश इति अ० ।

आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते ॥ २० ॥
उद्धरेदात्मनात्मानं मज्जमानं यथाम्भसि ।
भोगनद्यतिवेगेन(१) ज्ञानहस्तं समाश्रयेत् ॥ २१ ॥

इत्याग्नेये महापुराणे आसनप्राणायामप्रत्याहारा नाम त्रिसप्तत्यधिकत्रिशततमोऽध्यायः ।

अथ त्रिसप्तत्यधिकत्रिशततमोऽध्यायः ।

ध्यानम् ।

अग्निरुवाच । ध्यै चिन्तायां स्मृतौ धातुर्विष्णुचिन्ता मुहुर्मुहुः ।
अनाच्छिन्नेन मनसा ध्यानमित्यभिधीयते ॥ १ ॥
आत्मनः समनस्कस्य सुप्ताशेषोपधस्य च ।
ब्रह्मचिन्तासमा प्रवृत्तिर्ध्यानं नाम तदुच्यते ॥ २ ॥
ध्येयालम्बनसंस्थस्य सदृग्प्रत्ययस्य च ।
प्रत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते ॥ ३ ॥
ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ।
ध्यानमेतत्समुद्दिष्टं प्रत्ययस्यैकभावना ॥ ४ ॥
एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् ।
कुलं स्वजनमित्राणि समुद्धृत्य हरिर्भवेत् ॥ ५ ॥
एवं मुहूर्त्तमर्धं वा ध्यायेद् यः श्रद्धया हरिं ।
सोपि यां गतिमाप्नोति न तां सर्वैर्महामखैः ॥ ६ ॥

---

१ भोगनद्यभिवेगेनेति अ० ।

ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनं ।
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत तत्त्ववित् ॥ ७ ॥
योगाभ्यासाज्जवेन्मूर्तिरैश्वर्यञ्चाष्टधा महत् ।
ज्ञानवैराग्यसम्पन्नः श्रद्दधानः क्षमान्वितः ॥ ८ ॥
विष्णुभक्तः सदोत्साही ध्यातेत्थं पुरुषः स्मृतः ।
मूर्तामूर्तं परब्रह्म हरेर्ध्यानं हि विद्धनम् ॥ ९ ॥
सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः ।
अणिमादिगुणैश्वर्यं मुक्तिर्ध्यानप्रयोजनम् ॥ १० ॥
फलेन योजको विष्णुरतो ध्यायेत् परेश्वरं ।
गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन् निमिषन्नपि ॥ ११ ॥
शुचिर्वाप्यशुचिर्वापि ध्यायेत् सततमीश्वरम् ।
स्वदेहायतनस्यान्ते मनसि स्थाप्य केशवम् ॥ १२ ॥
हृत्पद्मपीठिकामध्ये ध्यानयोगेन(१) पूजयेत् ।
ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः ॥ १३ ॥
तेनेष्ट्वा मुक्तिमाप्नोति बाह्यशुद्ध्यैव नाध्वरैः ।
हिंसादोषविमुक्तित्वाद्विशुद्धियित्तसाधनः ॥ १४ ॥
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
तस्माद्दृश्यं सदा त्यज्य ह्यनित्यं बाह्यसाधनं ॥ १५ ॥
यज्ञाद्यं कर्म सन्त्यज्य योगमत्यर्थमभ्यसेत् ।
विकारमुक्तमव्यक्तं भोग्यभोगसमन्वितं ॥ १६ ॥
चिन्तयेद्हृदये पूर्वं क्रमादादौ गुणत्रयं ।
तमः प्रच्छाद्य रजसा सत्त्वेन च्छादयेद्रजः ॥ १७ ॥

---

१ ध्यानमार्गेति ख०, अ० च०।

ध्यायेत्त्रिमण्डलं पूर्वं क्षीणं रक्तं सितं क्रमात् ।
सत्त्वोपाधिगुणातीतः पुरुषः पञ्चविंशकः (१) ॥ १८ ॥
ध्येयमेतदशुद्धञ्च त्यक्त्वा शुद्धं विचिन्तयेत् ।
ऐश्वर्य्यं पङ्कजं दिव्यं पुरुषोपरि संस्थितं ॥ १९ ॥
द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् ।
नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवं ॥ २० ॥
पद्मपत्राष्टकं ध्येयमणिमादिगुणाष्टकम् ।
कर्णिकाकेशरं नालं ज्ञानवैराग्यमुत्तमम् ॥ २१ ॥
विष्णुधर्म्मञ्च तत्कन्दमिति पद्मं विचिन्तयेत् ।
तद्धर्म्मज्ञानवैराग्यं शिवैश्वर्य्यमयं परं ॥ २२ ॥
ज्ञात्वा पद्मासनं सर्वं सर्वदुःखान्तमाप्नुयात् ।
तत्पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिं (२) ॥ २३ ॥
अङ्गुष्ठमात्रममलं ध्यायेदोङ्कारमीश्वरं ।
कदम्बगोलकाकारं तारं रूपमिव स्थितं ॥ २४ ॥
ध्यायेद्वा रश्मिजालेन दीप्यमानं समन्ततः ।
प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्वरं ॥ २५ ॥
ध्यायेज्जपेच्च सततमोङ्कारं परमक्षरं ।
मनःस्थित्यर्थमिच्छन्ति स्थूलध्यानमनुक्रमात् । २६ ॥
तद्भूतं निष्फलीभूतं लभेत् सूक्ष्मेऽपि संस्थितं ।
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायतं ॥ २७ ॥
नालेनाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतं ।

---

१ सत्त्वोपाधिसमायुक्तः सदा ध्येयश्च केशव इति ङ० ।
२ शुद्धदीपशिखाकृतिमिति ङ०, अ० च ।

सकर्णिके केसरिले सूर्य्यसोमाग्निमण्डलं ॥ २८ ॥
अग्निमण्डलमध्यस्थः शङ्खचक्रगदाधरः।
पद्मो चतुर्भुजो विष्णुरथ वाष्टभुजो हरिः ॥ २९ ॥
शार्ङ्गाच्चवलयधरः पाशाङ्कुशधरः परः।
स्वर्णवर्णः श्वेतवर्णः सश्रीवत्सः सकौस्तुभः ॥ ३० ॥
वनमाली स्वर्णहारी स्फुरन्मकरकुण्डलः।
रत्नोज्ज्वलकिरीटश्च पीताम्बरधरो महान् ॥ ३१ ॥
सर्व्वाभरणभूषाढ्यो वितस्तिर्वा यथेच्छया।
अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ओं ॥ ३२ ॥
ध्यानाच्छान्तो जपेन्मन्त्रं जपाच्छान्तश्च चिन्तयेत्।
जपध्यानादियुक्तस्य विष्णुः शीघ्रं प्रसीदति ॥ ३३ ॥
जपयज्ञस्य वै यज्ञाः कलां नार्हन्ति षाड़शीं।
जपिनं नोपसर्पन्ति व्याधयश्चाधयो ग्रहाः।
भुक्तिर्मुक्तिर्मृत्युजयो जपेन प्राप्नुयात् फलं (१) ॥ २४ ॥
इत्याग्नेये महापुराणे ध्यानं नाम त्रिसप्तत्यधिक-

त्रिशततमोऽध्यायः ॥

---

१ प्राप्नुयाद्धरिमिति ख०। प्राप्ते फलमिति अ०।

अथ चतुःसप्तत्यधिकत्रिशततमोऽध्यायः ।



धारणा ।

अग्निरुवाच । धारणा मनसोध्येये संस्थितिर्ध्यानवद्द्विधा ।
मूर्त्तामूर्तहरिध्यानमनोधारणतो हरिः ॥ १ ॥
यद्दाह्यावस्थितं लक्ष्यं तस्मान्न चलते मनः ।
तावत् कालं प्रदेशेषु धारणा मनसि स्थितिः ॥ २ ॥
कालावधि परिच्छिन्नं देहे संस्थापितं मनः ।
न प्रच्यवति यल्लक्ष्याद्धारणा साऽभिधीयते ॥ ३ ॥
धारणा द्वादशायामा ध्यानं द्वादशधारणाः ।
ध्यानं द्वादशकं यावत्समाधिरभिधीयते ॥ ४ ॥
धारणाभ्यासयुक्तात्मा यदि प्राणैर्विमुच्यते ।
कुलैकविंशमुत्तार्य स्वर्याति परमं पदं (१) ॥ ५ ॥
यस्मिन् यस्मिन् भवेदङ्गे योगिनां व्याधिसम्भवः ।
तत्तदङ्गं धिया व्याप्य धारयेत्तत्त्वधारणं ॥ ६ ॥
आग्नेयी वारुणी चैव ऐशानी चामृतात्मिका ।
साग्निः शिखा फडन्ता च विष्णोः कार्या द्विजोत्तम ॥ ७ ॥
नाड़ीभिर्विकटं दिव्यं शूलाग्रं वेधयेच्छुभम् ।
पादाङ्गुष्ठात् कपःलान्तं रश्मिमण्डलमाहृतं ॥ ८ ॥

---

१ स्वर्यं याति परं पदमिति च० ।

तिर्य्यक्चाधोऽभागेभ्यः प्रयाम्योऽतीव तेजसा (१) ।
चिन्तयेत् साधकेन्द्रस्तं यावत्सर्वं महामुने ॥ ९ ॥
भस्मीभूतं शरीरं स्वमतश्चैवोपसंहरेत् ।
शीतश्लेष्मादयः पापं विनश्यन्ति द्विजातयः ॥ १० ॥
गिरो धीरश्च (२) कारश्च कण्ठं चाधोमुखे स्मरेत् ।
ध्यायेदच्छिन्नचित्तात्मा भूयो भूतेन चात्मना ॥ ११ ॥
स्फुरच्छीकरसंस्पर्शप्रभूते हिमगामिभिः ।
धाराभिरखिलं विश्वमापूर्य्य भुवि चिन्तयेत् ॥ १२ ॥
ब्रह्मरन्ध्राच्च संक्षोभाद्यावदाधारमण्डलम् ।
सुषुम्नान्तर्गतो भूत्वा संपूर्णेन्दुकृतालयं ॥ १३ ॥
संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्त्तिना ।
क्षुत्पिपासाक्रमप्रायसन्तापपरिपीड़ितः ॥ १४ ॥
धारयेदारुणीं मन्त्री तुष्ट्यर्थं चाप्यतन्द्रितः ।
वारुणीधारणा प्रोक्ता ऐशानीधारणां शृणु ॥ १५ ॥
व्योम्नि ब्रह्ममये पद्मे प्राणापाने क्षयङ्गते ।
प्रसादं चिन्तयेद् विष्णोर्यावच्चिन्ता क्षयं गता ॥ १६ ॥
महाभावश्चपेत् सर्व्वं ततो व्यापक ईश्वरः ।
अर्द्धेन्दुं परमं शान्तं निराभासनिरञ्जनं ॥ १७ ॥
असत्यं सत्यमाभाति तावत्सर्वं चराचरं ।
यावत् स्वस्वरूपन्तु न दृष्टं गुरुवक्त्रतः ॥ १८ ॥
दृष्टे तस्मिन् परे तत्त्वे ब्रह्म सचराचरं ।

---

१ पाठोऽयमादर्शदोषेण दुष्टः ।

२ गौरश्च इति अ० ।

प्रमाणमानमेवञ्च ध्यानहृत्पद्मकल्पनं ॥ १९ ॥
मात्रमोङ्कवत्सर्वं जपहोमार्चनादिकं ।
विष्णुमन्त्रेण वा कुर्य्यादमृतां धारणां वदे ॥ २० ॥
संपूर्णेन्दुनिभं ध्यायेत् कमलं तन्तिमुष्टिगं ।
शिरःस्थं चिन्तयेद् यत्नाच्छ्राद्धायुतवर्चसं ॥ २१ ॥
सम्पूर्णमण्डलं व्योम्नि शिवकलोलपूर्णितं ।
तथा हृत्कमले ध्यायेत्तन्मध्ये स्वतनुं स्मरेत् ।
साधको विगतक्लेशो जायते धारणादिभिः ॥ २२ ॥
इत्याग्नेये महापुराणे धारणा नाम चतुःसप्तत्यधिक-
द्विशततमोऽध्यायः ॥

अथ पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ।

समाधिः ।

अग्निरुवाच । यदात्ममात्रं निर्भासं स्तिमितोदधिवत् स्थितं ।
चैतन्यरूपवद्ग्राह्यं तत् समाधिरिहोच्यते ॥ १ ॥
ध्यायमानः सविवेश यस्तिष्ठेदचलस्थिरः ।
निर्वातानलवद्योगी समाधिस्थः प्रकीर्त्तितः ॥ २ ॥
न शृणोति न चाघ्राति न पश्यति न वक्ष्यति ।
न च स्पर्शं विजानाति न चेष्टयते मनः ॥ ३ ॥
न चाभिमन्यते किञ्चिच्च बुध्यति काष्ठवत् ।
एवमोङ्कारसंलीनः समाधिस्थः स गीयते ॥ ४ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
ध्यायतो विष्णुमात्मानं समाधिस्तस्य योगिनः॥ ५॥
उपसर्गाः प्रवर्त्तन्ते दिव्याः सिद्धिप्रसूचकाः।
पातितः स्रावणो धातुर्दर्शनस्पार्श्ववेदनाः॥ ६॥
प्रार्थयन्ति च तं देवा भोगैर्दिव्यैश्च योगिनं।
नृपाश्च पृथिवीदानैर्धनैश्च सुधनाधिपाः॥ ७॥
वेदादिसर्व्वशास्त्राश्च स्वयमेव प्रवर्त्तते।
अभीष्टकर्त्तृविषयं काव्यञ्चास्य प्रवर्त्तते॥ ८॥
रसायनानि दिव्यानि दिव्यान्योषधयस्तथा।
समस्तानि च शिल्पानि कलाः सर्वाश्च विन्दति॥ ९॥
सुरेन्द्रकन्या इत्याद्या गुणाश्च प्रतिभादयः।
एतावत्स्वप्यजेद् यस्तु तस्य विष्णुः प्रमीदति॥ १०॥
अणिमादिगुणैश्वर्य्यः शिष्ये ज्ञानं प्रकाश्य च।
भुक्त्वा भोगान् यथेच्छातस्तनुत्यक्त्वालयात्ततः॥ ११॥
तिष्ठेत् स्वात्मनि विज्ञान आनन्दे ब्रह्मणीश्वरे।
मलिनो हि यथादर्शः आत्मज्ञानाय न क्षमः॥ १२॥
सर्वाश्रयाजिजे देहे देही विन्दति वेदनां।
योगयुक्तस्तु सर्व्वेषां योगाप्नोति वेदनां॥ १३॥
आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैको ह्यनेकेषु जलाधारेष्विवांशुमान्॥ १४॥
ब्रह्मस्थानिलतेजांसि जलभूचिन्निधातवः।
इमे लोका एव चात्मा तस्माच्च सचराचरं॥ १५॥

मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटं ।
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १६ ॥
करणान्येवमादाय तासु तास्विह योनिषु ।
सृजत्यात्मानमात्मैवं सम्भूय करणानि च ॥ १७ ॥
कर्मणा दोषमोहाभ्यामिच्छयैव स बध्यते ।
ज्ञानाद्विमुच्यते जीवो धर्म्माद् योगी न रोगभाक् ॥ १८ ॥
वर्त्याधारस्नेहयोगाद् यथा दीपस्य संस्थितिः ।
विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ॥ १९ ॥
अनन्ता रश्मयस्तस्य दीपवद् यः स्थितो हृदि ।
सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ॥ २० ॥
ऊर्द्धमेकः स्थितस्तेषां यो भित्त्वा सूर्य्यमण्डलं ।
ब्रह्मलोकमतिक्रम्य तेन याति पराङ्गतिं ॥ २१ ॥
यदस्यान्यद्रश्मिगतमूर्द्धमेव व्यवस्थितं ।
तेन देवनिकायानि धामानि प्रतिपद्यते ॥ २२ ॥
ये नैकरूपास्तास्वाद्रश्मयोऽस्य मृदुप्रभाः ।
इष्टकर्मोपभोगाय तैस्य सञ्चरते हि सः ॥ २३ ॥
बुद्धीन्द्रियाणि सर्वाणि मनः कर्मेन्द्रियाणि च ।
अहङ्कारस्य बुद्धेश्च पृथिव्यादीनि चैव हि ॥ २४ ॥
अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।
ईश्वरः सर्वभूतस्थ मत्तमन् मदसञ्च सः ॥ २५ ॥
बुद्धेरुत्पत्तिरव्यक्ता ततोऽहङ्कारसम्भवः ।
तस्मात् खादीनि जायन्ते एकोत्तरगुणानि तु ॥ २६ ॥

गन्धः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः ।
यो यस्मिन्नाश्रितश्चैषां स तस्मिन्नेव लीयते ॥ २७ ॥
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्त्तिताः ।
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते हि सः ॥ २८ ॥
अनादिरादिमान् यश्च स एव पुरुषः परः ।
लिङ्गेन्द्रियैरुपख्यातः स विकार उदाहृतः ॥ २९ ॥
यतो वेदाः पुराणानि विद्योपनिषदस्तथा ।
श्लोकाः सूत्राणि भाष्याणि यज्ञाश्चाह्नाश्रयं भवेत् ॥ ३० ॥
पितृयानोपयोगाश्च यदगम्यस्य चान्तरं ।
तेनाग्निहोत्रिणो यान्ति प्रजाकामा दिवं प्रति ॥ ३१ ॥
ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः ।
अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः ॥ ३२ ॥
पुनरावर्त्तने बीजभूता धर्म्मप्रवर्त्तकाः ।
सप्तर्षिनागयोगाश्च देवलोकं समाश्रिताः ॥ ३३ ॥
तावन्त एव मुनयः सर्वारम्भविवर्जिताः ।
तपसा ब्रह्मचर्य्येण सङ्कल्पागेन मेधया ॥ ३४ ॥
यत्र यत्रावतिष्ठन्ते यदाहृतमंप्लवं ।
वेदानुवचनं यज्ञा ब्रह्मचर्य्यं तपो दमः ॥ ३५ ॥
अहोपवासः सत्यत्वमात्मनो ज्ञानहेतवः ।
स त्वाद्यमैर्निदिध्यास्यः समस्तैरेवमेव तु ॥ ३६ ॥
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ।
य एवमेनं विन्दन्ति ये चारण्यकमाश्रिताः ॥ ३७ ॥
उपासते द्विजाः सत्यं श्रद्धया परया युताः ।

क्रमात्ते सम्भवन्त्यर्चिरहः शुक्लं तथोत्तरं ॥ ३८ ॥
अयनन्देवलोकञ्च सवितारं सविद्युतं ।
ततस्तान् पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ॥ ३९ ॥
करोति पुनरावृत्तिस्तेषामिह न विद्यते ।
यज्ञेन तपसा दानैर्ये हि स्वर्गजितो जनाः ॥ ४० ॥
धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ।
पितृलोकं चन्द्रमसं नभो वायुं जलं महीं ॥ ४१ ॥
क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च ।
एतद्यो न विजानाति मार्गद्वितयमात्मनः ॥ ४२ ॥
दन्दशूकः पतङ्गो वा भवेत्कीटोऽथवा कृमिः ।
हृदये दीपवद्ब्रह्मध्यानाज्जीवो मृतो भवेत् ॥ ४३ ॥
न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
आद्यन्तसत्यवादी च गृहस्थोऽपि विमुच्यते ॥ ४४ ॥

इत्याग्नेये महापुराणे समाधिर्नाम पञ्चसप्तत्यधिक
त्रिशततमोऽध्यायः ।

अथ षट्सप्तत्यधिकत्रिशततमोऽध्यायः ।

ब्रह्मज्ञानं ।

अग्निरुवाच । ब्रह्मज्ञानं प्रवक्ष्यामि संसाराज्ञानमुक्तये ।
अयमात्मा परं ब्रह्म अहमस्मीति मुच्यते ॥ १ ॥
देह आत्मा न भवति दृश्यत्वाच्च घटादिवत् ।
प्रसुप्ते मरणे देहादात्माऽन्यो ज्ञायते ध्रुवं ॥ २ ॥
देहः स चेद्व्यवहरेदविकार्यादिसन्निभः ।
चक्षुरादीनीन्द्रियाणि नात्मा वै करणं यतः ॥ ३ ॥
मनो धीरपि आत्मा न दीपवत् करणं यतः ।
प्राणोऽप्यात्मा न भवति सुषुप्ते चित्प्रभावतः ॥ ४ ॥
जाग्रत्स्वप्ने च चैतन्यं सङ्कीर्णत्वान्न बुध्यते ।
विज्ञानरहितः प्राणः सुषुप्ते ज्ञायते यतः ॥ ५ ॥
अतो नात्मेन्द्रियं तस्मादिन्द्रियादिकमात्मनः ।
अहङ्कारोऽपि नैवात्मा देहवद्व्यभिचारतः ॥ ६ ॥
उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वहृदि स्थितः ।
सर्वद्रष्टा च भोक्ता च नक्तमुज्ज्वलदीपवत् ॥ ७ ॥
समाधारम्भकाले च एवं सञ्चिन्तयेन्मुनिः ।
यतो ब्रह्मण आकाशं खाद्वायुर्वायुतोऽनलः ॥ ८ ॥
अग्नेरापो जलात्पृथ्वी ततः सूक्ष्मं शरीरकं ।
अपञ्चीकृतभूतेभ्य आसन् पञ्चीकृतान्यतः ॥ ९ ॥

स्थूलं शरीरं ध्यात्वात्मालयं ब्रह्मणि चिन्तयेत् ।
पञ्चोक्तानि भूतानि तत्कार्य्यञ्च विराट्स्मृतम् ॥ १० ॥
एतत् स्थूलं शरीरं हि आत्मनो ज्ञानुकल्पितं ।
इन्द्रियैरथ विज्ञानं धीरा जागरितं विदुः ॥ ११ ॥
विश्वस्तदभिमानी स्यात् त्रयमेतदकारकं ।
अपञ्चीकृतभूतानि तत्कार्यं लिङ्गमुच्यते ॥ १२ ॥
संयुक्तं सप्तदशभिर्हिरण्यगर्भसंज्ञितं ।
शरीरमात्मनः सूक्ष्मं लिङ्गमित्यभिधीयते ॥ १३ ॥
जाग्रत्संस्कारजः स्वप्नः प्रत्ययो विषयात्मकः ।
आत्मा तदुपमानो स्यात्तैजसो ह्यप्रपञ्चतः ॥ १४ ॥
स्थूलसूक्ष्मशरीराख्यद्वयस्यैकं हि कारणं ।
आत्मा ज्ञानञ्च साभासं तदध्याहृतमुच्यते ॥ १५ ॥
न सन्नासन्न सदसदेतन्मावयवं न तत् ।
निर्गतावयवं नेति नाभिन्नं भिन्नमेव च ॥ १६ ॥
भिन्नाभिन्नं ह्यनिर्वाच्यं बन्धसंसारकारकं ।
एकं स ब्रह्म विज्ञानात् प्राप्तं नैव च कर्म्मभिः ॥ १७ ॥
सर्वात्मना हीन्द्रियाणां संहारः कारणात्मनां ।
बुद्धेः स्थानं सुषुप्तं स्यात्तद्वयस्याभिमानवान् ॥ १८ ॥
प्राज्ञ आत्मा चयञ्चैतत् मकारः प्रणवः स्मृतः ।
अकारश्च उकारोऽसौ मकारो ह्ययमेव च ॥ १९ ॥
अहं साक्षी च चिन्मात्रो जाग्रत्स्वप्नादिकस्य च ।
नाज्ञानञ्चैव तत्कार्यं संसारादिकबन्धनं ॥ २० ॥
नित्यशुद्धबोधमुक्तसत्यमानन्दमद्वयं ।

ब्रह्माहमस्म्यहं ब्रह्म परं ज्योतिर्विमुक्त ओं ॥ २१ ॥
अहं ब्रह्म परं ज्ञानं ममाधिर्बन्धघातकः ।
चिरमानन्दकं ब्रह्म सत्यं ज्ञानमनन्तकं ॥ २२ ॥
अयमात्मा परम्ब्रह्म तदू ब्रह्म त्वमसीति च ।
गुरुणा बोधितो जीवो ह्यहं ब्रह्मास्मि वाक्षतः ॥ २३ ॥
सोऽमावादित्यपुरुषः सोऽमावहमखण्ड ओं ।
मुच्यतेऽसारसंसाराद्ब्रह्मज्ञो ब्रह्म तद्भवेत् ॥ २४ ॥

इत्याग्नेये महापुराणे ब्रह्मज्ञानं नाम षट्सप्तत्यधिक-

त्रिशततमोऽध्यायः ।

अथ सप्तसप्तत्यधिकत्रिशततमोऽध्यायः ।

ब्रह्मज्ञानं ।

अग्निरुवाच । अहं ब्रह्म परं ज्योतिः पृथिव्यवनलोज्झितं ।
अहं ब्रह्म परं ज्योतिर्वायुाकाशविवर्जितं ॥ १ ॥
अहं ब्रह्म परं ज्योतिरादिकार्यविवर्जितम ।
अहं ब्रह्म परं ज्योतिर्विराडात्मविवर्जितं ॥ २ ॥
अहं ब्रह्म परं ज्योतिर्जाग्रत्स्थानविवर्जितम् ।
अहं ब्रह्म परं ज्योतिर्विश्वभावविवर्जितम् ॥ ३ ॥
अहं ब्रह्म परं ज्योतिराकाराक्षरवर्जितम् ।
अहं ब्रह्म परं ज्योतिर्वाक्पाण्यङ्घ्रिविवर्जितम ॥ ४ ॥

अहं ब्रह्म परं ज्योतिः पायूपस्थविवर्जितं ।
अहं ब्रह्म परं ज्योतिः श्रोत्रत्वक्चक्षुरुज्झितं ॥ ५ ॥
अहं ब्रह्म परं ज्योतीरसरूपविवर्जितम् ।
अहं ब्रह्म परं ज्योतिः सर्वगन्धविवर्जितं ॥ ६ ॥
अहं ब्रह्म परं ज्योतिर्जिह्वाघ्राणविवर्जितं ।
अहं ब्रह्म परं ज्योतिः स्पर्शशब्दविवर्जितं ॥ ७ ॥
अहं ब्रह्म परं ज्योतिर्मनोबुद्धिविवर्जितं ।
अहं ब्रह्म परं ज्योतिश्चित्ताहङ्कारवर्जितं ॥ ८ ॥
अहं ब्रह्म परं ज्योतिः प्राणापानविवर्जितं ।
अहं ब्रह्म परं ज्योतिर्व्यानोदानविवर्जितं ॥ ९ ॥
अहं ब्रह्म परं ज्योतिः समानपरिवर्जितं ।
अहं ब्रह्म परं ज्योतिर्जरामरणवर्जितं ॥ १० ॥
अहं ब्रह्म परं ज्योतिः शोकमोहविवर्जितं ।
अहं ब्रह्म परं ज्योतिः क्षुत्पिपासाविवर्जितं ॥ ११ ॥
अहं ब्रह्म परं ज्योतिः शब्दोड्डूतादिवर्जितं ।
अहं ब्रह्म परं ज्योतिर्हिरण्यगर्भवर्जितं ॥ १२ ॥
अहं ब्रह्म परं ज्योतिः स्वप्नावस्थाविवर्जितं ।
अहं ब्रह्म परं ज्योतिस्स्वेजसादिविवर्जितं ॥ १३ ॥
अहं ब्रह्म परं ज्योतिरपकारादिवर्जितं ।
अहं ब्रह्मपरं ज्योतिः सभाज्ञानविवर्जितं ॥ १४ ॥
अहं ब्रह्मपरं ज्योतिरध्याकृतविवर्जितं ।
अहं ब्रह्म परं ज्योतिः सत्त्वादिगुणवर्जितं ॥ १५ ॥
अहं ब्रह्म परं ज्योतिः सदसद्भावर्वर्जितं ।

अहं ब्रह्म परं ज्योतिः सर्वावयववर्जितं ॥ १६ ॥
अहं ब्रह्म परं ज्योतिर्भेदाभेदविवर्जितं ।
अहं ब्रह्म परं ज्योतिः सुषुप्तिस्थानवर्जितम् ॥ १७ ॥
अहं ब्रह्म परं ज्योतिः प्राग्भावविवर्जितम् ।
अहं ब्रह्म परं ज्योतिर्मकारादिविवर्जितम् ॥ १८ ॥
अहं ब्रह्म परं ज्योतिर्मानमेयविवर्जितम् ।
अहं ब्रह्म परं ज्योतिर्मितिमात्रविवर्जितम् ॥ १९ ॥
अहं ब्रह्म परं ज्योतिः साक्षित्वादिविवर्जितम् ।
अहं ब्रह्म परं ज्योतिः कार्यकारणवर्जितम् ॥ २० ॥
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितं ।
जाग्रत् स्वप्नसुषुप्त्यादिमुक्तं ब्रह्म तुरीयकं ॥ २१ ॥
नित्यशुद्धबुद्धमुक्तं सत्यमानन्दमद्वयम् ।
ब्रह्माहमस्म्यहं ब्रह्म सच्चिदानं विमुक्त ओं ।
अहं ब्रह्म परं ज्योतिः समाधिर्मोक्षदः परः ॥ २२ ॥

इत्याग्नेये महापुराणे समाधिर्नाम सप्तसप्तत्यधिक-
त्रिशततमोऽध्यायः ॥

अथाष्टसप्तत्यधिकत्रिशततमोऽध्यायः ।

ब्रह्मज्ञानं ।

अग्निरुवाच । यज्ञैश्च देवानाप्नोति वैराजं तपसा पदं ।
ब्रह्मणः कर्ममन्त्राभ्यामैराग्यात् प्रकृतौ लयं ॥ १ ॥
ज्ञानात् प्राप्नोति कैवल्यं पञ्चैता गतयः स्मृताः ।
प्रीतितापविषादादैर्विनिवृत्तिर्विरक्तता ॥ २ ॥
मन्त्रासः कर्मणान्त्यागः कृतानामकृतैः सह ।
अव्यक्तादौ विशेषान्ते विकारोऽस्मिन्निवर्त्तते ॥ ३ ॥
चेतनाचेतनान्यत्वज्ञानेन ज्ञानमुच्यते ।
परमात्मा च सर्वेषामाधारः परमेश्वरः ॥ ४ ॥
विष्णुनाम्ना च देवेषु वेदान्तेषु च गीयते ।
यज्ञेश्वरो यज्ञपुमान् प्रवृत्तैरिज्यते ह्यमी ॥ ५ ॥
निवृत्तैर्ज्ञानयोगेन ज्ञानमूर्त्तिः स चेज्यते ।
ऋग्यदीर्घप्रतान्यन्तु वचस्तत्पुरुषोत्तमः ॥ ६ ॥
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने ।
आगमोक्तं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ ७ ॥
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ।
हे ब्रह्मणो वेदितव्ये ब्रह्मशब्दपरञ्च यत् ॥ ८ ॥
वेदादिविद्या ह्यपरमक्षरं ब्रह्मसत्परम् ।
तदेतद्भगवदाख्यमुपचारैर्दधेऽन्यतः ॥ ९ ॥
सर्ग्गर्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारोऽर्थं महामुने ॥ १० ॥

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥ ११ ॥
वसन्ति विष्णौ भूतानि स च धातुस्त्रिधात्मकः।
एवं हरौ हि भगवान् शब्दोऽन्यत्रोपचारतः ॥ १२ ॥
उत्पत्तिं प्रलयञ्चैव भूतानामगतिं गतिं।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ १३ ॥
ज्ञानशक्तिः परैश्वर्यं वीर्यं तेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ १४ ॥
त्वङ्मिङ्खजनकायाञ्च योगं केशिध्वजः पुरा।
अनात्मन्यात्मबुद्धिर्या आत्मस्वमिति या मतिः ॥ १५ ॥
अविद्याभवसम्भूतिर्बीजमेतद्द्विधा स्थितम्।
पञ्चभूतात्मके देहे देही मोहतमावृतः ॥ १६ ॥
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिं।
दृत्यञ्च पुत्रपौत्रेषु तद्देहोत्पातितेषु च ॥ १७ ॥
करोति पण्डितः साम्यमनात्मनि कलेवरे।
सर्वदेहोपकाराय कुरुते कर्म मानवः ॥ १८ ॥
देहयात्रा यदा पुंसस्तदा बन्धाय तत्परं।
निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ॥ १९ ॥
दुःखज्ञानमयोऽधर्मः प्रकृतेः स तु नात्मनः।
जलस्य नाग्निना सङ्गः स्यात्तीसङ्गात्तथापि हि ॥ २० ॥
शब्दाद्यैः कादिका धर्मास्तत्कृतस्य वै महामुने।
नश्चात्मा प्रकृतौ सङ्गादहंमानादिभूषितः ॥ २१ ॥
भजते प्राकृतान्धर्मान् अन्यस्तेभ्यो हि सोऽव्ययः।

वस्त्राय विषयासङ्गं मनो निर्विषयं धिये ॥ २२ ॥
विषयात्तत्समाकृष्य ब्रह्मभूतं हरिं स्मरेत् ।
आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने ॥ २३ ॥
विचार्य स्वात्मनः शक्त्या लौहमाकर्षको यथा ।
आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ॥ २४ ॥
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ।
विनिघ्नन्दः समाधिस्थः परं ब्रह्माधिगच्छति ॥ २५ ॥
यमैः सनियमैः स्थित्या प्रत्याहृत्या मरुज्जयैः ।
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ॥ २६ ॥
वशीकृतैस्ततः कुर्य्यात् स्थितं चेतः शुभाश्रये ।
आश्रयस्ते तसो ब्रह्म मूर्त्तञ्चामूर्तकं द्विधा ॥ २७ ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्मभावनया चान्ये देवाद्याः स्थावरान्तकाः ॥ २८ ॥
हिरण्यगर्भादिषु च ज्ञानकर्मात्मिका द्विधा ।
त्रिविधा भावना प्रोक्ता विश्वं ब्रह्म उपास्यते ॥ २९ ॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरं ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्म संज्ञितम् ॥ ३० ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरं ।
अशक्यं प्रथमं ध्यातुमतो मूर्त्तादि चिन्तयेत् ॥ ३१ ॥
ब्रह्मभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत् ॥ ३२ ॥
इत्याग्नेये महापुराणे ब्रह्मज्ञानं नामाष्टसप्तत्यधिक-
त्रिशततमोऽध्यायः ॥

अथैकोनाशीत्यधिकत्रिशततमोऽध्यायः ।

अहैतब्रह्मविज्ञानं ।

अग्निरुवाच । अहैतब्रह्मविज्ञानं वक्ष्ये यद्यवतोऽगदत् ।
शालग्रामे तपश्चक्रे वासुदेवार्चनादिकृत् ॥ १ ॥
मृगसङ्गान्मृगो भूत्वा अन्तकाले स्मरन् मृगं ।
जातिस्मरो मृगस्त्यक्त्वा देहं योगात्स्वतोऽभवत् ॥ २ ॥
अहैतब्रह्मभूतश्च जडवल्लोकमाचरत् ।
चक्राङ्को वीरराजस्य विष्टियोगममन्यत ॥ ३ ॥
उवाह शिबिकामस्य चक्रुर्वेचनचोदितः ।
गृहीतो विष्टिना ज्ञानी उवाचात्मत्रयाय तं ॥ ४ ॥
ययौ जडगतिः पश्चात् ये त्वन्ये त्वरितं ययुः ।
शीघ्रान् शीघ्रगतीन् दृष्ट्वा अशीघ्रं तं नृपोऽब्रवीत् ॥ ५ ॥
राजोवाच । किं श्रान्ताऽस्यल्पमध्वानं त्वयोढा शिबिका मम ।
किमायासमहो न त्वं पोवानसि निरीक्ष्यसे ॥ ६ ॥
ब्राह्मण उवाच । नाहं पोवान्न वैवोढा शिबिका भवतो मया ।
न श्रान्तोऽस्मि न वायासा वोढव्याऽसि महीपते ॥ ७ ॥
भूमौ पादयुगन्यस्तौ जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थौ तद्धारं तूदरम् ॥ ८ ॥
वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ।
स्कन्धस्थितेयं शिबिका मम भारोऽत्र किं नृप ॥ ९ ॥

शिविकायां स्थितश्चेदं देहं त्वदुपलक्षितं ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥ १० ॥
अहं त्वञ्च तथाऽन्ये च भूतैरुद्ग्राम(१)पार्थिव ।
गुणप्रवाहपतितो गुणवर्गो हि यात्ययं ॥ ११ ॥
कर्म्मवश्या गुणास्वैते सत्त्वाद्याः पृथिवीपते ।
अविद्यासञ्चितं कर्म तच्चाग्रेषेषु जन्तुषु ॥ १२ ॥
आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रह्रासापचयौ नास्य एकस्याखिलजन्तुषु ॥ १३ ॥
यदा नोपचयस्तस्य यदा नापचयो नृप ।
तदा पीवानसीति त्वं कया युक्त्या त्वयेरितं ॥ १४ ॥
भूजङ्घापादकट्यूरुजठरादिषु संस्थिता ।
शिविकेयं तथा स्कन्धे तदा भावःममस्त्वया ॥ १५ ॥
तदन्यजन्तुभिर्भूप शिविकोत्थानकर्म्मणा ।
शैलद्रव्यग्रहोत्थोपि पृथिवीसम्भवोपि वा ॥ १६ ॥
यथा पुंसः पृथग्भावः प्राकृतैः करणैर्नृप ।
सोढ्यः स महाभारः कतरो नृपते मया ॥ १७ ॥
यद्द्रव्या शिविका चेयं तद्द्रव्यो भूतसंग्रहः ।
भवतो मेऽखिलस्यास्य समत्वेनोपदर्शितः ॥ १८ ॥
तच्छ्रुत्वोवाच राजा तं गृहीत्वाङ्घ्री क्षमाप्य च ।
प्रसादं कुरु त्यक्ते मां शिविकां ब्रूहि मृग्यते ।
यो भवान् यद्विमिश्रं वा यदागमनकारणम् ॥ १९ ॥
ब्राह्मण उवाच । श्रूयतां कोऽहमित्येतदहं नैव च यक्ष्यते ।

---

१ पाठोऽयं न समीचीनः ।

उग्रभोगनिमित्तस्य सर्वत्रागमनक्रिया ॥ २० ॥
सुखदुःखोपभोगौ तु तौ देशाद्युपपादकौ ।
धर्माधर्मौद्भवौ भोक्तुं जन्तुर्देशादिमृच्छति ॥ २१ ॥
राजोवाच । योऽस्ति सोऽहमिति ब्रह्मन् कथं वक्तुं न शक्यते ।
आत्मन्येव न दोषाय शब्दोऽहमिति यो द्विज ॥ २२ ॥
ब्राह्मण उवाच । शब्दोऽहमिति दोषाय नात्मन्येष तथैव तत् ।
अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥ २३ ॥
यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् कोऽहमित्येतद्विफलं वचः ॥ २४ ॥
त्वं राजा शिबिका चेयं वयं वाहाः पुरःसराः ।
अयञ्च भवतो लोको न सदेतदुपोच्यते ॥ २५ ॥
दृष्टादृष्ट ततश्चेयं शिबिका त्वदधिष्ठिता ।
का दृष्टसंज्ञा जातास्य दारुसंज्ञाथ वा नृप ॥ २६ ॥
दृष्टारूढो महाराजो नायं वदति चेतनः ।
न च दारूणि सर्वस्त्वां ब्रवीति शिबिकागतं ॥ २७ ॥
शिबिकादारुसङ्घातो रचनास्थितिसंस्थितः ।
अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥ २८ ॥
पुमान् स्त्री गौरयं वाजी कुञ्जरो विहगस्तरुः ।
देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु ॥ २९ ॥
जिह्वा ब्रवीत्यहमिति दन्तौष्ठौ तालुकं नृप ।
एते नाहं यतः सर्वे वाङ्निपादनहेतवः ॥ ३० ॥
किं हेतुभिर्बहुत्वेषा वागेवाहमिति स्वयं ।
तथापि वाङ्नाम्नेतदुक्तं मिथ्या न युज्यते ॥ ३१ ॥

पिण्डः पृथग् यतः पुंसः शिरःपाद्यादिलक्षणः ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् करोम्यहं ॥ ३२ ॥
यदन्योऽस्ति परः कोपि मत्तः पार्थिवसत्तम ।
तदेषोहमयं चान्यो वक्तुमेवमपीष्यते ॥ ३३ ॥
परमार्थभेदो न नगो न पशुर्न च पादपः ।
शरीराश्च विभेदाश्च य एते कर्मयोनयः ॥ ३४ ॥
यस्तु राजेति यल्लोके यच्च राजभटात्मकम् ।
तच्चान्यच्च नृपेत्थन्तु न सत् सम्यगनामयं ॥ ३५ ॥
त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपोरिपुः ।
पत्न्याः पतिः पिता सूनोः कस्त्वां भूप वदाम्यहं ॥ ३६ ॥
त्वं किमेतच्छिरः किन्नु शिरस्तव तथोदरं ।
किमु पादादिकं त्वं वै तवैतत् किं महीपते ॥ ३७ ॥
समस्तावयवेभ्यस्त्वं पृथग्भूतो व्यवस्थितः ।
कोहमित्यत्र निपुणं भूत्वा चिन्तय पार्थिव ।
तच्छ्रुत्वोवाच राजा तमवधूतं द्विजं हरिं ॥ ३८ ॥

राजोवाच । श्रेयोऽर्थमुद्यतः प्रष्टुं कपिलर्षिमहं द्विज ।
तस्यांशः कपिलर्षेस्त्वं मत्कृते ज्ञानदो भुवि ।
ज्ञानवोचुदधेर्यस्मात्तच्छ्रेयस्तच्च मे वद ॥ ३९ ॥

ब्राह्मण उवाच । भूयः पृच्छसि किं श्रेयः परमार्थञ्च पृच्छसि ।
श्रेयांस्यपरमार्थानि अश्रेयांस्येव भूपते ॥ ४० ॥
देवताराधनं कृत्वा धनसम्पत्समिच्छति ।
पुत्रानिच्छति राज्यञ्च श्रेयस्तस्यैव किं नृप ॥ ४१ ॥
विवेकिनस्तु संयोगः श्रेयो यः परमात्मनः ।

यज्ञादिका क्रिया न स्यात् नास्ति द्रव्योपपत्तिता॥ ४२ ॥
परमार्थात्मनोर्योगः परमार्थ इतीष्यते ।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ॥ ४३ ॥
जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः ।
परं ज्ञानमयोऽमूर्त्तो गुणजात्यादिभिर्विभुः ॥ ४४ ॥
निदाघऋतुसंवादं वदामि द्विज तं शृणु(१) ।
ऋतुर्ब्रह्मसुतो ज्ञानी तच्छिष्योऽभूत् पुलस्त्यजः ॥ ४५ ॥
निदाघः प्राप्तविद्योऽस्मान्नगरे वै पुरे स्थितः ।
देविकायास्तटे तच्च तर्कयामास वै ऋतुः ॥ ४६ ॥
दिव्ये वर्षसहस्रेऽगाद्विदाघमवलोकितुं ।
निदाघो वेश्मदेवास्ते भुक्त्वान्नं शिथमब्रवीत् ।
भुक्तस्ते त्वमिरुत्पन्ना तुष्टिदा माऽद्यया यतः ॥ ४७ ॥
ऋतुरुवाच । क्षुदस्ति यस्य भुक्तेऽन्ने तृप्तिर्ब्राह्मण जायते ।
न मे क्षुदभवत्तृप्तिं कस्मात्त्वं परिपृच्छसि ॥ ४८ ॥
क्षुत्तृष्णे देहधर्माख्ये न ममैते यतो द्विज ।
पृष्टोऽहं यत्त्वया ब्रूयां(२) त्वमिरस्त्येव मे सदा ॥ ४९ ॥
पुमान् सर्वगतो व्याप्तो आकाशवदयं यतः ।
अतोऽहं प्रत्यगात्मास्मीत्येतदर्थं भवेत् कथं(३) ॥ ५० ॥
सोऽहं गन्ता(४) न चागन्ता नैकदेशनिकेतनः ।
त्वं चान्यो न भवेन्नापि नान्यस्त्वत्तोऽस्मि वा त्वहं ॥ ५१ ॥

---

१ निदाघऋतुसंवादमहं तव वदामि शृणु इति ख०, अ० च ।
२ ततः क्षुदभावाभावादिति ख०, अ० च ।
३ कुतः कुत्र च मत्तोऽस्मीत्येतदर्थवत् कथमिति ख०, अ० च ।
४ सोऽहं नित्य ख० ।

मृण्मयं हि गृहं यद्वन्मृदालिप्तं स्थिरीभवेत् ।
पार्थिवोऽयं तथा देहः पार्थिवैः परमाणुभिः ॥ ५२ ॥
ऋतुरस्मि तवाचार्यः प्रश्नादानाय सेऽद्विज ।
इहागतोऽहं यास्यामि परमार्थस्त्वयोदितः ॥ ५३ ॥
एकमेवमिदं विद्धि न भेदः सकलं जगत् ।
वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ॥ ५४ ॥
ऋतुर्वर्षसहस्रान्ते पुनस्तत्रगरं ययौ ।
निदाघं नगरप्रान्ते एकान्ते स्थितमब्रवीत् ।
एकान्ते क्रीयते कस्मान्निदाघं ऋतुरब्रवीत् ॥ ५५ ॥

निदाघ उवाच । भो विप्रजनसंवादी महानेष नरेश्वर ।
प्रविवीक्ष्य पुरं रम्यं तेनाऽत्र क्रीयते मया ॥ ५६ ॥

ऋतुरुवाच । नराधिपोऽत्र कतमः कतमश्चेतरो जनः ।
कथ्यतां मे द्विजश्रेष्ठ त्वमभिज्ञो द्विजोत्तम ॥ ५७ ॥
योऽयं गजेन्द्रमुन्मत्तमद्रिशृङ्गसमुत्थितं ।
अधिरूढो नरेन्द्रोऽयं परिवारस्तथेतरः(१) ॥ ५८ ॥
गजो योऽयमधो ब्रह्मन्नुपर्यैष स भूपतिः ।
ऋतुराह गजः क्रीडश्च राजा चाह निदाघकः ॥ ५९ ॥
ऋतुर्निदाघ आरूढो दृष्ट्वान्तं पश्य वाहनं ।
उपर्यैष यथा राजा त्वमधः कुञ्जरो यथा ॥ ६० ॥
ऋतुः(२)प्राह निदाघन्तं कतमस्त्वामहं वदे ।
उक्तो निदाघस्तत्रत्या प्राह मे त्वं गुरुर्ध्रुवम् ॥ ६१ ॥

---

१ क्वाऽधोऽयं गजः राजा परलोकस्तथेतर इति ख०, ग० च ।

२ क० पुस्तके सर्वत्र च ऋभुरिति ऋतुस्थानीयः पाठः ।

नान्यस्माद्वैतसंस्कारसंस्कृतं मानसं तथा ।
ऋतुः प्राह निदाघन्तं ब्रह्मज्ञानाय चागतः ।
परमार्थं सारभूतमद्वैतं दर्शितं मया ॥ ६२ ॥
ब्राह्मण उवाच । निदाघाऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ।
सर्वभूतान्यभेदेन दृष्टवान् स तदात्मनि ॥ ६३ ॥
अवाप मुक्तिं ज्ञानात्स तथा त्वं मुक्तिमाप्स्यसि ।
एकः समस्तं त्वञ्चाहं विष्णुः सर्वगतो यतः ॥ ६४ ॥
पीतनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तिदृष्टिभिरात्मापि तथैकः स पृथक् पृथक् ॥ ६५ ॥
अग्निरुवाच । मुक्तिं ह्यवाप भवतो ज्ञानमारेण भूपतिः(१) ।
संसाराज्ञानदुश्चारिज्ञानं ब्रह्मेति चिन्तय ॥ ६६ ॥
इत्याग्नेये महापुराणे अद्वैतब्रह्मविज्ञानं नामैकोनाशीत्यधिक
त्रिशततमोऽध्यायः ॥

अथाशीत्यधिकत्रिशततमोऽध्यायः ।

गीतासारः ।

अग्निरुवाच । गीतासारं प्रवक्ष्यामि सर्वगीतोत्तमोत्तमं ।
कृष्णोऽर्जुनाय यमाह पुरा वै भुक्तिमुक्तिदं(२) ॥ १ ॥
श्रीभगवानुवाच । गतासुरगतासुर्वा न शोच्यो देहवानजः ।
आत्माऽजरोऽमरोऽभेद्यस्तस्माच्छोकादिकं त्यजेत् ॥ २ ॥

१ ज्ञानात् मौनीश्वरप्रतिष्ठिति ख० अ० च ।
२ पठता भुक्तिमुक्तिदमिति ख० ।

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् कामस्ततः क्रोधः क्रोधात्सम्मोह एव च ॥ ३ ॥
सम्मोहात् स्मृतिविभ्रंशो बुद्धिनाशात् प्रणश्यति ।
दुःसङ्गहानिः सत्सङ्गात्मोक्षकामो च कामजित् ॥ ४ ॥
कामत्यागादात्मनिष्ठः स्थिरप्रज्ञस्तदोच्यते ।
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ ५ ॥
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ ६ ॥
नैव तस्य कृते नार्थो नाकृते नेह कश्चनः ।
तत्त्ववित्तु महाबाहो गुनकर्मविभागयोः ॥ ७ ॥
गुणा गुणेषु वर्त्तन्ते इति मत्वा न सज्जते ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति ॥ ८ ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ।
ब्रह्मण्याधाय कर्माणि सङ्गन्त्यक्त्वा करोति यः ॥ ९ ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ १० ॥
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ११ ॥
न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति ।
दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ १२ ॥
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १३ ॥
चतुर्विधा भजन्ते मां ज्ञानी चैकत्वमास्थितः ।

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥ १४ ॥
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ।
अधिभूतं क्षरोभावः पुरुषश्चाधिदैवतं ॥ १५ ॥
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ।
अन्तकाले स्मरन्मान्च मद्भावं यात्यसंशयः ॥ १६ ॥
यं यं भावं स्मरन्लोके त्यजेद्देहन्तमाप्नुयात् ।
प्राणं न्यस्य भ्रुवोर्मध्ये अन्ते प्राप्नोति मत्परम् ॥ १७ ॥
ओमित्येकाक्षरं ब्रह्मवदन् देहं त्यजन्तथा ।
ब्रह्मादिस्तम्बपर्य्यन्ताः सर्व्वे मम विभूतयः ॥ १८ ॥
ओमन्तयोजिताः सर्वे ममांशाः(१) प्राणिनः स्मृताः ।
अहमेको विश्वरूप इति ज्ञात्वा विमुच्यते ॥ १९ ॥
क्षेत्रं शरीरं यो वेत्ति क्षेत्रज्ञः स प्रकीर्तितः ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २० ॥
महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥ २१ ॥
इच्छा द्वेषः सुखं दुःख सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतं ॥ २२ ॥
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवं ।
आचार्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥ २३ ॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ॥ २४ ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।

---

१ समाना इति च० ।

नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ २५ ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ २६ ॥
अध्यात्मज्ञाननिष्ठत्वन्तत्त्वज्ञानानुदर्शनं ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ २७ ॥
ज्ञेयं यत्तत् प्रवक्ष्यामि यं ज्ञात्वाऽमृतमश्नुते ।
अनादि परमं ब्रह्म सत्त्वं नाम तदुच्यते ॥ २८ ॥
सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ २९ ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ ३० ॥
बहिरन्तश्च भूतानामचरञ्चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थञ्चान्तिकेऽपि यत् ॥ ३१ ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च विज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ ३२ ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं ॥ ३३ ॥
ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ ३४ ॥
अन्ये त्वेवमजानन्तो श्रुत्वान्येभ्य उपासते ।
तेपि चाश्रु तरन्त्येव मृत्युं श्रुतिपरायणाः ॥ ३५ ॥
सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतो ज्ञानमेव च ॥ ३६ ॥

गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ।
मानावमानमित्रारितुल्यस्त्यागी स निर्गुणः ॥ ३७ ॥
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ ३८ ॥
द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
अहिंसादिः क्षमा चैव दैवोमम्यत्तितो नृणां ॥ ३९ ॥
न शौचं नापि वाचारो ह्यासुरोमम्यदोद्भवः ।
नरकत्वात् क्रोधलोभकामस्तस्मात्त्रयं त्यजेत् ॥ ४० ॥
यज्ञस्तपस्तथा दानं सत्त्वादेस्त्रिविधं स्मृतम् ।
आयुः सत्त्वं बलारोग्यसुखायात्वन्तु सात्त्विकं ॥ ४१ ॥
दुःखशोकामयायात्वं तीक्ष्णरूक्षन्तु राजसं ।
अमेध्य क्लिष्टपूत्यन्नं तामसं नीरसादिकं ॥ ४२ ॥
यष्टव्यो विधिना यज्ञो निष्कामाय स सात्त्विकः ।
यज्ञः फलाय दम्भात्मो राजसस्तामसः क्रतुः ॥ ४३ ॥
अदासत्वादिविध्युक्तं तपः शारीरमुच्यते ।
देवादिपूजाऽहिंसादि वाङ्मयं तप उच्यते ॥ ४४ ॥
अनुद्वेगकरं वाक्यं सत्यं स्वाध्यायसज्जपः ।
मानसं चित्तसंशुद्धेर्मौनमात्मविनिग्रहः ॥ ४५ ॥
सात्त्विकञ्च तपोऽकामं फलाद्यर्थन्तु राजसं ।
तामसं परपीड़ाये सात्त्विकं दानमुच्यते ॥ ४६ ॥
देशादौ चैव दानञ्चमुष्कारायं राजसं ।
अदेशादावज्ञातं तामसं दानमीरितं ॥ ४७ ॥

ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
यज्ञदानादिकं कर्म्म भुक्तिमुक्तिप्रदं नृणां ॥ ४८ ॥
अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलं ।
भवत्यत्यागिनां(१) प्रेत्य न तु सन्न्यासिनां क्वचित् ॥ ४९ ॥
तामसः कर्मसंयोगात् मोहात्क्लेशभयादिकात् ।
राजसः सात्त्विकोऽकामात् पञ्चैते कर्महेतवः ॥ ५० ॥
अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवञ्चैवात्र पञ्चमं ॥ ५१ ॥
एकं ज्ञानं सात्त्विकं स्यात् पृथग् ज्ञानन्तु राजसं ।
अतत्त्वार्थन्तामसं स्यात् कर्माकामाय सात्त्विकं ॥ ५२ ॥
कामाय राजसं कर्म मोहात् कर्म तु तामसं ।
सिद्ध्यसिद्ध्योः समः कर्त्ता सात्त्विको राजसोऽल्पपि ॥ ५३ ॥
यठोऽलमस्तामसः स्यात् कार्य्यादिधीश्च सात्त्विकी ।
कार्य्यार्थं सा राजसी स्यादिपरीता तु तामसी ॥ ५४ ॥
मनोधृतिः सात्त्विको स्यात् प्रीतिकामेति राजसी ।
तामसी तु प्रशोकादौ सुखं सत्त्वात्तदन्तगं ॥ ५५ ॥
सुखं तद्राजसञ्चाग्रे अन्ते दुःखन्तु तामसं ।
अतः प्रवृत्तिभूतानां येन सर्वमिदन्ततं ॥ ५६ ॥
स्वकर्मणा तमभ्यर्च्य विष्णुं सिद्धिञ्च विन्दति ।
कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ॥ ५७ ॥

---

१ भवत्यत्यागिनामिति खः ।

ब्रह्मादिस्तम्बपर्यन्तं जगद्विष्णुञ्च वेत्ति यः ।
सिद्धिमाप्नोति भगवद्भक्तो भागवती ध्रुवं ॥ ५८ ॥
इत्याग्नेये महापुराणे गीतासारो नामाशीत्यधिक-
त्रिशततमोऽध्यायः ॥

अथैकाशीत्यधिकत्रिशततमोऽध्यायः ।

यमगीता ।

अग्निरुवाच । यमगीतां प्रवक्ष्यामि उक्ता या नाचिकेतसे ।
पठतां शृण्वतां मुक्त्यै मोक्षार्थिनां मतां ॥ १ ॥
यम उवाच । आसनं शयनं यानपरिधानगृहादिकम् ।
वाञ्छत्यहोऽतिमोहेन सुस्थिरं स्वयमस्थिरः ॥ २ ॥
भोगेषु शक्तिः सततं तथैवात्मावलोकनं ।
श्रेयः परं मनुष्याणां कपिलोद्गीतमेव हि ॥ ३ ॥
सर्व्वत्र ममदर्शित्वं निर्म्ममत्वममङ्गता ।
श्रेयः परं मनुष्याणां गीतं पञ्चशिखेन हि ॥ ४ ॥
आगर्भजन्मबाल्यादिवयोऽवस्थादिवेदनं ।
श्रेयः परं मनुष्याणां गङ्गाविष्णुप्रगीतकं ॥ ५ ॥
आध्यात्मिकादिदुःखानामाद्यन्तादिप्रतिक्रिया ।
श्रेयः परं मनुष्याणां जनकोद्गीतमेव च ॥ ६ ॥
अभिप्रयोर्भेदकरः प्रत्ययो यः परात्मनः ।
तच्छान्तिपरमं श्रेयो ब्रह्मोद्गीतमुदाहृतं ॥ ७ ॥

कर्त्तव्यमिति यत्कर्म्म ऋग्यजुःसामसंज्ञितं ।
क्रियते श्रेयसे सङ्गान् जैगीषव्येण गीयते ॥ ८ ॥
हानिः सर्व्वविधित्सानामात्मनः सुखहैतुकी ।
श्रेयः परं मनुष्याणां देवलोद्गीतमीरितं ॥ ९ ॥
कामत्यागात्तु विज्ञानं सुखं ब्रह्म परं पदं ।
कामिनां न हि विज्ञानं सनकोद्गीतमेव तत् ॥ १० ॥
प्रवृत्तञ्च निवृत्तञ्च कार्य्यं कर्म्मपरोऽब्रवीत् ।
श्रेयसां श्रेय एतद्धि नैष्कर्म्यं ब्रह्म तद्धरिः ॥ ११ ॥
पुमांश्चाधिगतज्ञानो भेदं नाप्नोति सत्तमः ।
ब्रह्मणा विष्णुसंज्ञेन परमेणाव्ययेन च १२ ॥
ज्ञानं विज्ञानमास्तिक्यं सौभाग्यं रूपमुत्तमम् ।
तपसा लभ्यते सर्वं मनसा यद्यदिच्छति ॥ १३ ॥
नास्ति विष्णुसमध्येयं तपो नानशनात्परं ।
नास्त्यारोग्यसमं धन्यं नास्ति गङ्गासमा सरित् ॥ १४ ॥
न सोऽस्ति बान्धवः कश्चिद्विष्णुं मुक्त्वा जगद्गुरुं ।
अधीहि हरिमाग्रे देहेन्द्रियमनोमुखे ॥ १५ ॥
इत्येवं संस्मरन् प्राणान् यस्त्यजेत्स हरिर्भवेत् ।
यत्तद् ब्रह्म यतः सर्वं यत्सर्वं तस्य संस्थितम् ॥ १६ ॥
अग्राह्यकमनिर्देश्यं सुप्रतिष्ठञ्च यत्परं ।
परापरस्वरूपेण विष्णुः सर्व्वहृदि स्थितः ॥ १७ ॥
यज्ञेशं यज्ञपुरुषं केचिदिच्छन्ति तत्परं ।
केचिद्विष्णुं हरं केचित् केचिद् ब्रह्माणमीश्वरं ॥ १८ ॥
इन्द्रादिनामभिः केचित् सूर्य्यं सोमञ्च कालकम् ।

ब्रह्मादिस्तम्बपर्य्यन्तं जगद्विष्णुं वदन्ति च ॥ १९ ॥
स विष्णुः परमं ब्रह्म यतो नावर्त्तते पुनः ।
सुवर्णादिमहादानपुण्यतीर्थावगाहनैः ॥ २० ॥
ध्यानैर्व्रतैः पूजया च धर्म्मश्रुत्या तदाप्नुयात् ।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥ २१ ॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ।
इन्द्रियाणि हयानाहुर्विषयांश्चेषुगोचरान् ॥ २२ ॥
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।
यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ॥ २३ ॥
न तत्पदमवाप्नोति संसारञ्चाधिगच्छति ।
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ॥ २४ ॥
स तत्पदमवाप्नोति यस्माद्भूयो न जायते ।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ॥ २५ ॥
सोऽध्वानं परमाप्नोति तद्विष्णोः परमं पदम् ।
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ॥ २६ ॥
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः ।
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ २७ ॥
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।
एषु सर्व्वेषु भूतेषु गूढ़ात्मा न प्रकाशते ॥ २८ ॥
दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिः ।
यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेज्ज्ञानमात्मनि ॥ २९ ॥
ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनि ।
ज्ञात्वा ब्रह्मात्मनोर्योगं यमार्य्यैर्ब्रह्म सत्रवेत् ॥ ३० ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
यमाश्च नियमाः पञ्च शौचं सन्तोषसत्तपः ॥ ३१ ॥
स्वाध्यायेश्वरपूजा च आसनं पद्मकादिकं ।
प्राणायामो वायुजयः प्रत्याहारः स्वनिग्रहः ॥ ३२ ॥
शुभे क्वेकत्र विषये चेतसो यत् प्रधारणं ।
निश्चलत्वात्तु धीमद्भिर्धारणा द्विज कथ्यते ॥ ३३ ॥
पौनःपुन्येन तत्रैव विषयेष्वेव धारणा ।
ध्यानं स्मृतं समाधिस्तु अहं ब्रह्मात्मसंस्थितिः ॥ ३४ ॥
घटध्वंसादृथाकाशमभिन्नं नभसा भवेत् ।
मुक्तो जीवो ब्रह्मणैवं सद्ब्रह्म ब्रह्म वै भवेत् ॥ ३५ ॥
आत्मानं मन्यते ब्रह्म जीवो ज्ञानेन नान्यथा ।
जीवो ह्यज्ञाननत्कार्य्यमुक्तः स्याज्जरामरः ॥ ३६ ॥

अग्निरुवाच । वशिष्ठ यमगीतोक्ता पठतां भुक्तिमुक्तिदा ।
आत्यन्तिको लयः प्रोक्तो वेदान्तब्रह्मधीमयः ॥ ३७ ॥

इत्याग्नेये महापुराणे यमगीता नामैकाशीत्यधिक-
त्रिशततमोऽध्यायः ॥

अथ द्व्यशीत्यधिकत्रिशततमोऽध्यायः ।

आग्नेयपुराणमाहात्म्यं ।

अग्निरुवाच । आग्नेयं ब्रह्मरूपन्ते पुराणं कथितं मया ।
सप्रपञ्चं निष्प्रपञ्चं विद्याद्वयमयं महत् ॥ १ ॥
ऋग्यजुःसामाथर्वाख्या विद्या विष्णुर्जगन्मनिः ।
छन्दः शिक्षा व्याकरणं निघण्टुज्योतिराख्यकाः ॥ २ ॥
निरुक्तधर्मशास्त्रादि मीमांसान्यायविस्तराः ।
आयुर्वेदपुराणाख्या धनुर्गन्धर्वविस्तराः ॥ ३ ॥
विद्या सैवार्थशास्त्राख्या वेदान्ताऽन्या हरिर्महान् ।
इत्येषा चापरा विद्या परविद्याऽक्षरं परं ॥ ४ ॥
यस्य भावोऽखिलं विष्णुस्तस्य नो बाधते कलिः ।
अनिष्ट्वा तु महायज्ञानकृत्वापि पितृस्वधां ॥ ५ ॥
कृष्णमभ्यर्चयन्भक्त्या नैनसो भाजनं भवेत् ।
सर्वकारणमत्यन्तं विष्णुं ध्यायन्न सीदति ॥ ६ ॥
अन्यतन्त्रादिदोषोत्थौ विषयाकृष्टमानसः ।
कृत्वापि पापं गोविन्दं ध्यायन्पापैः प्रमुच्यते ॥ ७ ॥
तद्ध्यानं यत्र गोविन्दः सा कथा यत्र केशवः ।
तत् कर्म यत्तदर्थीयं किमन्यैर्बहुभाषितैः ॥ ८ ॥
न तत् पिता तु पुत्राय न शिष्याय गुरुर्द्विज ।
परमार्थं परं ब्रूयाद्येतत्ते मयोदितं ॥ ९ ॥
संसारे भ्रमता लभ्यं पुत्रदारधनं वसु ।

सुहृदश्च तथैवान्ये नोपदेशो द्विजेदृशः ॥ १० ॥
किं पुत्रदारैर्मित्रैर्वा किं मित्रैस्त्वबान्धवैः ।
उपदेशः परो बन्धुरीदृशो यो विमुक्तये ॥ ११ ॥
द्विविधो भूतमार्गोयं दैव आसुर एव च ।
विष्णुभक्तिपरो दैवो विपरीतस्तथासुरः ॥ १२ ॥
एतत् पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनं ।
सुखप्रीतिकरं नृणां मोक्षकृद्भुक्तिवेरितं ॥ १३ ॥
येषां गृहेषु लिखितमाग्नेयं हि पुराणकं ।
पुस्तकं स्थास्यति सदा तत्र नेशुरुपद्रवाः ॥ १४ ॥
किं तीर्थैर्गोप्रदानैर्वा किं यज्ञैः किमुपोषितैः ।
आग्नेयं ये हि शृण्वन्ति अहन्यहनि मानवाः ॥ १५ ॥
यो ददाति तिलप्रस्थं सुवर्णस्य च माषकं ।
शृणोति श्लोकमेकञ्च आग्नेयस्य तदाप्नुयात् ॥ १६ ॥
अध्यायपठनस्यास्य गोप्रदानाद् विशिष्यते ।
अहोरात्रकृतं पापं श्रोतुमिच्छोः प्रणश्यति ॥ १७ ॥
कपिलानां शते दत्ते यद् भवेज्जेष्ठपुष्करे ।
तदाग्नेयं पुराणं हि पठित्वा फलमाप्नुयात् ॥ १८ ॥
प्रवृत्तञ्च निवृत्तञ्च धर्मं विद्याद्यात्मकं ।
आग्नेयस्यपुराणस्य शास्त्रस्यास्य समं न हि ॥ १९ ॥
पठन्नाग्नेयकं नित्यं शृण्वन् वापि पुराणकं ।
भक्तो वशिष्ठ मनुजः सर्वपापैः प्रमुच्यते ॥ २० ॥
नोपसर्गा न चानर्था न चौरारिभयं गृहे ।
तस्मिन् स्याद् यत्र चाग्नेयपुराणस्य हि पुस्तकं ॥ २१ ॥

नाशभङ्गारिणीभीतिर्न च बालग्रहा गृहे ।
यत्राग्नेयं पुराणं स्यान्न पिशाचादिकं भयं ॥ २२ ॥
ऋग्वन्विप्रो लभेद्वित् स्यात् क्षत्रियः पृथिवीपतिः ।
ऋद्धिं प्राप्नोति वैश्यश्च शूद्रश्चारोग्यमृच्छति ॥ २३ ॥
यः पठेत्शृणुयान्नित्यं समदृग्विष्णुमानसः ।
ब्रह्माग्नेयं पुराणं सत्तत्र नश्यन्त्युपद्रवाः ॥ २४ ॥
दिव्यान्तरीक्षभौमाद्या दुःस्वप्नाद्यभिचारकाः ।
यच्चान्यदुरितं किञ्चित्तत्सर्वं हन्ति केशवः ॥ २५ ॥
पठतः शृण्वतः पुंसः पुस्तकं यजतो महत् ।
आग्नेयं श्रीपुराणं हि हेमन्ते यः शृणोति वै ॥ २६ ॥
प्रपूज्य गन्धपुष्पाद्यैरग्निष्टोमफलं लभेत् ।
शिशिरे पुण्डरीकस्य वसन्ते चाश्वमेधजम् ॥ २७ ॥
ग्रीष्मे तु वाजपेयस्य राजसूयस्य वर्षति ।
गोसहस्रस्य शरदि फलं तत्पठतो हृतौ ॥ २८ ॥
आग्नेयं हि पुराणं यो भक्त्याग्ने पठते हरेः ।
सोऽर्चयेच्च वसिष्ठेह ज्ञानयज्ञेन केशवम् ॥ २९ ॥
यस्याग्नेयपुराणस्य पुस्तकं तस्य वै जयः ।
लिखितं पूजितं गेहे भुक्तिर्मुक्तिः करेऽस्ति हि ॥ ३० ॥
इति कालाग्निरूपेण गीतं मे हरिणा पुरा ।
आग्नेयं हि पुराणं वै ब्रह्मविद्याहयास्पदम् ।
विद्याहयं वसिष्ठेदं भक्तेभ्यः कथयिष्यसि ॥ ३१ ॥

वसिष्ठ उवाच । व्यासाग्नेयपुराणं ते रूपं विद्याहयात्मकं ।
कथितं ब्रह्मणो विष्णोरग्निना कथितं यथा ॥ ३२ ॥

सार्द्धं देवैश्च मुनिभिर्मह्यं सर्वार्थदर्शकं ।
पुराणमग्निना गीतमाग्नेयं ब्रह्मसम्मितं ॥ ३३ ॥
यः पठेच्छृणुयाद्व्यास लिखेद्वा लेखयेदपि ।
श्रावयेत्पाठयेद्वापि पूजयेद्वारयेदपि ॥ ३४ ॥
सर्वपापविनिर्मुक्तः प्राप्तकामो दिवं व्रजेत् ।
लेखयित्वा पुराणं यो दद्याद्विप्रेभ्य उत्तमं ॥ ३५ ॥
स ब्रह्मलोकमाप्नोति कुलानां शतमुद्धरेत् ।
एकं श्लोकं पठेद्यस्तु पापपङ्काद्विमुच्यते ॥ ३६ ॥
तस्माद्व्यास सदा श्राव्यं शिष्येभ्यः सर्वदर्शनं ।
शुकाद्यैर्मुनिभिः सार्द्धं श्रोतुकामैः पुराणकं ॥ ३७ ॥
आग्नेयं पठितं ध्यातं शुभं स्याद् भुक्तिमुक्तिदं ।
अग्नये तु नमस्तस्मै येन गीतं पुराणकं ॥ ३८ ॥

व्यास उवाच । वसिष्ठेन पुरा गीतं सुतैतत्ते मयोदितं ।
पराविद्याऽपराविद्यास्वरूपं परमं पदम् ॥ ३९ ॥
आग्नेयं दुर्लभं रूपं प्राप्यते भाग्यसंयुतैः ।
ध्यायन्तो ब्रह्म चाग्नेयं पुराणं हरिमागताः ॥ ४० ॥
विद्यार्थिनस्तथा विद्यां राज्यं राज्यार्थिनो गताः ।
अपुत्राः पुत्रिनः सन्ति नाश्रया आश्रयं गताः ॥ ४१ ॥
सौभाग्यार्थी च सौभाग्यं मोक्षं मोक्षार्थिनो गताः ।
लिखन्तो लेखयन्तश्च निष्पापाश्च श्रियं गताः ॥ ४२ ॥
शुकपैलमुखैः सूत श्राव्यमेतत्पुराणकं ।
रूपं चिन्तय यातासि भुक्तिं मुक्तिं न संशयः ॥ ४३ ॥
श्रावय त्वञ्च शिष्येभ्यो भक्तेभ्यश्च पुराणकम् ।

सूत उवाच । व्यासप्रसादादाग्नेयं पुराणं श्रुतमादरात् ॥ ४४ ॥
आग्नेयं ब्रह्मरूपं हि मुनयः शौनकादयः ।
भवन्तो नैमिषारण्ये यजन्तो हरिमीश्वरं ॥ ४५ ॥
तिष्ठन्तः श्रद्धया युक्तास्तस्माद्दः समुदीरितम् ।
अग्निना प्रोक्तमाग्नेयं पुराणं वेदसम्मितं ॥ ४६ ॥
ब्रह्मविद्याद्दयोपेतं भुक्तिदं मुक्तिदं महत् ।
नास्मात्परतरः सारो नास्मात्परतरः सुहृत् ॥ ४७ ॥
नास्मात्परतरो ग्रन्थो नास्मात्परतरा गतिः ।
नास्मात्परतरं शास्त्रं नास्मात्परतरा श्रुतिः ॥ ४८ ॥
नास्मात्परतरं ज्ञानं नास्मात्परतरा स्मृतिः ।
नास्मात्परो ह्यागमोऽस्ति नास्माद्विद्या पराऽस्ति हि ॥४९॥
नास्मात्परः स्यात्सिद्धान्तो नास्मात्परममङ्गलम् ।
नास्मात्परोऽस्ति वेदान्तः पुराणं परमन्त्विदं ॥ ५० ॥
नास्मात्परतरं भूमौ विद्यते वस्तु दुर्लभम् ।
आग्नेये हि पुराणेऽस्मिन् सर्वविद्याः प्रदर्शिताः ॥ ५१ ॥
सर्वे मत्स्यावताराद्या गीता रामायणन्त्विह ।
हरिवंशो भारतञ्च 'नव सर्गाः प्रदर्शिताः ॥'५२ ॥
आगमो वैष्णवो गीतः पूजादीक्षाप्रतिष्ठया ।
पवित्रारोहणादीनि प्रतिमालक्षणादिकं ॥ ५३ ॥
प्रासादलक्षणाद्यञ्च मत्वा वै मुक्तिमुक्तिदाः ।
शैवागमस्तदर्थञ्च शाक्तेभ्यः सौर एव च ॥ ५४ ॥
मण्डलानि च वास्तुञ्च मन्त्राणि विविधानि च ।
प्रतिसर्गाद्यानु गीतो ब्रह्माण्डपरिमण्डलं ॥ ५५ ॥

गीतो भुवनकोषश्च द्वीपवर्षादिनिम्नगाः ।
गयागङ्गाप्रयागादि तीर्थमाहात्म्यमीरितं ॥ ५६ ॥
ज्योतिश्चक्रं ज्योतिषादि गीतो युद्धजयार्णवः ।
मन्वन्तरादयो गीताः धर्मा वर्णादिकस्य च ॥ ५७ ॥
अशौचं द्रव्यशुद्धिश्च प्रायश्चित्तं प्रदर्शितं ।
राजधर्मा दानधर्मा व्रतानि विविधानि च ॥ ५८ ॥
व्यवहाराः शान्तयश्च ऋग्वेदादिविधानकं ।
सूर्यवंशः सोमवंशो धनुर्वेदश्च वैद्यकं ॥ ५९ ॥
गान्धर्ववेदोऽर्थशास्त्रं मीमांसा न्यायविस्तरः ।
पुराणसंख्यामाहात्म्यं छन्दो व्याकरणं स्मृतं ॥ ६० ॥
अहङ्कारो निधनञ्च चित्ताकल्प इहोदितः स्मृतः ।
नैमित्तिकः प्राकृतिको लय आत्यन्तिकः ॥ ६१ ॥
वेदान्तं ब्रह्मविज्ञानं योगो ह्यष्टाङ्ग ईरितः ।
स्तोत्रं पुराणमाहात्म्यं विद्या ह्यष्टादश स्मृताः ॥ ६२ ॥
ऋग्वेदाद्याः परा ह्यत्र पराविद्याक्षरं परं ।
सप्रपञ्चं निष्प्रपञ्चं ब्रह्मणो रूपमीरितं ॥ ६३ ॥
इदं चतुर्दशमाहस्रं शतकोटिप्रविस्तरं ।
देवलोके देवतैश्च पुराणं पठ्यते सदा ॥ ६४ ॥
लोकानां हितकामेन संक्षिप्योद्धृतमग्निना ।
सर्वं ब्रह्मेति जानीध्वं मुनयः शौनकादयः ॥ ६५ ॥
शृणुयाच्छ्रावयेद्वापि यः पठेत्पाठयेदपि ।
लिखेल्लेखापयेद्वापि पूजयेत्कीर्त्तयेदपि ॥ ६६ ॥
पुराणपाठकञ्चैव पूजयेत् प्रयतो नृपः ।

गोभूहिरण्यदानाद्यैर्वस्त्रालङ्कारतर्पणैः ॥ ६७ ॥
तं संपूज्य लभेच्चैव पुराणश्रवणात् फलं ।
पुराणान्ते च वै कुर्य्यादवश्यं द्विजभोजनं ॥ ६८ ॥
निर्म्मलः प्राप्तसर्व्वार्थः सकुलः स्वर्गमाप्नुयात् ।
शरधन्वं पुस्तकाय सूत्रं वै पत्रसञ्चयं ॥ ६९ ॥
पट्टिकाबन्धवस्त्रादि दद्याद् यः स्वर्गमाप्नुयात् ।
यो दद्याद्ब्रह्मलोकी स्यात् पुस्तकं यस्य वै गृहे ।। ७० ॥
तस्योत्पातभयं नास्ति भुक्तिमुक्तिमवाप्नुयात् ।
यूयं स्मरत चाग्नेयं पुराणं रूपमेश्वरं ।
सूतो गतः पूजितस्तैः शौनकाद्या हरिं ययुः ॥ ७१ ॥
इत्याग्नेये महापुराणे आग्नेयपुराणमाहात्म्यं नाम
द्वाशीत्यधिकत्रिशततमोऽध्यायः ॥

समाप्तमाग्नेयं पुराणं ।

अथाग्निपुराण परिशिष्टम्।

———000@000———

अग्निपुराणस्य कञ्चारादि-चिह्नित-दशसंख्यकादर्श-पुस्तकानां मध्ये नवसु आदर्शपुस्तकेषु यमगीताध्यायात् परं पुराण-माहात्म्याध्यायेन पुस्तकं सम्पूर्णं। ग-चिह्नित-पुस्तके तु यम-गीताध्यायात् परं अतिरिक्तत्रयस्त्रिंशत् संख्यकसृष्टिप्रकरणाद्य-ध्याया वर्त्तन्ते। उक्ताध्यायानां नवसु आदर्शपुस्तकेषु अविद्य-मानत्वात् प्रामाण्यं सन्दिग्धं। प्रामाण्येपि स्थानविशेषे विलुप्ता-क्षरापरिशुद्धग-चिह्नितैकमात्रादर्शपुस्तकमवलम्ब्य उक्तातिरिक्ता-ध्यायान्मुद्रापणे समर्थो नाभूवं। परन्त्वेतद्विज्ञापनाय ग-चिह्नितादर्शपुस्तकमाश्रयितातिरिक्त कतिपयाध्याया यथागति परिशोध्य परिशिष्टरूपेण मुद्रापिताः। गचिह्नितादर्शपुस्तकस्य विलुप्ताक्षरत्वादपरिशुद्धत्वाच्च अस्य परिशिष्टस्य बहुषु स्थानेषु असाधुपाठा वर्त्तन्ते इति।

प्रथमोऽध्यायः।

सूत उवाच। ब्रह्मा भूत्वा जगत्स्रष्टा नरसिंहः प्रवर्त्तते।
तथा ते कथयिष्यामि भरद्वाज निबोध मे॥ १॥
नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः।
उत्पन्नः प्रोच्यते प्रियप्रियामरोपचारतः(१)॥ २॥

---

१ पाठोऽयं आदर्शान्तरविलोपेन शोधयितुमशक्यः।

सृष्ट्वा जगद्व्योम धरान्तु तोयं
प्रजास्तु सृष्ट्वा सकलास्तथेशः।
नैमित्तिकाख्ये प्रलये समस्तं
कृत्वावशेते हरिरादिदेवः॥ २५॥

इत्याग्नेये महापुराणे सृष्टि-प्रकरणं नाम प्रथमोऽध्यायः।

अथ द्वितीयोऽध्यायः।

—ooo—

सूत उवाच। अत्र सुप्तस्य देवस्य नाभौ पद्ममजायत।
तस्मिन् पद्मे महाभाग वेदवेदाङ्गपारगः॥ १॥
ब्रह्मोत्पन्नः स तेनोक्तः प्रजाः सृज महामते।
एवमुक्त्वा तिरोभावं गतो नारायणः प्रभुः॥ २॥
तथेत्यक्तं गतं देवं विष्णुं ब्रह्मा विचिन्तयन्।
आस्ते किञ्चिज्जगत्येतु नाध्यगच्छत किञ्चन॥ ३॥
तावत्तस्य महान् क्रोधो ब्रह्मणोऽभून्महात्मनः।
ततो रुद्रः समुत्पन्नस्तस्याङ्के रोषसम्भवः॥ ४॥
रुदन् स कथितस्तेन ब्रह्मणाऽव्यक्तजन्मना।
नाम मे देहि चेत्युक्तस्तस्य रुद्रेत्यसौ ददौ॥ ५॥
सोऽपि तेन सृजस्वेति प्रोक्तो लोकमिमं पुनः।
असृजच्छान्तमलिले समर्थं तपसे धृतः॥ ६॥

तस्मिन् सलिलमग्ने तु पुनरन्यं प्रजापतिं ।
ब्रह्मा ससर्ज भूतेशो दक्षिणाङ्गुष्ठतोऽपरं ॥ ७ ॥
दत्तं वामे ततोऽङ्गुष्ठे त तस्य पत्नीमजीजनत् ।
स तस्यां जनयामास मनुं स्वायम्भुवं प्रभुं ॥ ८ ॥
तस्मात् सम्भाविता सृष्टिः प्रजानां ब्रह्मणा तथा ।
इत्येवं कथिता सृष्टिर्मया ते मुनिसत्तम ।
सृजतो जगदीशस्य किम्भूयः श्रोतुमिच्छसि ॥ ९ ॥
भरद्वाज उवाच । संक्षेपेणैतदाख्यातं त्वया मे लोमहर्षण ।
विस्तरेण पुनर्ब्रूहि आदिसृष्टिं महामते ॥ १० ॥
सूत उवाच । तथैतद्ब्रह्मणोऽवसाने निशासूत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत ॥ ११ ॥
नारायणः परेणार्च्यः पूर्व्वेषामपि पूर्वजः ।
ब्रह्मस्वरूपो भगवान् अनादिः सर्वसम्भवः ॥ १२ ॥
इमञ्चे देहवन्तोहा(१) श्लोकं नारायणं प्रति ।
ब्रह्मस्वरूपिनं देवं जगतः प्रभवाव्ययं ॥ १३ ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य तत् पूर्वं तेन नारायणः स्मृतः ॥ १४ ॥
सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ।
अव्रह्मिपूर्वकल्पस्य प्रादुर्भूतमहोमयः ॥ १५ ॥
तमो मोहो महामोहस्तामिस्राद्यजसंज्ञकः (२) ।
अविद्याः पञ्च पूर्वेषां प्रादुर्भूता महात्मनः ॥ १६ ॥

---

१ आदर्शान्तरविलोपात् पाठोऽयं शोधयितुमशक्यः ।
२ पाठोऽयं न साधुः ।

पञ्चधाऽवस्थितः सर्गो ध्यायतः प्रतिबोधनात् ।
मुख्यसर्गः स विज्ञेयः सर्गविद्भिर्विचक्षणैः ॥ १७ ॥
पुनरन्यस्तथा तस्य ध्यायतः सर्गमुत्तमं ।
तिर्य्यक्स्रोतः समुत्पन्नस्तिर्य्यक्स्रोतं++स्मृतः ॥ १८ ॥
पश्चादयस्ते विख्याता उत्पथग्राहिणस्तु ते ।
तमप्यसाधकं मत्वा तिर्य्यक्स्रोतश्चतुर्मुखः ॥ १९ ॥
ऊर्द्ध्वस्रोतस्तृतीयस्तु पार्थिवोऽभवर्त्तत ।
ततोर्द्ध्वचारिणो देवाः सहसर्गसमुद्भवाः ॥ २० ॥
यदा तुष्टो न सर्गश्च तदा तस्थौ प्रजापतिः ।
असाधकांस्तु तान्मत्वा मुख्यसर्गसमुद्भवान् ॥ २१ ॥
ततः स चिन्तयन् विप्र अर्वाक्स्रोतस्तु स स्मृतः ।
अर्वाक्स्रोतस्तथोत्पन्ना मनुष्याः साधका मताः ॥ २२ ॥
ते च प्रकाशबहनास्तमोद्रिक्ता रजोधिकाः ।
तस्मात्ते दुःखबहना भूयो भूयश्च कारिणः ॥ २३ ॥
इत्येते कथिताः सर्गाः ते तत्र मुनिसत्तम ।
प्रथमो महतः सर्गस्तन्मात्राणां द्वितीयकः ॥ २४ ॥
वैकारिकस्तृतीयस्तु समश्च ऐन्द्रियकः स्मृतः ।
मुख्यसर्गः चतुर्थस्तु × × × स्थावराः स्मृताः ॥ २५ ॥
तिर्य्यक्स्रोतस्तु यः प्रोक्तस्तिर्य्यग्योनिः स पञ्चमः ।
ततोर्द्ध्वस्रोतषां षष्ठो देवसर्गस्तु सप्तमः ॥ २६ ॥
ततोर्वाक्स्रोतस. श्रेष्ठसप्तमः सप्तमानुषः ।
अष्टमोनुग्रहः सर्गः स सात्त्विकस्तामसो हि सः ॥ २७ ॥
नवमो रुद्रसर्गस्तु नवसर्गाः प्रजायते ।

एवैते वैकृताः सर्गाः प्राकृतास्तु प्रियाः स्मृताः ॥ २८ ॥
प्राकृतावैकृताश्चैव जगतोमूलहेतवः।
सृजतो ब्रह्मणः सृष्टिरुत्पन्ना ये मयेरिताः ॥ २९ ॥
ततो विकारस्तु परापवेगः
शक्त्या प्रविश्याथ ससर्ज्ज सर्वं।
नारायणः सर्वगतैकरूपः
ब्रह्मादिरूपैर्जगदेकनाथः ॥ ३० ॥
इत्याग्नेये महापुराणे सृष्टि-प्रकरणं नाम
द्वितीयोऽध्यायः।

अथ तृतीयोऽध्यायः।

सृष्टि-प्रकरणं।

भरद्वाजउवाच। नवधा सृष्टिरुत्पन्ना ब्रह्मणोऽव्यक्तजन्मनः।
कथं सा वर्द्धते सूत एतत्कथय मेऽधुना ॥ १ ॥
सूत उवाच। प्रथमं ब्रह्मणा सृष्टा रुद्रस्यानु तपोधनाः।
सनकाद्यश्च ये सृष्टा मरीच्याद्य एव च ॥ २ ॥
मरीचिरत्रिश्च तथा अङ्गिराः पुलहःक्रतुः।
पुनस्त्यश्च महातेजाः प्रचेता भृगुरेव च ॥ ३ ॥
नारदो दशमश्चैव वसिष्ठश्च महाद्युतिः।
सनकाद्यो निवृत्त्याख्ये ते च धर्मे नियोजिताः ॥ ४ ॥

प्रवृत्त्याख्ये मरीच्याद्या मोचैके नारदो मुनिः ।
योऽसौ प्रजापतिस्थस्य दक्षो नामाङ्गसम्भवः ॥ ५ ॥
तस्य दौहित्रवंशेन जगदेतच्चराचरं ।
देवाश्च दानवाश्चैव गन्धर्वोरगपक्षिणः ॥ ६ ॥
सर्व्वे दक्षस्य कन्यासु जाताः परमधार्म्मिकाः ।
चतुर्विधानि भूतानि स्थावराणि चराणि च ॥ ७ ॥
सृष्टिं गतानि तान्येव मनुसर्गोऽयमेव च ।
मनुसर्गस्य कर्त्तारो मरीच्याद्या महर्षयः ।
वसिष्ठाद्या महाभागा ब्रह्मणो मानसोद्भवाः ॥ ८ ॥

सर्गेषु भूतानि वियन्मुखानि
कालेन चासौ सृजते परात्मा ।
स एव पक्षा × × राज्यरूपी
मुनिस्वरूपी च सृजत्यनन्तः ॥ ९ ॥

इत्याग्नेये महापुराणे सृष्टि-प्रकरणं नाम
तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

सृष्टि-प्रकरणं ।

भरद्वाज उवाच । रुद्रसर्गन्तु मे ब्रूहि विस्तरेण महामते ।
मनुसर्गं मरीच्याद्याः ससृजुस्ते कथं पुनः ॥ १ ॥

मित्रावरुणपुत्रत्वं वशिष्ठस्य कथं भवेत्।
ब्रह्मणो मनसः पूर्व्वमुत्पन्नस्य महामते॥ २॥
सूत उवाच। रुद्रसृष्टिन्तु वक्ष्यामि तत्सर्गञ्चैव सत्तम।
प्रतिसर्गं मुनीनान्तु विस्तराद्गदतः शृणु॥ ३॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः॥ ४॥
अर्द्धनारीश्वरवपुः प्रचण्डोऽति शरीरवान्।
तेजसा भासयन् सर्व्वा दिशश्च विदिशस्तथा॥ ५॥
तं दृष्ट्वा तेजसा दीप्तं प्रत्युवाच प्रजापतिः।
विभज्यात्मानमद्य त्वं मम वाक्यान्महामते॥ ६॥
इत्युक्तो ब्रह्मणा तेन रुद्रस्तत्र प्रतापवान्।
स्त्रीभावं पुरुषत्वञ्च पृथक् पृथगथाकरोत्॥ ७॥
विभेद पुरुषत्वञ्च दशधा चैकधा तु सः।
तेषां नामानि वक्ष्यामि शृणु मे द्विजसत्तम॥ ८॥
अजैकपादहिर्ब्रध्नः कपाली रुद्र एव च।
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः॥ ९॥
वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः॥ १०॥
स्त्रीत्वञ्चैव तथा रुद्रो विभेद दशधैकधा।
तमेव बहुरूपेण पद्मोत्थेन व्यवस्थिता॥ ११॥
तपस्तप्त्वा जले घोरमुत्तानः स यदा पुरा।
तदा स सृष्टवान्देवी रुद्रस्तत्र प्रतापवान्॥ १२॥
तपोबलेन विप्रेन्द्र भूतानि विविधानि च।

पिशाचान् कश्मलांश्चैव सिंहोष्ट्रमकराननान् ॥ १३ ॥
वेतालप्रमुखानन्यानन्यांश्चैव सहस्रशः।
तेन सृष्टास्तु कैलासे ब्रह्मभूताश्चितनहः(१) ॥ १४ ॥
विनायकानां रुद्राणां त्रिंशत्कोटीश्चमेव च।
तारकाख्यविनाशाय सृष्टवान्स्कन्दमेव च ॥ १५ ॥
एवम्प्रकारो रुद्रोऽसौ मया ते कीर्त्तितः प्रभुः।
अनुसर्गं मरीच्यादेः कथयामि निबोध मे ॥ १६ ॥
देवाद्याः स्थावरान्ताश्च प्रजाः सृष्टाः स्वयम्भुवा।
यदा × स्व × ताः सर्व्वाः नाभ्यवर्द्धन्त धीमतः ॥ १७ ॥
तदा स मानसान् पुत्रान् महर्षीनात्मनोऽसृजत्।
मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुं ॥ १८ ॥
प्रचेतसं वशिष्ठञ्च + + + + मङ्गामतिं।
नव ब्रह्मण इत्येते पुराणे निश्चयं गताः ॥ १९ ॥
अग्निश्च पितरश्चैव ब्रह्मपुत्रौ तु मानसौ।
सृष्टिकाले महाभाग धर्मं स्वायम्भुवं मनुं ॥ २० ॥
शतरूपाञ्च सृष्ट्वा तु कन्यां स मनवे ददौ।
तस्माच्च पुरुषाद्देवी शतरूपा व्यजायत ॥ २१ ॥
प्रियव्रतोत्तानपादौ प्रसूतीश्चैव कन्यकां।
ददौ प्रसूतिं दक्षाय मनुः स्वायम्भुवः सुतां ॥ २२ ॥
प्रसूतिस्तु तदा दक्षाच्चतस्रो विंशतिस्तथा।
ससर्ज्ज कन्यकास्तासां शृणु नामानि मेऽधुना ॥ २३ ॥
श्रद्धा भूतिर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा।

---

१ पाठोऽयं न साधुः।

बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदश ॥ २४ ॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः।
अद्यादीनान्तु पत्नीनां जाताः कामादयः सुताः ॥ २५ ॥
धर्म्मस्य पुत्रपौत्राद्यैर्धर्म्मवंशो विवर्द्धितः।
तासु शिष्टा यवीयस्यस्तासां नामानि कीर्त्तये ॥ २६ ॥
सम्भूतिश्चानुभूया च स्मृतिः प्रीतिः क्षमा तथा।
सन्नतिश्चाथ सत्या च ऊर्ज्जा ख्यातिर्हविर्ज्जोत्तम ॥ २७ ॥
स्वाहा च दशमी ज्ञेया स्वधा चैकादशी स्मृता।
एताश्च दत्ता दक्षेण ऋषीणां भावितात्मनां ॥ २८ ॥
मरीच्यादीनाञ्च ये पुत्रास्तानहं कथयामि ते।
पत्नी मरीचेः सम्भूतिर्जज्ञे सा कश्यपं मुनिं ॥ २९ ॥
स्मृतिश्चाङ्गिरसः पत्नी प्रसूता कन्यकास्तथा।
सिनीवाली कुहुश्चैव राका चानुमतिस्तथा ॥ ३० ॥
अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान्।
सोमं दुर्व्वाससञ्चैव दत्तात्रेयञ्च योगिनं ॥ ३१ ॥
प्रीत्यां पुलस्त्यभार्य्यायां दादानिस्तत्सुतोऽभवत्।
तस्य वै विश्रवाः पुत्रस्तत्पुत्रा रावणादिकाः ॥ ३२ ॥
+++राक्षसाः प्रोक्ता लङ्कापुरनिवासिनः।
येषां वधाय लोकेषु विष्णुः क्षीरोदनीरधौ ॥ ३३ ॥
ब्रह्माद्यैः प्रार्थितो देवैरवतारमिहाकरोत्।
कर्दमस्याम्बरीषस्य सहिष्णोश्च सुतत्रयम् ॥ ३४ ॥
क्षमा तु सुषुवे भार्य्या पुलस्त्यस्य प्रजापतेः।

क्रतोस्तु सप्तर्षिभार्य्या वालिखिल्यानसूयत ॥ ३५ ॥
षष्टिं तानि सहस्राणि ऋषीणामूर्द्धरेतसां ।
अङ्गुष्ठपर्वमात्राणां ज्वलद्भास्करतेजसां ॥ ३६ ॥
प्रचेतसोऽथ सप्तायां सप्तसन्ध्यास्वयः सुताः ।
जातास्तत्पुत्रपौत्राश्च शतशोऽथ सहस्रशः ॥ ३७ ॥
ऊर्ज्जायाञ्च वसिष्ठस्य सप्तासन्नयन्त वै सुताः ।
राजा चोर्द्ध्वबाहुश्च सवनश्चानघन्तिमे(१) ॥ ३८ ॥
सुरूपाः शुक्र इत्येते सर्वे सप्तर्षयोऽभवन् ।
भृगोःख्यात्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहा ॥ ३९ ॥
तथा धातृविधातारौ ख्यात्यां जातौ सुतौ भृगोः ।
आयतिर्नियतिश्चैव मेरोः कन्ये सुशोभने ॥ ४० ॥
धातृविधात्रोस्ते भार्य्ये तयोर्जातौ सुतावुभौ ।
प्राणश्चैवमृकण्डश्च मार्कण्डेयो मृकण्डजः ॥ ४१ ॥
येन मृत्युर्जितो विप्र पुरा नारायणाय वा ।
ततो देवऋषिर्वा जज्ञे प्राणस्यापि सुतोऽभवत् ॥ ४२ ॥
द्युतिमानिति विख्यातः सञ्चयस्तत्सुतोऽभवत् ।
ततो वंशो महाभाग भार्गवो विस्तरं गतः ॥ ४३ ॥
यस्यासावग्निनामा च ब्रह्मणस्तनयोऽयजः ।
तस्मात् स्वाहा सुतास्तिस्रो लोकदाहजसो द्विजाः ॥ ४४ ॥
पावकं पवमानञ्च शुचिञ्चापि जलाग्निनं ।
तेषान्तु वंशजान् वक्ष्ये षट्चत्वारिंशदीरितान् ॥ ४५ ॥

(१) पाठोऽयं चादर्शदोषेणापरिशुद्धः ।

कथ्यन्ते बहुशश्चैते पिता पौत्रत्रयञ्च यत्।
एवमेकोनपञ्चाशदन्वयात् परिकीर्त्तिताः॥ ४६॥
पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया तव।
तेभ्यः स्वधा सुते जज्ञे मेना वै धरणीधरा॥ ४७॥
प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयम्भुवा।
यथा ससर्ज भूतानि तथा मे शृणु सत्तम॥ ४८॥
भूतानि मनसा पूर्वं दक्ष×+ऽसृजन्मुने।
देवानृषीन् सगन्धर्व्वानसुरान् पन्नगांस्तदा॥ ४९॥
यदास्य सृजमानस्य न व्यवर्द्धन्त वै प्रजाः।
तदा सञ्चिन्त्य स मुनिः सृष्टिहेतोः प्रजापतिः॥ ५०॥
मैथुनेनैव धर्मेण सिसृक्षुर्विविधाः प्रजाः।
असिक्न्यां यद्दुहितृकन्या वीरणस्य प्रजापतेः॥ ५१॥
षष्टिं दक्षोऽसृजत् कन्या वैरिण्यामिति नः श्रुतिः।
दत्तौ स दश धर्म्माय कश्यपाय त्रयोदश॥ ५२॥
सप्तविंशति सोमाय चतस्रो विष्णुनेमिने।
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तदा॥ ५३॥
द्वे कृशाश्वाय विदुषे तदपत्यानि मे शृणु।
विश्वेदेवास्तु विश्वायं साध्यासाध्यानसूयत॥ ५४॥
मरुत्वान्तु मरुत्वन्तो वसोस्तु वसवः स्मृताः।
भानोस्तु भानवो देवा मुहूर्त्तायां मुहूर्त्तजाः॥ ५५॥
नक्षत्राश्चैव घोषाख्ये नागवीथ्याञ्च जामिजाः।
पृथिवीविषयं पूर्व्वमरुन्धत्यां व्यजायत॥ ५६॥

सङ्कल्पायान्तु सङ्कल्पः पुत्रो यज्ञे महामते ।
ये त्वनेकवसुप्राणा देवज्योतिःपुरोगमाः ॥ ५७ ॥
वसवोऽष्टौ समाख्यातास्तेषां नामानि मे शृणु ।
आपो ध्रुवश्च सोमश्च धरश्चैवाऽनिलोऽनलः ॥ ५८ ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ।
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ॥ ५९ ॥
साध्याश्च बहवः प्रोक्तास्तत्पुत्राश्च सहस्रशः ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥ ६० ॥
सुरभिर्विनता चैव ताम्रा क्रोधा खसा इरा ।
कद्रुर्मुनिश्च धर्म्मज्ञ तदपत्यानि मे शृणु ॥ ६१ ॥
अदित्यां कश्यपाज्जाताः पुत्रा द्वादश शोभनाः ।
तानहं नामतो वक्ष्ये शृणुष्व गदतो मम ॥ ६२ ॥
मगोंऽशुरर्य्यमा चैव मित्रोऽथ वरुणस्तथा ।
सविता चैव धाता च विवस्वांश्च महामते ॥ ६३ ॥
त्वष्टा पूषा तथैवेन्द्रो द्वादश विष्णुरुच्यते ।
दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतं ॥ ६४ ॥
हिरण्याक्षो महाकायो वाराहेण तु यो हतः ।
अन्ये च बहवो दैत्या दितिपुत्रा महाबलाः ॥ ६५ ॥
अरिष्टायान्तु गन्धर्वाञ्जज्ञिरे———
सुरसायामथोत्पन्ना विद्याधरगणा बहुः ॥ ६६ ॥
गास्तु वै जनयामास सुरभ्यां कश्यपो मुनिः ।
विनतायान्तु पुत्रौ द्वौ प्रख्यातौ गरुडारुणौ ॥ ६७ ॥

गरुडो देवदेवस्य विष्णोरमिततेजसः ।
वाहनत्वं गतः प्रीत्या अरुणः सूर्यसारथिः ॥ ६८ ॥
ताम्रायाः कश्यपाज्जाताः षट् पुत्रास्तान् निबोध मे ।
श्येनभासीं गृध्रीं च हंसिनीं गृध्रिकां शुकीम् ॥ ६९ ॥
क्रोधायां जज्ञिरे तद्वत् पशवो दुष्टजातयः ।
दुरा दुरुत्तलतावल्लीलतजात्यश्वपुत्रिकाः ॥ ७० ॥
खसा तु यक्षरक्षांसि मुनेरप्सरसस्तथा ।
कद्रुपुत्रा महानागा दन्दशूका विषोल्बणाः ॥ ७१ ॥
सप्तविंशति याः प्रोक्ताः सोमपत्न्योऽथ सुव्रताः ।
तासां पुत्रा महासत्वा बुधाद्या अभवन्द्विज ॥ ७२ ॥
अरिष्टनेमिपत्नीनामपत्यानीह षोडश ।
बहुपुत्रस्य विदुषः ताम्रायां विद्यदादयः ॥ ७३ ॥
प्रत्यङ्गिरःसुताः श्रेष्ठा ऋषयो ऋषिसत्कृताः ।
कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः सुताः ॥ ७४ ॥
एते युगसहस्रान्ते जायन्ते पुनरेव हि ।
एते कश्यपदायादाः कीर्त्तिताः स्थाणुजङ्गमाः ॥ ७५ ॥
एतेषां पुत्रपौत्राद्यैर्वृता सृष्टिः प्रजापतेः ।
स्थितौ स्थितस्य देवस्य नारसिंहस्य धीमतः ॥ ७६ ॥
एता विभूतयो विप्र मया ते परिकीर्त्तिताः ।
कथिता दक्षकन्यानां मया तेऽपत्यसन्ततिः ।
श्रद्धावान् यः स्मरेदेतान् यशःसन्तानवान् भवेत् ॥ ७७ ॥

सर्गानुसर्गौ कथितौ मया ते
समासतः सृष्टिविवृद्धिहेतोः ।

पठन्ति ये विष्णुपराः सदा नराः
इदं द्विजास्ते विमला भवन्ति च ॥ ७८ ॥
इत्याग्नेये महापुराणे सृष्टिप्रकरणं नाम चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

वसिष्ठस्य मित्रावरुणपुत्रत्वकथनं ।

सूत उवाच । सृष्टिस्ते कथिता विष्णोर्मया ते जगतो द्विज ।
देवदानवयक्षाद्या यथोत्पन्ना महात्मना ॥ १ ॥
यमुद्दिश्य त्वया पृष्टः पुराहमृषिसन्निधौ ।
मित्रावरुणपुत्रत्वं वसिष्ठस्य कथन्विति ॥ २ ॥
तदहं कथयिष्यामि पुण्याख्यानं पुरातनं ।
शृणुष्वैकाग्रमनसा भरद्वाज मयेरितं ॥ ३ ॥
सर्वधर्मार्थतत्त्वज्ञः सर्ववेदविदांवरः ।
पारगः सर्वविद्यानां दक्षो नाम प्रजापतिः ॥ ४ ॥
तेन दत्ताः शुभाः कन्याः कश्यपाय चयोदश ।
तासां नामानि वक्ष्यामि निबोध च ममाधुना ॥ ५ ॥
अदितिर्दितिर्दनुः काष्ठा सुह्रत्ता सिंहिका मुने ।
मुता क्रोष्टा च सुरभिर्विनता सुरसा— ॥ ६ ॥
कद्रुश्च सुरसा चैव यातुदेवी मुनी स्मृता ।
दक्षस्यैता दुहितरस्ताः प्रादात् कश्यपाय सः ॥ ७ ॥

तासां ज्येष्ठा वरिष्ठा च अदितिर्नामनामतः ।
अदितिः सुषुवे पुत्रान् द्वादशाग्निसमप्रभान् ॥ ८ ॥
तेषां नामानि वक्ष्यामि शृणुत द्विजसत्तमाः ।
यैरिदं वासवं नक्षं वर्त्तते क्रमशः सदा ॥ ९ ॥
भगोंऽशुश्चार्य्यमा चैव मित्रोऽथ वरुणस्तथा ।
सविता चैव धाता च विवस्वांश्च महामत ॥ १० ॥
त्वष्टा पूषा तथैवेन्द्रो विष्णुर्द्वादशमः स्मृतः ।
एते वै द्वादशादित्या वर्षन्ति—पतन्ति च ॥ ११ ॥
तस्यास्तु मध्यमः पुत्रो वरुणो नामनामतः ॥
लोकपाल इतिख्यातो वारुण्यां दिशि गच्छते ॥ १२ ॥
पश्चिमस्य समुद्रस्य प्रतीच्यां दिशि राजते ।
जातरूपमयः श्रीमानस्तो नाम गिर्लोचयः ॥ १३ ॥
सर्वरत्नमयैः शृङ्गैः धातुप्रस्रवणान्वितैः ।
संयुक्तोभाति शैलोऽसौ नानारत्नमयः शुभः ॥ १४ ॥
महोदरीगुहाभिश्च सिंहसार्दूलनादितः ।
नानाविविक्तभूमीषु देवगन्धर्वसेवितः ॥ १५ ॥
यस्मिन् गते दिनकरे तमसा पूर्य्यते जगत् ।
तस्य शृङ्गे महादिव्या जाम्बुनदमयी शुभा ॥ १६ ॥
रम्या मणिमयैस्तम्भैर्विहिता विश्वकर्म्मणा ।
पुरी सुखावती नाम समृद्धा भोगसाधनैः ॥ १७ ॥
तस्यां वरुण आदित्यो दीप्यमानः स्वतेजसा ।
पाति सर्व्वानिमान् लोकान्नियुतो ब्रह्मणा स्वयं ॥ १८ ॥

उपास्यमानौ गन्धर्वैस्तथैवाप्सरसां गणैः।
दिव्यगन्धानुलिप्ताङ्गौ दिव्याभरणभूषितः॥ १८॥
कदाचिद्वरुणो यातो मित्रेण सहितो वनं।
कुरुक्षेत्रे शुभेऽरण्ये सदा ब्रह्मर्षिसेविते॥ २०॥
नानापुष्पफलोपेते नानार्थी—समन्विते।
आश्रमाय × दृश्यन्ते मुनीनामूर्द्धरेतसां॥ २१॥
तस्मिंस्तीर्थे समाश्रित्य बहुपुष्पफलोदके।
चीरकृष्णाजिनधरौ चेरतुस्तप उत्तमं॥ २२॥
तत्रैकस्मिन् वनोद्देशे विमलोऽथ ह्रदः शुभः।
बहुगुल्मलताकीर्णो नानापक्षिनिषेवितः॥ २३॥
नानातरुवनच्छन्नो नलिन्या चोपशोभितः।
पौण्डरीक इतिख्यातो मीनकच्छपसेवितः॥ २४॥
चेरतुर्मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ।
तन्तु देशं गतौ देशात् विचरन्तौ यदृच्छया॥ २५॥
ताभ्यां तत्र तदाक्रष्टा उर्वशी तु वराप्सराः।
स्रापयन्ती सहितान्याभिः सखीभिः सा वराननाः॥ २६॥
गायन्ती विहसन्ती च मनोज्ञा मधुरस्वना।
गौरी कमलगर्भाभा स्निग्धा कृष्णशिरोरुहा॥ २७॥
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी।
शङ्खकुन्देन्दुसदृशैर्दन्तैरविरलैः समैः॥ २८॥
सुभ्रुः सुनासा सुनखा सुरनाटा मनस्विनी।
करसम्मितमध्याङ्गी पीनोरुजघनस्थली॥ २९॥

तन्वङ्गी मधुरालापा सुमध्या चारुहासिनी।
रक्तोत्पलकरापादासुपदी विनयान्विता॥ २०॥
पूर्णचन्द्रनिभा बाला मत्तकुञ्जरगामिनी।
दृष्ट्वा तन्वांस्तु तद्रूपं तौ देवौ विषयंगतौ॥ २१॥
तस्या हास्येन लास्येन स्मितेन ललितेन च।
मृदुना वामनाचैव(१) शीतलेन सुगन्धिना॥ २२॥
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च।
सुस्वरेण हि गीतेन उर्वश्या मधुरेण च।
ईषितौ च कटाक्षेण स्कन्दतुस्तां वुभावपि(२)॥ २३॥

वसिष्ठ मित्रावरुणाज्जोऽसि
तत्रोचुरागत्य हि विश्वदेवाः।
रेतस्त्रिभागं कमलेच वल्मौ
वसिष्ठ मेवन्तु पितामहौजं(३)॥ २४॥

तत्त्रिधा पतितं रेतः कमलेऽथ स्थले जले।
कमलेऽथ वसिष्ठस्तु जातो हि मुनिसत्तम।
स्थले त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः॥ २५॥

स तत्र जातो महिमान् वसिष्ठः।
कुम्भेत्वगस्त्यः सलिले च मत्स्यः॥ २६॥

स्थले तावपि तप्येते पुनरुग्रतरं तपः।

---

१ पाठोऽयं न साधुः।
२ पाठोऽयं न समीचीनः।
३ श्लोकोऽयं चादर्शदोषेण शोधयितुमशक्यः।

तपसा प्राप्तकामोऽसौ परं ज्योतिः सनातनं ॥ ३७ ॥
तपस्यन्तौ सुरश्रेष्ठौ ब्रह्मागत्येदमब्रवीत्।
मित्रावरुणौ देवौ पुत्रवन्तौ महाद्युती ॥ ३८ ॥
सिद्धिर्भवत्वतिशया युवयोर्वैष्णवौ पुनः।
स्वाधिकारे तु स्थीयेतामधुना लोकसाक्षिणौ ॥ ३९ ॥
इत्युक्त्वान्तर्दधे ब्रह्मा तौ स्थितौ स्वाधिकारके।
एवं ते कथितं विप्र वसिष्ठस्य महात्मनः ॥ ४० ॥
मित्रावरुणपुत्रत्वमगस्त्यस्य च धीमतः।
इदं पुंसीयमाख्यानं पुराणं पापनाशनं ॥ ४१ ॥
सामात्यपुत्रो नृपतिः श्रुत्वा पापात् प्रमुच्यते
पुत्रकामाशये केचित् शृन्वन्तीदं शुचिव्रताः ॥ ४२ ॥
अचिरादेव पुत्रांस्तु लभन्ते नात्र संशयः।
यश्चैतत् पठते नित्यं हव्यकव्ये द्विजोत्तम ॥ ४३ ॥
देवाश्च पितरस्तस्य तृप्ता यान्ति यथासुखं।
यश्चैतत् पठते नित्यं प्रातरुत्थाय मानवः ॥ ४४ ॥
विन्दते सुमहापुण्यान् स्वर्गलोकञ्च गच्छति।
वरं मयेरितं पुरा वेदपरैरुदीरितं ॥ ४५ ॥
पठित्यते यस्तु शृणोति सर्वदा।
स याति शुद्धोऽधिकलोकमञ्जसा ॥ ४६ ॥

इत्याग्नेये महापुराणे वसिष्ठस्य मित्रावरुणपुत्रत्व-
कथनं नाम पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः ।

—००—

मार्कण्डेयोपाख्यानं ।

भरद्वाज उवाच । मार्कण्डेयेन मुनिना कथं मृत्युः पराजितः ।
एतदाख्याहि मे सूत त्वयैतत् सुचिरं पुरा ॥ १ ॥
सूत उवाच । इदन्तु महदाख्यानं भरद्वाज शृणुष्व मे ।
शृण्वन्तु ऋषयः सर्वे पुराहैतं ब्रवीम्यहं ॥ २ ॥
कुरुक्षेत्रे महापुण्ये व्यासपीठे वराश्रमे ।
तत्रासीनं मुनिश्रेष्ठं कृष्णद्वैपायनं मुनिं ॥ ३ ॥
कृतस्नानं कृतजपं मुनिभिर्थैः समावृतं ।
वेदवेदाङ्गतत्त्वज्ञं सर्वशास्त्रविशारदं ॥ ४ ॥
प्रणिपत्य यथान्यायं शुकः परमधार्मिकः ।
इदमेव समुद्दिश्य तं पप्रच्छ कृताञ्जलिः ॥ ५ ॥
यदुद्दिश्य वयं पृष्टास्त्वयात्र मुनिसन्निधौ ।
नरसिंहस्य भक्तेन पुण्यतीर्थनिवासिना ॥ ६ ॥
शुक उवाच । मार्कण्डेयेन मुनिना कथं मृत्युः पराजितः ।
एतदाख्याहि मे तात श्रोतुमिच्छामि तेऽधुना ॥ ७ ॥
व्यास उवास । मार्कण्डेयेन मुनिना यथा मृत्युः पराजितः ।
तथा ते कथयिष्यामि शृणु वत्स समाहितः ॥ ८ ॥
शृण्वन्तु मुनयश्चेमे कथ्यमानं मयाऽधुना ।

मन्विष्यायैव मृन्वन्तु मद्दाख्यानमुत्तमं ॥ ९ ॥
भृगोः ख्यात्यां ममुत्पन्नो मृकण्डुर्नाम वै सुतः।
सुमित्रा नाम पत्नी च मृकण्डोस्तु महात्मनः ॥ १० ॥
धर्म्मज्ञा धर्म्मनिरता पतिशुश्रूषणे रता।
तस्यां तस्य सुतो जातो मार्कण्डेयो महामतिः ॥ ११ ॥
भृगोः पौत्रो महाभागो वमोत्वच(१) महामतिः।
बुबुधे बल्लभो बालः पिता तत्र कृतक्रियः ॥ १२ ॥
तस्मिन् वै जातमात्रे तु आदेशी कश्चिदब्रवीत्।
वर्षं द्वादशमे पुत्रो मृत्वार्त्तस्य भविष्यति ॥ १३ ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः।
परिभूयमानहृदयौ तं निरीक्ष्य महामतिं ॥ १४ ॥
तथापि तत् पिता धीमान् यत्नात् कालक्रियां ततः।
चकार सर्वां मेधावी प्रहितोऽसौ गुरोर्गृहं ॥ १५ ॥
वेदमेवाध्यस्यास्ते(२) गुरुशुश्रूषणोद्यतः।
स्वीकृत्य वेदशास्त्राणि स पुण्यगृहमागतः ॥ १६ ॥
मातापित्रोर्नमस्कृत्य पादयोर्विनयान्वितः।
तस्थौ तत्र गृहे धीमान् मार्कण्डेयो महाद्युतिः ॥ १७ ॥
तं निरीक्ष्य महात्मानं तत्प्रभाञ्च विलक्षणां।
दुःखितौ तौ भृशं तत्र तन्मातृपितरौ शुक ॥ १८ ॥
तौ दृष्ट्वा दुःखमापन्नौ मार्कण्डेयो महाद्युतिः।

---

१ पाठोऽयं न परिशुद्धः।

२ पाठोऽयं न साधुः।

उवाच वचनं तत्र किमर्थं दुःखमीदृशं ॥ १९ ॥
यदेतत् कुरुषे मातस्तातेन सह धीमता ।
वक्तुमर्हसि दुःखस्य कारणं मम पृच्छतः ॥ २० ॥
मृत्युना पुत्रकेणाथ माता तस्य महात्मनः ।
कथयामास तत्सर्वं आदेयी यदुवाच ह ॥ २१ ॥
तच्छ्रुत्वाऽसौ मुनिश्रेष्ठ मातरं पितरं पुनः ।
पित्रा सार्धं त्वया मातर्मोक्ष्यं दुःखमन्वपि ॥ २२ ॥
अपनेष्यामि मृत्युं × तपसा नात्र संशयः ।
यथा चाहं चिरायुःस्यां कुर्यां तथा महत्तपः ॥ २३ ॥
मृत्युज्ञाऽसौ समाश्वासन् पितरौ न सदयसात्(१) ।
त्यजन्वोन(?) वनं नाम नानाऋषिसमाकुलं ॥ २४ ॥
तत्रासौ मुनिभिः सार्धं खासोनं खपितामहं ।
भृगुं ददर्श धर्मज्ञं मार्कण्डेयो महामतिः ॥ २५ ॥
भृगुराह महाभागं मार्कण्डेयं तदा शिशुं ।
किमागतोऽसि पुत्रस्तु पितुस्ते कुशलं पुनः ॥ २६ ॥
मातुश्च बान्धवानाञ्च किमागमनकारणं ।
मृत्योरमृतो मुनिना मार्कण्डेयो महात्मना ॥ २७ ॥
उवाच सकलं तस्मै आदेशिवचनात्तदा ।
पौत्रस्य वचनं श्रुत्वा पुनस्तं भृगुरब्रवीत् ।
एवं मतिमहाबुद्धे किं त्वं कर्म चिकीर्षसि ॥ २८ ॥
मार्कण्डेय उवाच । भूतापहारिणं मृत्युं जेतुमिच्छामि साम्प्रतं ।

---

१ पाटीऽयमादर्शदोषदुष्टः ।

तवोपदेशात्तु गुरो तवोपायं वदस्व नः ॥ २८ ॥

गुरुरुवाच। नारायणमनभ्यर्च्य तपसा मनसा सुत।
को जेतुं शक्नुयान् मृत्युं ततस्तं तपसार्चय ॥ ३० ॥
तम+स्तमजं विष्णुं अच्युतं पुरुषोत्तमं।
भक्तप्रियं सुरश्रेष्ठं भक्त्या तं शरणं व्रज ॥ ३१ ॥
तमेव शरणं पूर्वं गतवान्नारदो मुनिः।
तपसा महता वत्स नारायणमनामयं ॥ ३२ ॥
तत्प्रसादान्महाभाग नारदो ब्रह्मणः सुतः।
जरां मृत्युं विजित्यासौ दीर्घायुर्वर्त्तते सुखं ॥ ३३ ॥
तमृते पुण्डरीकाक्षं नारसिंहं जनार्दनं।
भक्तानां वत्सलः कुर्य्यात् मृत्युसेनानिवारणं ॥ ३४ ॥
तस्मात् त्वं लोककर्त्तारं विष्णुं जिष्णुं श्रियःपतिं।
गोविन्दं गोपतिं देवं सततं शरणं व्रज ॥ ३५ ॥
नारसिंहमजं देवं यदि पूजयसे सदा।
वत्स जेतासि मृत्युं त्वं ससैन्यं नात्र संशयः ॥ ३६ ॥

व्यास उवाच। उक्तः पितामहेनैवं भृगुणाथ तमब्रवीत्।
मार्कण्डेयो महातेजा विनयात्स पितामहं ॥ ३७ ॥
आराध्यः कथितस्तात विष्णुरेवेति निश्चयात्।
आराधितश्च भगवान् मम मृत्युं हरेदिति ॥ ३८ ॥
कथमत्र मया कार्य्यमच्युताराधनं गुरो।
येनासौ मम तुष्टस्तु मृत्युं सद्योऽपनेष्यति ॥ ३९ ॥

भृगुरुवाच। तुङ्गा च भगिनी भद्रा ह्येनद्यौ मत्सकाशवे।

15940

ROYAL ASIATIC SOCIETY OF BENGAL LIB

Author Purana

Title Agni Purana - Vol

Call No. 5

Date of Issue	Issued to	Date

Library of the
ROYAL ASIATIC SOCIETY OF BENGAL
Call No. 294.5/P.985a
Accession No. 15940